जीवन्ती तु शमीजीवाछिन्नावन्दा[491]भयाभिदि ॥ १९१ ॥

जीवन्तो[492] रक्तमाषे[493] स्यात् जीमूतो मुस्तघोषयोः[494] ॥
त्रिवृतः स्नेहभेदे स्या[495]त्रिवृता त्वरुणाभिदि ॥ १९२ ॥

द्रवन्ती वन्तिकाभेदरुदन्तीरोदनीषु च ॥
पार्वती जीवनीयायां[496] शल्लक्यामपि[497] योषिति ॥ १९३ ॥

बृहती महती[498]क्षुद्राकलशी[499]राष्ट्रिकास्वपि[500] ॥
मालत्यग्निशिखापाठावायसी[501]सुमनासु च ॥ १९४ ॥

रोहितं कुङ्कुमे क्लीबं पुंसि रोहिणि रोहितः ॥
लोहितं कुङ्कुमे रक्तचन्दने च कुचन्दने ॥ १९५ ॥

---

473. शोतं—W. 474. कुम्या—W. 475. चिता—W. 476. शंख—W. 477. पाटंला—W. 478. अमृत—W. 479. सुखा—Bh. 480. सर्प्पिषि—Bh.; सर्पिन्छि—W. 481. द्राक्षाक्षा—W. 482. कृष्णभया—W. 483. हवा—W. 484. धात्रि—W. 485. कर्प्पा०—Bh and W. 486. विशल्याया—W. 487. गोप्या व—W. 488. स्त्रो—W. 489. नोन्मंतः—W. 490. मुचकंदे—Bh. text. 491. बंदा—Bh. 492. जीवतो—W. 493. ०मार्षे—Bh. and W. 494. योषयोः—W. 495. च—W. 496. जीवनीयायां—W. 497. शल्लक्यामपि—W. 498. महती—repeated twice—W. 499. कलशो—W. 500. राष्ट्रका०—W. 501. वायसो—W.

वासन्ती[502] प्रहसन्त्यां[503] माधव्यां[504] बालपुष्पायाम् ॥
कुरुभ्यामथ वासन्तः श्रीमदशोकाक्षमुद्ग[505]चूतेषु ॥ १९६ ॥

श्रीमद्रक्ते स्त्रियां मुण्ड्यां मल्ल्यां[506] नाश्वत्थरेचिनोः ॥
सुव्रता महिलाह्वायां मल्लिकायां च तद्विदि[507] ॥ १९७ ॥

तच[508]। अतिमुक्तस्तु माधव्यां[509] कालस्कन्धे रथद्रुमे[510] ॥
अंशुमान् भास्करे शालिपर्ण्यामंशुमती[511] मता ॥ १९८ ॥

ऋष्यप्रोक्ता[512] शतावर्यां शूकशिम्ब्यां बलाभिदि ॥
ऐरावतो नागरङ्गद्रुमेऽपि लकुच[513]द्रुमे ॥ १९९ ॥

कलधौतं सुवर्णे[514] स्याद्रजतेऽपि नपुंसकम् ॥
कृष्णवृन्ता[515] माषपर्णी[516]काश्मरीपाटलासु च ॥ २०० ॥

गारुत्मतं मरकते गरुडोद्गारकेऽपि च ॥
चन्द्रकान्तो मणेर्भेदे चन्द्रकान्तं[517] तु कैरवे ॥ २०१ ॥

ज्योतिष्मती काकजङ्घाकङ्गुणिक्यो[518]रपि स्मृता[519] ॥
तेजोवती[520] वचातेजःपर्णीज्योतिष्मतीषु च ॥ २०२ ॥

नदीकान्तः पुमान् सिन्दुवारके हिज्जले[521]ऽपि च ॥
नदीकान्ता काकमाचीजम्बूभिद्वायसीषु च ॥ २०३ ॥

नन्द्यावर्तो[522] नते बर्हिशिखायां वेतसेऽपि च ॥
नागदन्ती मूषिकाह्वा[523]दन्तीन्द्राह्वाकुरूढके[524] ॥ २०४ ॥

अथ प्रव्रजिता भूतजटायां भूकदम्बके ॥
पारिजातस्तु[525] मन्दारे पारिभद्रे सुरद्रुमे ॥ २०५ ॥

पारावती श्यामले ना जम्भीले कपितिन्दुके ॥
अथ पीतरक्तउदितो[526] वाल्हीके[527] पद्मके कुसुम्भे च ॥ २०६ ॥

---

502. वासंतो—W. 503. प्रहसंत्या—W. 504. माधव्यो—W. 505. मुद्र—W. 506. मल्लांना—W. 507. तङिदि—W. 508. Dropped—W. 509. माधव्या—W. 510. रथव्रमे—W. 511. मंशुमता—It appears that मती after अंशु has been omitted through oversight in W. 512. ऋष्या—Bh. text and W. 513. लकुचे—Bh. 514. सुवर्णे—W. 515. ०वृता--W. 516. ०पर्णा—W. 517. कांतं—Bh. 518. कंगुणीक्य—W. 519. मृता—W. 520. तजोवती—Bh. 521. हिजले—Bh. 522. नंद्याबत्ते—W. 523. मूषकोन्ह-W. 524. कूरुढवं—W. 525. पारिजातं—W. 526. उदीतो-W. 527. वाल्होके—W. 528. मव्रनीया—W.

मद्यन्ती[528] मदनीयाप्रमोदिनीवालपुष्पासु ॥
वरतिक्ता[529] पापचेल्यां[530] ना त्वगस्त्ये च पर्पटे[531] ॥ २०७ ॥

वनस्पतिर्ना[532] द्रुमाद्ये[533] विनापुष्पं[534] फलिद्रुमे ॥
व्याधिघातः पुमानारग्वधे च जलवेतसे ॥ २०८ ॥

विष्णुक्रान्ता [535]नीलपुष्पीकटभ्यामलकीभिदि[536] ॥
विकङ्कता मता चातिबलायां ना स्रुवोद्रुमे ॥ २०९ ॥

शतक्रतुर्मतः श्वेतकरवीरे च वत्सके ॥
समुद्रान्ता तु कर्पास्यां स्पृक्कायां च यवासके ॥ २१० ॥

सूर्यभक्तो बन्धुजीवे[537] रविवल्ल्यां[538] तु योषिति ॥
हैमवत्यतसीपथ्याहेमक्षीरीवचासु च ॥ २११ ॥

तपं। अपराजिता तु कटभीशणपर्णी[539]सूक्ष्मपत्रासु ॥
कथिता वसन्तदूत[540]श्चूते स्त्री माधवीकुम्भ्योः ॥ २१२ ॥

द्विजकुत्सितः पलाण्डौ रसोनकन्दे च बहुवारे ॥ तान्ताः ॥
थद्विः। ग्रन्थिः स्यात्पिप्पलीमूले ग्रन्थिपर्णे तु नो नरि ॥ २१३ ॥

तुत्थं स्यादमृतासङ्गे नीलीबालैलयोः स्त्रियाम् ॥
पार्थो मार्तण्डभक्तायां पार्थस्त्वर्जुनपादपे ॥ २१४ ॥

पृथुः स्त्रियां च त्वक्पत्री[541]कारवीकृष्ण[542]जीरके ॥
सिक्थो भक्तपुलाके स्यान्मधूच्छिष्टे[543] तु न द्वयोः ॥ २१५ ॥

थषिः। अथाव्यथा हरीतक्यां चारट्यामपि भिक्षुके ॥
अश्वत्थः पिप्पलप्लक्षवटे क्लीबं प्रजाहिते ॥ २१६ ॥

[544]कायस्थामलकीछिन्नाप्रमथ्या[545]तुलसीषु च ॥
गोग्रन्थिर्ना करीषे स्यादपि गोजिह्वि[546]कौषधौ ॥ २१७ ॥

वयःस्थामलकीसोमवल्लरीकुण्डलीषु च ॥
सूक्ष्मैलायां च काकोल्यां हरीतक्यां[547] च शाल्मलौ ॥ २१८ ॥

---

529. वहृतिक्ता—Bh. 530. पापचेल्या—W. 531. पर्पटे—Bh. 532. ना—W. 533. द्रुमाग्र—W. 534. ०पुष्पे-W. 535. नीलपुष्पा—Bh नीलपुष्पी-W. 536. भिति—Bh. 537. ०जावे—W. 538. रविवल्यां—Bh. and W. 539. शणपर्णो—W. 540. दूतं—W. 541. त्वकपत्री—W. 542. कृष्ट—W. 543. च्छ for छ. 544. कायस्थ—W. 545. प्रपथ्या—W. 546. जिह्वको—W. 547. हरीतक्या—W.

षड्ग्रन्था[548] तु वचाशट्योः षड्ग्रन्थः करजान्तरे[549] ॥
थच। वानप्रस्थो मधुष्ठीलयक्षपादपयोर्नरि ॥ २१९ ॥ थान्ताः ॥

दद्विः। कन्दो ना मुस्तके न स्त्री शूरणास्यमूलयोः ॥
कुन्दं[550] माध्ये[551]ऽस्त्रियां कुन्दः[552] कुन्दरो[553] ना छदः पुमान्[554] ॥ २२० ॥

ग्रन्थिपर्णे तमालेऽपि मद्गो मार्गे च शीधुनि[555] ॥
मदा तु शीधुपुष्पायां शादो जम्बालशष्पयोः ॥ २२१ ॥

दत्रिः। इङ्गुदी तापसतरौ द्वयोः स्त्री श्लीपदापहे ॥
औद्भिदं क्षारतोयोत्थलवणे नगभिद्यपि ॥ २२२ ॥

क्षणदा तु हरिद्रायां क्षणदं सर्वतोमुखे ॥
कुमुदं कैरवे पद्मे कुम्भीकट्फलयोः स्त्रियाम् ॥ २२३ ॥

दरदः पारदे[556] चूर्णपारदे विषभिद्यपि ॥
नलदं [557]स्यात्पुष्परसोशीर[558]मांसीषु[559] न द्वयोः ॥ २२४ ॥

पालिन्दी त्रिवृताभार्ग्योः[560] प्राणिदा वृद्धिपथ्ययोः ॥
वरदादित्यभक्तायां सूकरीहयगन्धयोः ॥ २२५ ॥

माकन्दस्तु रसाले स्यान्माकन्द्यामलकीफले[561] ॥
विशदा[462] क्षुद्रभण्टार्कीविदारीलवलीषु[563] च ॥ २२६ ॥

विशदं[564] पुष्पकासीसे केतके चाथ शारदी ॥
शारिवातोयपिप्पल्योरक्लीबं [565]विषमच्छदे[570] ॥ २२७ ॥

शारदो मुस्तके मुद्गे काशे[566] ब्राह्म्यां तु शारदा ॥
दच। कटुकन्दो गृष्टिकन्दे पलाण्डौ च महौषधे[567] ॥ २२८ ॥

कुरु[568]विन्दोऽष्ठकुल्माषमाणिक्यव्रीहिभित्सु च ॥
क्लीबं तु काचलवणे रक्तपर्णं च हिङ्गुले ॥ २२९ ॥

अथ कोकनदं[569] रक्तकुमुदे रक्तपङ्कजे ॥
खरच्छदो[570] महापत्रे पटोले रक्तबिन्दुके ॥ २३० ॥

---

548. षड्ग्रंथी—W. 549. रजांतरे—W.: क dropped. 550. कुन्व—W. 551. माप्पे—Bh. 552. कुः—W. 553. कुंदुरो—W. 554. 'मान' added after पुमान्-W. 555. सिन्धुनि-Bh. text. 556. परदे-W. 557. त्पात्-W. 558. शोर-W. 559. मांसोषु—W. 560. भार्ग्यो—W. 561. ०मलको—W. 562. विरादा—W. 563. लवलीक्षुषु—W. 564. त्रिपदं—W. 565. त्रिषम—Bh. 566. कारो—W. 567. महौषध्रो—W. 568. कुरुविंदोब्द—W. 569. कोकनद—W. 570. च्छ for छ.

गोधापदी तालपत्र्यां हंसपद्यां च योषिति ।।
महाकन्दः शृङ्गवेरे रसोने शालनक्षमे ।। २३१ ।।

माणके मूलके स्त्री तु विदारीकन्दरम्भयोः ।।
सप्तच्छदं सप्तपर्णे भेदे विचिकिलस्य च ।। २३२ ।।

दष। पारावतपदी[571] काकानलीज्योतिष्मतीषु च ।। दान्ताः ।।
धद्विः। गन्धो लेलीतके कुष्टे[572] दधि स्याच्छ्री[573]निवासके ।। २३३ ।।

क्षीरस्य चोत्तरावस्थाभावे दुग्धं तु जीवने ।।
क्षीराविकायां दुग्धी स्यात् मधुः पुण्ड्र[574]मधूकयोः ।। २३४ ।।

मधु पुष्परसक्षौद्रमद्यक्षीराविकासु[575] च ।।
जीवन्त्यां तु स्त्रियां राधा श्रीफले च विषोदरे ।। २३५ ।।

वधूः शटी[576]माल्यवतीगोपकन्या[577]प्रियङ्गुषु ।।
सुधा गङ्गेष्टिकामूर्वाचूर्णानिस्तृंशपत्रके ।। २३६ ।।

धषिः। न्यग्रोधस्तु वटे शम्यां मोहनैरण्डयोः स्त्रियाम् ।।
मागधो जीरके स्त्री तु गृष्टियूथीकणासु[578] च ।। २३७ ।।

सुगन्धि क्लीबं[579] क्षीरे स्यात्तथा च हरिवालुके ।।
धच। इक्षुगन्धो[580] कोकिलाक्षे[581] क्रोष्ट्र्यां[582] काशे च गोक्षुरे[583] ।। २३८ ।।

इष्टगन्धः सुगन्धौ[584] स्यात्त्रिषु क्लीबं[579] तु वालुके ।।
उग्रगन्धाजमोदायां[585] वचायां क्षुद्बिबोधने[579] ।। २३९ ।।

कालस्कन्धः सारतिन्दुतमाले जीवकद्रुमे[586] ।।
तीक्ष्ण[587]गन्धोऽवदंशोऽथ वचाराजिकयोः स्त्रियाम् ।। २४० ।।

परिव्याधः कर्णिकारे निचुले चतुरङ्गुले[588] ।।
महौषधं शृङ्गवेरे लशुने विश्वभेषजे ।। २४१ ।।

विषायां च विषे स्त्री तु मत्स्याक्षीमत्स्यपित्तयोः[589] ।।
हृद्यगन्धं च रुचके ना तु बिल्वा[579]ब्रजीरके ।। २४२ ।। धान्ताः ।।

नद्विः। अग्निर्भल्लातके[590] चित्रे घनो[591] मुस्ते घनं त्वचि ।।
ज्योत्स्नी पटोलिकायां स्याज्ज्योत्स्ना श्यामलघोषयोः ।। २४३ ।।

---

571. पारावमपदी—W. 572. कुष्ठ—W. 573. छ्री॰—W. 574. पुण्ड्र—W. 575. क्षीटा॰—Bh. 576. शटो—W. 577. कंन्या—Bh. 578. कणासु—Bh. and W. 579. ब for व. 580. ॰गंधा-W. 581. कोकिलक्षे-W. 582. क्रोष्ट्र्या-W. 583. गोक्षुरो-W. 584. सुगंवास्या—W. 585. ऊग्र॰—W. 586. जोवक-W. 587. तोक्ष्ण—W. 588. चतुरंगुलो—W. 589. पितये—W. 590. भलातक—Bh. 591. घनोमुस्ते—W.

धाना वितुन्नके भृष्टयवाद्यन्ने[592]च सक्तुषु ॥
मुनिः पियालदमनागस्त्यकोरक[593]किंशुके ॥ २४४ ॥

कङ्केलिमल्ल्योर्मृत्स्ना तु तुवरी[594]मृत्सयोरपि ॥
रास्ना च स्याद्भुजङ्गाक्ष्यामेलापर्ण्यामपि स्त्रियाम् ॥ २४५ ॥

वनं प्रस्रवणे नीरे वह्निश्चित्रेऽप्यरुष्करे ॥
नर्थिः । अर्शोघ्नः शूरणे स्त्री तु [595]तालपर्ण्यामथार्जुनः[596] ॥ २४६ ॥

फल्गुने[597] च तृणे क्लीबमञ्जनं तु रसाञ्जने ॥
सौवीरे[598]ऽप्योदनो न स्त्री भक्ते वाट्यालके[599] स्त्रियाम् ॥ २४७ ॥

कठिनी खट्यां[600] दारुणि कठिना गुडशर्करायां च ॥
काञ्चनः काञ्चनारे[601] स्याच्चम्पके नागकेसरे ॥ २४८ ॥

उदुम्बरे च धत्तूरे हरिद्रायां तु काञ्चनी ॥
क्लीबेऽब्जकेसरे हेम्नि[602] क्लीतनं[603] क्षौद्रसाह्वये[604] ॥ २४९ ॥

क्लीतना सिंहपुच्छ्यां[605] च नीलिकायां च गृञ्जनः[606] ॥
पलाण्डुभेदे लशुने मधुशिग्रौ च पीनसि[607] ॥ २५० ॥

चन्दनोऽस्त्री मलयजे सारिवायां तु चन्दना ॥
छर्दनो[608] मदनो निम्बे[609] बिम्बा[610]लम्बुषयोरपि ॥ २५१ ॥

जननी जतुकृष्णायां पिशाचीमत्स्यपित्तयोः[611] ॥
जन्तुघ्नं हिङ्गुचौहारविडङ्गे ना शुकप्रिये ॥ २५२ ॥

जीवनं प्रस्रवे नीरे जीवनाश्चिरजीविनि ॥
मेदायां जीवनी[612] सिद्धिर्वीरा[613]जीवासु जीविनी[614] ॥ २५३ ॥

तेजनो ना शरे वेणौ तेजोह्वामूर्वयोः स्त्रियाम् ॥
दहनोऽरुष्करे चित्रे धमनो नडनिम्बयोः ॥ २५४ ॥

धमनी निशि नाड्यां[615] च धाविनीति कुलीनिशोः ॥
पृष्टिपर्ण्यां च नलिनं नडे नाड्यां सरोरुहे ॥ २५५ ॥

---

592. ०ग्रन्नेय—W. 593. कोरंक—W. 594. तवरीर्—W. 595. त्यालपर्ण्या०—W. 596. ०ज्जुनः—W. 597. फाल्गु०—W. 598. सौवोर—W. 599. वाद्यालके—W. 600. खर्द्य—W. 601. ०स्य—W. 602. हेन्मि—W. 603. क्लो is changed into क्ली—W. 604. साह्वयोः—W. 605. च्छ for छ 606. गृजनः—W. 607. पीतने—W. 608. छर्दनो-W. 609. ब for व 610. विम्बा-Bh. 611. ०पित्तयो-W. 612. जोवनी-W. 613. षिरा—W. 614. जीवनो—W. 615. नद्यां—W.

न ना स्त्रियां तु पद्मिन्यां नन्दीप्लक्षे[616] वटे पुमान् ॥
पाचनं दशमूल्यादौ हरीतक्यां तु पाचनी ॥ २५६ ॥

प्राचीना [617]घनकट्व्यो[618]र्वसन्तदूत्यां च पाठीनः[619] ॥
चित्रे[620] पुरे च पिशुनं धीरे पिशुना तु पृक्कायाम्[621] ॥ २५७ ॥

पीतनी रक्तमालायां[622] पीतनं[623] पीतदारुणि ॥
कुङ्कुमे हरिताले च पीतनस्तु कपीतने ॥ २५८ ॥

पूतना[624] तु शिवामांस्योः फलिनी हलिनी[625] स्त्रियोः ॥
वाणिनी[626] रजनीदार्वी[627]मञ्जिष्ठानीलिकासु च ॥ २५९ ॥

भावनं मन्थके[628] भव्ये भूतघ्नं चिपतन्डुले[629] ॥
सूपधूपनके चाथ भूतघ्नी देवदुन्दुभौ ॥ २६० ॥

वचायां[630] सर्षपे[631] पुंसि मदनो शठधूर्तयोः[632] ॥
सिक्थके[633] मदनी मार्गे रजनी नीलिनीनिशोः ॥ २६१ ॥

जन्यां[634] च रञ्जनं रक्ते रञ्जनो रक्तचूर्णके ॥
स्त्रुक्‌निशारोचनानीलीजनीरक्तासु रञ्जनी ॥ २६२ ॥

रसोना विजयायां च रसोनं[635] तु [636]महौषधे[637] ॥
रक्षोघ्नी जटिलाचोरपुष्प्योः[638] पुंसि तु सर्षपे ॥ २६३ ॥

सूपधूपनके क्लीबं रेचनो रक्तचूर्णके ॥
रेचनी स्त्रुक्‌त्रिवृ[639]द्दोलाभयाम्हासमुकूलके ॥ २६४ ॥

रोचना[640] रोचनश्चापि रक्तकल्हाररोहिणोः ॥
जम्भे च शाल्मलौ पुंसि गोः पित्ते रोचनी स्त्रियाम् ॥ २६५ ॥

रोचना चाथ कम्पिल्ले[641] मङ्गल्ये चापि रोचनी ॥
रोही रक्ते[642] वटेऽश्वत्थे स्त्री तु कठ्यां[643] च कट्फले ॥ २६६ ॥

---

616. स्मक्षे—W. 617. घन—W. 618. कटवो०—Bh. 619. पाटीनः—W. 620. चित्रे—W. 621. पृक्वायां—Bh. and W. 622. मातायां—W. 623. पीतंने—W. 624. पीतना—W. 625. हलिनी dropped in—W. 626. वाणानी—W. 627. दार्व्वी—W. 628. मन्मथे—W. 629. तण्डुले—W. 630. वचाया—W. 631. सर्ष्पे—W. 632. धूर्त०—Bh and W. 633. सिक्थके—W. 634. जन्या—W. 635. रसोनत—W. 636. महो०—W. 637. W. adds the following after this: रंगिनो (नी) तु विशोधिन्यां मुद्गपर्णो (र्ण) हरिप्रियोः ॥ verse-numbering is thereby affected henceforth. 638. पुष्पोः—W. 639. त्रिवृद्दोला—W. 640. रोचनां—W. 641. कंपिल्ले—W. 642. वटे—Bh. 643. कट्या—W.

अथ रोदनी त्रिदण्डी[644]गुञ्जानन्तानिकुम्भासु ॥
ललना [645]लतात्मगुप्तासर्जे[646] योषित् पियाले ना ॥ २६७ ॥

वितुन्नं वन्यभूधात्री[647]धानास्वस्तिकशीबले ॥
विषघ्नी नाकुलीश्वेतागुडूचीमिसृतास्वथ ॥ २६८ ॥

पुंसि मोक्षे शिरीषे च शतघ्नी तु करञ्जके ॥
वृश्चिकायां[648] शङ्खिनी तु श्वेतपुन्नाग[649]मेघ्ययोः ॥ २६९ ॥

श्लेष्मघ्नी मल्लिकाभेदकम्पिल्लक[650]फणिज्जके ॥
स्यन्दनं के पुमांस्तेमौ सन्तानः[651] कल्पपादपे[652] ॥ २७० ॥

श्रृतक्षीरोपरिस्त्यानरूपायामपि योषिति[653] ॥
सुमनः पुंसि गोधूमे[654] मालत्यां सुमना स्त्रियाम् ॥ २७१ ॥

नच। कपीतनो गर्दभाण्डेऽऽम्रातावश्वत्थशुकप्रिये ॥
कुचन्दनं च पत्तङ्गे[655] रक्ते निर्गन्धचन्दने[656] ॥ २७२ ॥

केसरीपूरके नागकेसरे देववल्लभे ॥
[657]क्रौञ्चादनस्तु चिञ्चुल्यां विस्फोटक[658]मृणालयोः ॥ २७३ ॥

गवादनीन्द्रवारुण्यां[659] शतपद्यां च तद्विवि ॥
चोलकी तु करीरे स्यान्नारङ्गे किष्कुपर्वणि ॥ २७४ ॥

तपस्विनी जटामांस्यां रोहिण्यां च पलाशिनी ॥
पद्मिन्यां गन्धमूलायां द्रुमाबे ना प्रचोदनी[660] ॥ २७५ ॥

दुरालम्भाकण्टकार्योर्मातुलानी महाशणे ॥
भङ्गायां काकजङ्घायां गोलोम्यां च रसायनं ॥ २७६ ॥

घोले[661] धात्र्यां जरा[662]व्याधिहरे विषविडङ्गयोः ॥
राजादनं तु धनुषि क्षीरिण्यां किंशुकेऽस्त्रियाम् ॥ २७७ ॥

---

644. त्रिभंडी—W. 645. लतत्म—W. 646. सर्ज्जे—Bh. and W. 647. धात्री—W. 648. वृश्चिकाख्या—W. 649. पुंनाग—Bh. and W. 650. कंकिल्लक—W. 651. सतानः—W. 652. कल्पपाद्योः—W. 653. घोषितौ—W. 654. गोधूम—Bh. 655. पत्तंग—W. 656. चन्द्रने—W. 657. क्रौचा०—W. 658. वारूण्य—W. 659. पद्णि—W. 660. प्रचोदितो—W. 661. धोले—W. 662. Between ज and रा the following words intervene in W. 'त्स्नो पटोलिकायां स्या ज्यात्स्ना श्यामलघोषयोः ॥ धाना वितुन्नके मृष्टयवाधभ्रकृषु ॥ × ॥ (The verse number here is scratched) मुनिः पियालदमनागस्त्यकोरकं किंशुके ॥ कंकेल्लिमल्ल्योर्मृत्स्ना तु तुवरीर्मृत्सयोरपि ॥×॥

राजपत्नी रेणुकायां पित्तले राजसर्षपे ॥
वृक्षादनं मधुच्छत्रे[663] क्लीबं पुंसि गजाशने ॥ २७८ ॥

वृक्षादनी वृक्षवृन्दाविदारीकन्दयोः[664] स्त्रियाम् ॥
शिखरी तु पुमान् घण्टापाटलौ च मयूरके ॥ २७९ ॥

शिखण्डिनी यूथिकायां काकणन्त्यां च योषिति ॥
श्रीकेतनं तु कनके पुष्पमात्रे सरोरुहे ॥ २८० ॥

अथ श्लेष्मघना[665] मल्ल्यां केतक्यामपि चेष्यते ॥
सरोजिनी तु पद्मिन्यां सरोजे वंशरोचने ॥ २८१ ॥

नपं । किष्कुपर्वा पुमानिक्षौ वेणौ पोटगलेऽपि च ॥
कुञ्जराशनशब्दस्तु शल्लक्या[666]मपि पिप्पले ॥ २८२ ॥

तिक्तपर्वा[667] जलब्राह्मी[668]गुडूचीमधुयष्टिषु ॥
पीतचन्दनमुद्दिष्टं[669] कालीयकहरिद्रयोः[670] ॥ २८३ ॥

वरचन्दनमाख्यातं कालीये देवदारुणि[671] ॥
वरवर्णिनी तु लाक्षा[672]फलिनीरोचनानिशि ॥ २८४ ॥

महारजनमुद्दिष्टं[673] शातकुम्भकुसुम्भयोः ॥
स्याद्रक्तचन्दनं रक्तकाष्ठे लोहितचन्दने ॥ २८५ ॥

शकुलादनी तु तिक्ता मांसीचित्रचुलिकच्छटे ॥
शिरीषेऽथ श्वेतधामा घनसाराब्धि[674]फेनयोः ॥ २८६ ॥

हरिचन्दनमस्त्री स्यात्त्रिदशानां[675] महीरुहे ॥
क्लीबं कुङ्कुमगोशीर्षकज्ञधूलिरणप्रिये[676] ॥ २८७ ॥

नष[677] सहस्रवेधी विदुले मार्गे क्लीबं तु हिङ्गुनि ॥ नान्ताः ॥
पद्विः । नीपस्तु पुंसि [678]बन्धूकनीला[679]शोकहलिप्रिये ॥ २८८ ॥

नृपं तगरशम्पाक[680]पियाल[681]क्षीरिकासु[682] च ॥
नृपो[683] भिङ्गारके[684] पार्थे राजादनतरावपि ॥ २८९ ॥

---

663. छत्रं—W. 664. कदयोः ॥—W. 665. धना—W. 666. शल्का—W.
667. ०पर्व्वा—Bh. 668. ब्राह्मो—W. 669. ०मुदिष्ट—Bh. 670. हरिद्रयो—W.
671. देम्वदरूणि—W. 672. लोक्षा—W. 673. रजत—W. 674. ०साराधि—W.
675. त्रिदशा—W. 676. गोशीर्वे—W. 677. षट्—Bh. 678. ब for व. 679. नोला—W.
680. सम्पाकी—W. 681. पयाल—W. 682. क्षोरिकांसु—W. 683. सृपो—W.
684. भंगारके—W. भृगारके—Bh.

पश्चिः । श्रीपुष्पं[685] तु लवे पुण्ड्रे[686] श्रीपुष्पः प्रतिविष्णुके ॥
पश्च । खरपुष्पा तु[687] गोजिह्वामोदाबर्बरकेषु[678] च ॥ २९० ॥

गन्धपुष्पः प्रावृषेण्ये केतके केसरे लवे ॥
अङ्कोटेजलरोहीतरञ्ये[688] नील्यां च वेतसे ॥ २९१ ॥

गुच्छपुष्पा[689] तु धातक्यां पुंसि[690] पूतीकरञ्जके ॥
गूढपुष्पः पुमान्मद्यदोहदे जन्तुमत्फले ॥ २९२ ॥

चन्द्रपुष्पा श्वेतसिंह्यां चन्द्रपुष्पःसमिद्वरे ॥
जपापुष्पं कुङ्कुमे स्याज्जपायाः[691] कुसुमे[692]ऽपि च ॥ २९३ ॥

ताम्रपुष्पी[693] पाटलायां धातक्यां त्रिवृताभिदि ॥
कोविदारे[694]ऽपि चण्डाते क्लीबं पुन्नागके पुमान् ॥ २९४ ॥

देवधूपः[695] पुरे सर्जे[696] नागपुष्पस्तु चम्पके ॥
पुन्नागे नागकिञ्जल्के नागदन्त्यां तु योषिति ॥ २९५ ॥

नीलपुष्पा[697] काञ्चनार[698]निर्गुण्ड्यार्त्तगलेषु च ॥
नीलपुष्पी[699] क्षुमानीलीकटमीवृद्धदारके[700] ॥ २९६ ॥

पिण्डपुष्पं[701] जपाशोककञ्जेऽस्त्री दाडिमे पुमान् ॥
पीतपुष्पी तु देवाह्वावपुसीवारुणीशणे ॥ २९७ ॥

पीतपुष्पा[702] कारवल्ल्यां[703] करवीरसुपुष्पयोः[704] ॥
पीतपुष्पो झिञ्झिरीटे चम्पके च कुरण्टके ॥ २९८ ॥

बहुपुष्पी[705] सीधुपुष्प्यां[706] पुंसि स्यात्पारिभद्रके ॥
बीजपुष्पो मदनके जूर्णाह्वे[707] च फणिज्जके ॥ २९९ ॥

महापुष्पः[708] काञ्चनारे [709]श्लक्ष्णशाल्यो[710]दनोपमे ॥
मधुपुष्पं विशल्यायां शिरीषे गुडपुष्पके[711] ॥ ३०० ॥

---

685. श्रीपुष्प—W. 686. पुंड्रे—W. 687. गोजिह्व—W. 688. जल—W.
689. च्छ for छ. 690. पुं—omitted—W. 691. स्यात् जपायाः—Bh. 692. कुंकुमे—Bh.
693. ०पुष्पो—W. 694. कोविदार—W. 695. ०धूपः—W. 696. सर्जे—Bh. and W.
697. पुः पा—W. 698. कांतार—W. 699. ०पुष्पा—Bh. 700. दरके—W.
701. This and the following lines are dropped by W. 702. पितपुष्पा—W.
703. ०वल्लां—W. 704. पुष्पयो—Bh. 705. ब for व. 706. पुष्पां—Bh.
707. जुर्णा—W. 708. पुष्प—Bh. 709. श्लेक्ष्ण—W. 710. शाल्ये—W. 711. गुड ०—W.

मृत्युपुष्पो[712] नले काशे मूतावासेक्षुवेणुषु ॥
रक्तपुष्पः कुरबकागस्तिशाल्मलिरोहिणि ॥ ३०१ ॥

पलाशतुङ्गचण्डात[713]बन्धुजीवमनोहरे ॥
रक्तपुष्पा चर्मरङ्गासिन्दूरी[714]तरणी[715]भिदि ॥ ३०२ ॥

रक्तपुष्पी[716] वृद्धदारजपापाटलिपर्पटे ॥
वृत्तपुष्पी[717] नागदन्त्यां पुंसि मल्लीकदम्बयोः[718] ॥ ३०३ ॥

धूलीकदम्बमल्लीभिद्वानीरमृदुपुष्पके ॥
बृहत्पुष्पी शणे कुब्जे[719] चिबुके केतके तु ना ॥ ३०४ ॥

शतपुष्पा शताह्वायां क्लीबे स्यात्पुण्डरीयके ॥
शङ्खपुष्पी तु यूथीभित्कम्बुमालिन्ययोः स्त्रियाम् ॥ ३०५ ॥

शणपुष्पी शणे तूले शिव[720]पुष्पोऽर्कपद्मयोः[721] ॥
शीधुपुष्पी ताम्रपुष्प्यां[722] वज्रसेनतरावपि ॥ ३०६ ॥

शुकपुष्पः शुकतरौ शुकपुष्पं शुकच्छदे[723] ॥
श्वेतपुष्पः शतप्राशे वरुणे सिन्दुकुन्दयोः ॥ ३०७ ॥

श्वेतपुष्पी महाश्वेता गणरूपकुटन्नटे[724] ॥
सदापुष्पी[725] द्वयोरर्केऽलर्के[726] कुन्दे तु योषिति ॥ ३०८ ॥

स्वर्णपुष्पी नागदन्त्यां[727] केतक्यां सुरभौ तु[728] ना ॥
सुपर्णे[729] स्वर्णपुष्पा तु [730]चर्मकेश्यग्निजिह्वयोः[731] ॥ ३०९ ॥

सितपुष्पः[732] सितरोहिणि कुन्दे वन्ये तु सितपुष्पं ॥
सितपुष्पी[733] मधुपुष्पा कटभीमङ्गल्य[734]पुष्पीषु ॥ ३१० ॥

स्थिरपुष्पो हेमपुष्पच्छिन्नपुष्पकयोरपि ॥
सूक्ष्मपुष्पाऽक्षपीडायां सूक्ष्मपुष्पी[735] शणाधमे ॥ ३११ ॥

हेमपुष्पोऽशोकरोध्रचम्पकारग्वधेषु च ॥
हेमपुष्पी तु भण्डीरी[736] वारुण्यां यूथिकाभिदि ॥ ३१२ ॥

---

712. मृपुष्पो—W. 713. चडात—W. 714. सिदूरी—W. 715. तरणो—W.
716. रक्तपुष्पो—W. 717. ०वृत—W. 718. कदंबयो—W. 719. कुज्वे—W.
720. शिवं—W. 721. ०पुष्पोऽर्क०—Bh. 722. ०पुष्पां—W. 723. च्छ for छ.
724. नल्प—W. 725. ०पुष्पा—W. 726. ०रेकलेर्के—W. र्के in अर्क and अलर्के—Bh.
727. नादंत्यां—W. 728. त—W. 729. सुपर्णः—Bh. 730. चर्मके०—W.
731. जिह्वयो—W. 732. ०पुष्प—W. 733. ०पुष्पो—W. 734. मंगल्यपुष्पोषु—W.
735. ०पुष्पो—W. 736. भंडोरी—W.

हेमपुष्पं जवापुष्पे[737] पाठायां नागकेसरे[738] ॥
पपं । काञ्चनपुष्पी[739] यूथीभिन्माधवीपाटलासु[740] च ॥ ३१३ ॥

चामरपुष्पः पूगे माकन्दे केतके काशे ॥
दाडिमपुष्पो रोहिणि तूलिन्यां दाडिमी[741]पुष्पम् ॥ ३१४ ॥

बन्धूक[742]पुष्पः प्रियके बन्धु[742]जीवसुमे द्वयोः ॥
अथ स्यान्मल्लिकापुष्पः[743] करुणे कुटजे[744]ऽपि च ॥ ३१५ ॥ पान्ताः ॥

बद्रिः ।[745] दार्वी[746] दारुहरिद्रायां[747] हरिद्रा[748]देवदारुणोः ॥
गोजिह्विकायां निम्बस्तु न्हीवेरपिचुमर्दयोः[749] ॥ ३१६ ॥

बिम्बं[750] फले बिम्बिकायाः बिम्ब एरण्ड[751]धीरयोः ॥
बत्रिः । कलम्बी नाडिकाशाके कलम्बो[752] हरिवल्लभे ॥ ३१७ ॥

कदम्बः[753] सर्षपे नीपे गजाह्वं करिकेसरे ॥
गजाह्वा[754] करिपिप्पल्यां गोडुम्बः[755] शीर्णवृन्तके[756] ॥ ३१८ ॥

गवादन्यां च भूजम्बूः[757] स्वल्पजम्ब्वा[758] विकङ्कते ॥
गोधूमाह्वयधान्ये[759] च नागरङ्गे च योषिति ॥ ३१९ ॥

बच । तिक्तपर्वा तु यष्ट्याह्वहिलमोच्यमृतासु च ॥
राजजम्बू[760]स्तु जम्बू[761]भिरिपिण्डखर्जूरयोः[762] स्त्रियाम् ॥ ३२० ॥

शतपर्वो[763] दीर्घपत्रभेदे[764] यवफले[765] नले ॥
शतपर्वा तु भार्गव्यां[766] वचाकटुकयोरपि ॥ ३२१ ॥

बपं । धूलीकदम्बरितमिशे निम्बे वरुणनीपयोः ॥
शृगाल[767]जम्बूगोंडुम्बे[768] स्त्रियां घोण्टा[769]फलेऽपि च ॥ ३२२ ॥ बान्ताः ॥

---

737. जवापुष्पं—added to जवापुष्पे—W. 738. केसर—W. 739. कांच—W. न is dropped. 740. पाटलांसु—Bh. 741. दाडिमो०—W. 742. ब substituted for व. 743. पुष्प—W. 744. कुटजे—W. 745. वद्रिः—W. and Bh. words ending in ब and व are intermixed under this classification. 746. दार्वा—Bh. दार्वो—W. usually ending in व and not ब. 747. दानु—W. 748. हरिद्रदिवदानुणोः—W. 749. ०मर्द्दयोः—Bh. 750. the words बिंब, निंब, कलंब, कदंब. etc end in ब but गजाह्व ends in ब. 751. एरंड—W. 752. कलम्बो—W. 753. कलम्वः—W. 754. गजाह्वा Obviously ends in व and not ब. 755. गोंडुवः—Bh. 756. शीर्या—W. 757. भूजत्रू—W. 758. जंवां—W. 759. चान्ये—Bh. 760. जम्बू—W. 761. जंबु—W. 762. खरजर—W; ०खर्ज्जूर—Bh. 763. ०पर्वा—Bh. 764. दीर्घ्र—W. 765. भभेदे—W. 766. भार्गव्या—Bh; भासगव्यां—W. 767. शृंगालजंबू—Bh. 768. ०गोंडुम्बे—W. 769. घाण्टा०—W.

मद्विः। कुम्भं[770] त्रिवृद्गुग्गुलयो[771]र्भद्राख्यालीहठे[772] स्त्रियाम् ॥
रम्भा तु मृत्युपुष्पायां स्याद्रम्भः षट्पदालये ॥ ३२३ ॥

शुभा[773] तु श्वेतदूर्वायां पृक्कावांशी[774]शमीष्वपि[775] ॥
भत्रिः। ऋषभी शूकशिम्बायामृषभो दुर्धरे[776] पुमान्[777] ॥ ३२४ ॥

कटभी[778] गिरिकर्ण्यां च ज्योतिष्मत्यां द्रुमिद्यपि ॥
अथो कुसुम्भः कनके स्यान्महारजने[779]ऽपि च ॥ ३२५ ॥

सुरभिश्चम्पके स्वर्णे नवमल्ल्यां हरि[780]प्रिये ॥
मुरासुराफलैलेये शल्लक्यां गन्धराज्ञयोः[781] ॥ ३२६ ॥

भर्पं। शुकवल्लभः शिरीषे दाडिमस्य फलेऽपि च ॥ [782]भान्ताः ॥
मद्विः। उमा तु रत्नपत्रायां हरिद्रायामथ क्षुमा[783] ॥ ३२७ ॥

अतसीनीलयोः क्षेमश्चण्डाचोरकयोर्द्वयोः ॥
श्यामो दमनके गन्धतृणे पद्मः पलङ्कषे[784] ॥ ३२८ ॥

पद्माऽव्यथाफञ्जिकयोः[785] पद्मो स्त्री पद्मकेऽम्बुजे[786] ॥
ब्राह्मी[787] तु फञ्जिकासोमवल्लरी शाकभित्सु[788] च ॥ ३२९ ॥

भीमः कुम्भोलुखलके वकपुष्पे च वेतसे[789] ॥
रामा श्यामा हिङ्गुनाड्योः[790] क्लीबं वास्तूककुष्टयोः ॥ ३३० ॥

रामः पुमान् कर्णपूरे रुक्मं[791] काञ्चनलोहयोः
लक्ष्मीः[792] सक्तु[793]फलापद्माबृद्धिऋद्धिप्रियङ्गुषु ॥ ३३१ ॥

शमी[794] सक्तुफलायां स्याच्छिम्बायां[795] गुग्गुलावपि ॥
श्यामा प्रियङ्गुसरला[796]गोपीगुन्द्रा[797]हरिद्रासु ॥ ३३२ ॥

नीली[798]चपलासोमे श्यामोऽब्दे वृद्धदारके खदिरे ॥
श्यामं तु काललवणे मारीचे भूस्तृणे कुम्भे[799] ॥ ३३३ ॥

---

770. कुंभ—W. 771. गुग्गुलयों भद्रा—W. 772. हटे—W. 773. सुभा—W. 774. वंर्णा—W. 775. समों०—W. 776. दुर्द्धरे—Bh. 777. पुमान्—Bh. 778. कटभि—Bh. 779. रजते—W. 780. दरि०—Bh. ह and द are sometimes undistinguishable in Bh. 781. ०राज्ञयोः—Bh. 782. मन्ताः—Bh. 783. कुपाः—W. 784. पलजषे—Bh. 785. फं—dropped by W. 786. पद्मकेमुजे—W. 787. ब्रह्मो—W. 788. गाक०—W. 789. पेतसे—W. 790. ताड्यो:—Bh. 791. रुक्मां—Bh. 792. लक्ष्मोः—W. 793. शक्तु—W. 794. समी—W. 795. छित्वायां—Bh. 796. शरला—W. 797. गुंवा—Bh. गुंद्रा—Comm. 798. नीलो—W. 799. कुंम—Bh.

सोमा ब्राह्मीसोमराजा[800]कुण्डलीषु पुमाञ्जले[801] ॥
कर्पूरसोमलतयो[802]र्हिमं कर्पूरशीतयोः[803] ॥ ३३४ ॥

मत्रिः । उत्तमं सिन्धुजे स्त्री तु दुग्धिकायां[804] फलत्रिके[805] ॥
गोलोमी[806] तु श्वेतदूर्वाभूतकेशी[807]वचासु[808] च ॥ ३३५ ॥

गोधूमः स्यान्नाग[809]रङ्गशूकधान्यप्रभेदयोः ॥
दाडिमस्तु[810] त्रिलिङ्गः स्यादेलायां[811] करकेऽपि च ॥ ३३६ ॥

विद्रुमो रत्नवृक्षेऽपि प्रवाले नवपल्लवे ॥
मच । कलिद्रुमो दुरारोहे[812] श्रीवासे च[813] विभीतके[814] ॥ ३३७ ॥

तृणद्रुमस्तु[815] हिन्ताले[816] लाङ्गल्यां क्रमुके तले ॥
खर्जूर्यां[817] तालिकायां च खर्जूरे क्रकचच्छदे[818] ॥ ३३८ ॥

महाश्यामा तु विज्ञेया[819] शिंशिपावृद्धदारयोः ॥ मान्ताः ॥
यत्रिः । कन्या कुमारिकावन्ध्यास्थूलैला[820]सारिवासु च ॥ ३३९ ॥

केश्यं तु वालके भृङ्गराजे चव्यं तु नो नरि ॥
कोलायां च्यवने चव्यं चव्या दूर्वोग्रगन्धयोः ॥ ३४० ॥

जयाभयामातुलानीजयन्त्यरणिभित्सु[821] च ॥
विनापि तेषु तार्क्ष्यं तु रत्नभेदे रसाञ्जने ॥ ३४१ ॥

दिव्यं कोले[822] लवे सूते शिवे ब्राह्मयां[823] तु योषिति ॥
दीप्यो[824] यवान्यां मोदायां धन्या धात्र्यां[825] वितुन्नके ॥ ३४२ ॥

पथ्या मुण्डी[826]विजया[827]वन्ध्यापद्मासु पथ्यन्तु ॥
सिन्धुनि पाक्यं काचे विडे[828] च पाक्यो यवक्षारे[829] ॥ ३४३ ॥

प्रिया प्रियङ्गुकाकोलीमल्लिकावृद्धि[830]ऋद्धिषु ॥
भव्या करिकणायां स्त्री कर्मरङ्गतरौ नरि[831] ॥ ३४४ ॥

---

800. सोमराज्यी—W. 801. माञ्जले—पु is dropped—W. 802. सोमलयो—त is dropprd—W. 803. शीतयोः—W. 804. दुग्धीकायां—W. 805. त्रिकं—W. 806. गोलोमि—W. 807. ०केशी—W. 808. बचसु—W. 809. ०नाप०—W. 810. दाडिमः स्तु—Bh. 811. देलायां—W. 812. दुरारोहे—Bh. 813. च—dropped—W. 814. वभीतके——Bh. 815. ०स्तु—dropped—W. 816. हित्नाले—W. 817. खंर्जुर्यां—W; ज्जूं०—Bh. 818. छेद—W; च्छ for छ. 819. विज्ञेयो—Bh. 820. स्थूला—लै dropped—W. 821. ०त्यरणी वित्सु—W. 822. काले—W. 823. ब्राह्मा—W. ब Substituted for व in Bh. 824. दीप्ये—W. 825. धात्र्या—W. 826. मुंडी—W. 827. विजयां—W. 828. विडे—Bh; W. 829. यवत्कारे—W. 830. वृद्धिषु—W.—the word ऋद्धि is dropped. 831. नरि—W.

मेध्या ब्राह्मीशङ्खपुष्पीगन्धाढ्या[832]रोचनासु च ॥
वचायां[833] पीततैलायां[834] वेल्ले मेध्यं[835] तु जीरके ॥ ३४५ ॥

रम्यं पटोलमूले स्त्री रात्रौ पुंसि तु चम्पके ॥
वन्यं[836] तु क्षुद्रमुस्तायां त्वचि वाढ्या बलाभिदि[837] ॥ ३४६ ॥

बलाया[837]मपि वार्ध्यं तु रुग्भृङ्ग[838]यवपुष्करे[839] ॥
वृष्या[840]तु स्वादुकन्दायां धात्र्यां क्लीबं तु शाड्वले ॥ ३४७ ॥

शल्यं क्ष्वेडे च[841] मदने शल्यः सेव्यस्तु पौण्ड्रके ॥
सेव्या[842] तु हृद्यगन्धायामथ सेव्यं रणप्रिये ॥ ३४८ ॥

सौम्या सोमासोमराजी[843]सुमनापर्णिनीषु च ॥
ऋद्धौ वृद्धा[844]वपि स्त्री स्यान्न द्वयोः सोमगन्धिके[845] ॥ ३४९ ॥

हृद्यो लुङ्गे[846] युगे हृद्या मुरायां जलकुब्जके[847] ॥
हृद्यं गुडत्वचायां[848] च कृष्णजीरे तु न स्त्रियाम् ॥ ३५० ॥

यचिः । अभया तु हरीतक्यामभयं समगन्धिके[849] ॥
कलोड्यं पद्मबी[850]जेन्द्री[851]वरवेणुफलेषु च ॥ ३५१ ॥

कैडर्यः[852] कट्फले[853] द्रेष्काकरञ्जमदनद्रुमे ॥
गन्धाढ्या[854] तु सटीगन्धमादनीजलकुब्जके[855] ॥ ३५२ ॥

गाङ्गेयी पुंसि वा मुस्ते क्लीबं[856] स्वर्णकसेरुणोः[857] ॥
चक्षुष्यः कतके[858] पुण्डरीयके[859] च रसाञ्जने ॥ ३५३ ॥

अश्वी[860] स्त्री वनकुलत्थे[861] चाम्पेयो नागकेसरे ॥
किञ्जल्के चम्पके पुंसि सुवर्णे पुन्नपुंसकम् ॥ ३५४ ॥

नादेयी नीरवानीरे[862] भूजम्बूनागरङ्गयोः[863] ॥
जवायामम्बुपिपल्यां जयन्त्या[864] सैन्धवे[865]ऽद्वयोः ॥ ३५५ ॥

---

832. गंधान्या—W. 833. वचयां—Bh. 834. पीत०—W. 835. मध्यं—W. 836. वान्यं—W. 837. ब for व 838. नृमभृष्ट—W. 839. पुरष्करे—Bh. 840. वष्या—W. 841. क्ष्वेवेव—Bh. 842. ष्यात-W.—the first letter से omitted and त substituted for तु. 843. सोमनाजी—W. 844. वृद्धावमि—Bh. 845. सोम गंधीके—W; ०गध्रिके—Bh. 846. लुगे—W. 847. कुज्वके—W. 848. त्वचायी—W. 849. गंधीके—W. 850. ब for ब. 851. चोजेंद्री०—W. 852. कैराऽर्यः—W. 853 ०फलद्रे: ॥—W. 854. गंधाधा—Bh; गंधाग्या—W. 855. कुज्वके. 856. क्लिबं—W. 857. स्वर्णसे०—के dropped—W. 858. कैतके—W. 859. पुव०—W. 860. अश्वो—W. 861. कुलत्थे—W. 862. नार—Bh. 863. ०नगयो:— 864. जयेत्यां—W. 865. This is dropped in W.

पयस्या दुग्धिकावीराकाञ्चनक्षीरिणीषु च ॥
मलया[866] विवृताभेदे मलयः श्वेतचन्दने ॥ ३५६ ॥

मङ्गल्यो[867] ग्रन्थिलाश्वत्थमसूरारिष्टवार्षिके ॥
स्त्रियां तु शम्यधःपुष्पी[868] मिसिधीरप्रियङ्गुषु[869] ॥ ३५७ ॥

रोचनाजीवनी[870]माल्लिगन्धिकालागुरुण्यपि ॥
विशाख्याग्निशिखादन्तीगुडूचीत्रिवृतासु[871] च ॥ ३५८ ॥

शङ्खाख्या[872] तु वचाकम्बुमालिन्योर्दधि न द्वयोः ॥
शालेयं न द्वयोस्तालपर्ण्यां चाणक्यमूलके ॥ ३५९ ॥

शैलेयं गिरिमृत्तालपर्णीशैलजासिन्धुजे ॥
स्त्रीप्रियः[873] सहकारस्य फले शोभा[874]ञ्जनद्रुमे ॥ ३६० ॥

हिरण्यं तु वराटे स्यात्काञ्चनेऽपि च न द्वयोः ॥
यच । अलिप्रिया तु जम्बूभिन् नेपाल्ये न हलिप्रिये[875] ॥ ३६१ ॥

कण्टकाढ्या[876] कुब्जमोचामसूर[877]विदलासु च ॥
घुणप्रियाप्रतिविषाहस्तिवल्न्योः स्त्रियां मता ॥ ३६२ ॥

जीवनीया जयाजीवाकाकवीरासु[878] ना गणे ॥
तण्डुलीयः शाकभेदे विडङ्गे धातुमाक्षिके[879] ॥ ३६३ ॥

तृणशून्यं[880] तु केतक्यां[881] मल्ल्यां च तृणशून्यवत्[882] ॥
धनञ्जयश्चित्रके स्यादर्जुने[883]ऽरुष्करे[884]ऽपि च ॥ ३६४ ॥

पार्वतीया[885] तु मोदक्यां धातक्यामभयाभिदि ॥
प्रावृषेण्यात्मगुप्तायां कुलत्थे ना हरिप्रिये ॥ ३६५ ॥

मुनिप्रियो[886] ब्रह्मवृक्षमृत्यकुण्ड[887]धनुःपटे[888] ॥
रविप्रियादित्यभक्ता[889]निम्बयोः पुंसि मार्कवे[890] ॥ ३६६ ॥

वेधमुख्या मृगमदे वेधमुख्यस्तु केसरे ॥
शतवीर्या[891] शतावर्यां[892] दूर्वायां च शुकप्रिया ॥ ३६७ ॥

866. मलाग्रा—W. 867. न मंगल्यो॰—Bh. 868. पुष्पा—Bh. 869. प्रियङ्गुमु—W. 870. जावनी—Bh. 871. त्रिपुटासु—W. 872. शंखाया—W. 873. स्त्रो॰—W. 874. शोभां॰—Bh. 875. हिलिप्रिये—W. 876. कंटकासा—W. 877. कुज्व—W. 878. जोवा—W. 879. माक्षिकं—W. 880. शूल्यं—W. 881. केक्यां—W—त dropped. 882. सून्य॰—W. 883. ॰द्वज्र्जुने—Bh. 884. पुष्करे—W. 885. पार्वतोया—W. 886. मुनिप्रिये—Bh. 887. कुड—W. 888. पटो—W. 889. भाक्ता—W. 890. मार्कवः— W. 891. ॰वीर्य्या—Bh; ॰त्रोर्या—W. 892. ॰वय्र्या—Bh.; ॰वर्या—W.

राजादने च दाडिम्यां निम्बे ना तु कपीतने ॥
हरिप्रियं[893] कालसारे कदम्बे तु हरिप्रियः ॥ ३६८ ॥

यपं । कालानुसार्यं[894] कालीये शैलेये[895] तगरेऽपिच ॥
सहस्रवीर्या[896] भार्गव्यां [897]शतावर्यां[898] च योषिति ॥ ३६९ ॥ यान्ताः ॥

रैकं । श्रीः श्रीनिवेशके बिल्वे[899] राजादनलवङ्गयोः[900] ॥
रङ्कि:[901] । अभ्रस्तु वालके क्लीवं कुङ्कुमेऽभ्रं तु मुस्तके ॥ ३७० ॥

जाम्बूनदेऽभ्रपटलेऽपीन्द्रः शक्रमहीरुहे[902] ॥
इन्द्रा फणिज्जकेऽप्युग्रा वचायां[903] क्षुद्बिबोधने ॥ ३७१ ॥

ऐन्द्री स्यादिन्द्रवारुण्यां शेफाल्यां सारिवैलयोः[904] ॥
क्षारः पाक्ये गुडे काचे यवजे पटुभस्मनोः ॥ ३७२ ॥

क्षुद्रा चाङ्गेरिका व्याघ्र्योः[905] क्षुरो गोक्षुर इक्षुरे ॥
क्रोष्ट्री[906] विदारीलाङ्गल्योः[907] क्षौद्रं[908] क्षुद्रोद्भवे जले ॥ ३७३ ॥

खरो ना पृथुले[909] क्लीवं देवताडाजमोदयोः ॥
गरा गरी च जीमूते न स्त्री तृणविषे विषे ॥ ३७४ ॥

गुन्द्रैरकालताभद्रमुस्ते गुन्द्रस्तु तेजने ॥
गौरः करञ्जे सिद्धार्थे गौरं तालेऽब्जकेसरे ॥ ३७५ ॥

गौरी तु रजनीपिङ्गाप्रियङ्गुतुलसीषु च ॥
चन्द्रः[910] कर्पूर[911]काम्पिल्लजम्बू[912]नदजलेषु च ॥ ३७६ ॥

चित्रो हुतभुजि स्त्री तु दन्त्यैन्द्री[913]शम्बरीषु[914] च ॥
चुक्रयम्बष्टाचिञ्चयोर्ना[915] वेतसाख्येऽम्लवेतसे ॥ ३७७ ॥

क्लीबं सुक्ते तिन्तिडीके[916] चोरो[917] निश्चर[918]शङ्खयोः ॥
छत्रा मिसावतिछत्रे[919] कुस्तुम्बुरुशिलीन्ध्रयोः ॥ ३७८ ॥

तन्वी तु कन्दरोहिण्यां तन्त्रं स्यादौषधोत्तमे ॥
तीव्रस्तीव्रोत्तमे तिक्तासुरीदूर्वाभिदि स्त्रियाम् ॥ ३७९ ॥

---

893. ०प्रिय—W. 894. कालानुसार्य्यं—Bh.; ०सार्यं—W. 895. शैलेये-omitted—W. 896. ०वीर्य्या—Bh. 897. ०वर्या—W. 898. च—omitted W. 899 विल्य—W. 900. वेगयोः—W. 901. नङ्कि:—W. 902. मङ्ि०—W. 903. स्युम्रा—W. 904. सारिवैल०—Bh. 905. व्याघ्न्यो—Bh. 906. कोष्टी—W. 907. लांल्यो—ग dropped by Bh. 908. क्षौद्र—W. 909. पृथले—W. 910. चद्रः—W. 911. कपूर—W. 912. कपिल्ल—W. 913. दंत्यैंद्रो—W. 914. शंवपु-री—dropped—W. 915. चिचयो—W. 916. तिंतिडोके—W. 917-चित्रोरो—W. 918. निद्चर—W. 919. ०यतिछत्रा—W.

दारु स्यात्त्रिषु पीतद्रौ देवदारुणि न स्त्रियाम् ॥
धारा[920] वत्सादनीक्षीरकाकोलीपृथुजीरके ॥ ३८० ॥

सूक्ष्मैलायां हरिद्रायां गन्धकुट्यां[921] च योषिति ॥
धीरा वीराकुब्जभि[922]दोर्धारं[923] पौष्कररक्तयोः ॥ ३८१ ॥

पुण्ड्रं प्रपौण्डरीके स्यात्पुण्ड्रो[924] [925]व्रीहीक्षुभेदयोः[926] ॥
अतिमुक्ते पुण्डरीके[927] वरस्तिन्दुपियालयोः ॥ ३८२ ॥

वर्यभीरौ[928] वरं धीरकुम्भसिन्धुगुडत्वचि[929] ॥
वरा वन्ध्याचन्द्रहासापौषी[930]पाठाफलत्रिके[931] ॥ ३८३ ॥

वीरा कुलालीगम्भीरीक्षीरावीवारुणीषु च ॥
काकोलीक्षीरकाको[932]लीताम[933]लक्येलवालुषु[934] ॥ ३८४ ॥

रम्भाविदारिकायुग्मकाष्ठोडुम्बरिकासु[935] च ॥
वीरस्तु ककुभे वीरं नते शृङ्ग्यां च काञ्जिके ॥ ३८५ ॥

भद्रानन्तारसागोपीकृष्णाहिंस्राम्ललोणिषु[936] ॥
सारिण्यां कट्फले[937] क्लीबं बिम्बा[938]म्बुदमहोत्पले ॥ ३८६ ॥

मुरा महासहायां स्याद्गन्धकुट्यामपि[939] स्त्रियाम् ॥
वज्रः सिहुण्डे[940] वज्रं तु शिवहीरकवालके[941] ॥ ३८७ ॥

वज्रा गुडूच्यां[942] व्याघ्रस्तु रक्तैरण्डकरञ्जयोः ॥
व्याघ्री निदिग्धिकायां च वेरं वक्त्रेऽपि कुङ्कुमे[943] ॥ ३८८ ॥

शक्रोऽर्जुने[944] च कुटजे शिग्रुः शोभाञ्जने पुमान् ॥
शाकमात्रे च शीघ्रा[945] तु दन्त्यां शीघ्रं[946] घनच्छदे[947] ॥ ३८९ ॥

सेव्ये[948] शुभ्रस्तु सुमने शुभ्रा वंशयाश्विछ्नयोः[949] ॥
शुभ्रं वरेऽभ्रके[950] सारो लोहदाडिम्बयाक्षिके ॥ ३९० ॥

---

920. घाना—W. 921. कुत्यां—W. 922. कुञ्जि—W. 923. धीर—Bh; धीरं—W.
924. राड्रो—W. 925. प्रीहिक्षु—W. 926. भदयोः—W. 927. ०स्तिकुलालीगंभारी-दुपियालयोः—W. 928. वर्य्य—Bh. 929. कं—W. 930. वध्यां—W. 931. पाटा—W.
932. काकोलो—W. 933. तामलेक्ये—W. 934. वालुद्धां—W. 935. नंभा—W.
936. नल्ला—Bh. 937. ०फले—W. 938. विरवां—W. 939. ०कुसा—W.
940. सिहुडे—W. 941. हीरके —W. 942. गुडच्यां—W. 943. कुंकुमे—Bh.
944. ०ज्जुनो—Bh. 945. शीघ्रनि—W. 946. शीघ्र—W. 947. च्छ for छ.
948. स०ये—W. 949. कभ्रयोः—Bh. 950. भ्र—omitted—W.

स्थिरा कलश्यंशुमत्योः[951] सूर्यपर्णीद्वयेऽपि च ॥
धवे तु पुंसि हिंस्रा तु काकादन्यां चिरायुषि ॥ ३९१ ॥

बृहत्यां कृष्णसारायां पिशाच्यामाटरूषके ॥
रविः । अमरा नीलदूर्वायां वत्सादन्यामथामरः ॥ ३९२ ॥

गुञ्जायामस्थिसंहारेऽप्यवरं तु सुगन्धिके ॥
कर्पासेऽप्यगुरु[953] क्लीबं शिंशपायां[954] च[955] जोङ्गके[956] ॥ ३९३ ॥

करीरो[957] गूढपत्रे च न[958] स्त्री वंशस्य कन्दले[959] ॥
कच्छुरा शुकशिम्बायां[960] शटीदुस्पर्शयोरपि ॥ ३९४ ॥

कर्चूरो[961] गन्धमूले स्यात्कर्चूरं[962] नटमण्डने ॥
कबरी[963] बर्बरा[963] पृथ्व्योः कलिद्रुः श्रीनिवासिके ॥ ३९५ ॥

भूतावासे च काश्मीरं कुङ्कुमे पुण्यसागरे ॥
कुमारी तरणीवन्ध्यावनमाल्यसहासु[964] च ॥ ३९६ ॥

श्वेतस्पन्दामहाजम्ब्वोः[965] कुमारो[966] वरुणे नरि ॥
कुञ्जरा[967] मदनीयायां पाटलायां[968] च केसरः[969] ॥ ३९७ ॥

किञ्जल्के स्त्री पुमान्[970] तुङ्गे मुकुरे पुष्पकेसरे[971] ॥
सूपधूपनके[972] क्लीबं खपुरः पूगमुस्तयोः ॥ ३९८ ॥

खर्जूरस्तु द्वयोः सिन्ध्यां तालपत्र्यां तु सा स्त्रियाम् ॥
खदिरा [973]शाकभेदे[974] स्यात्खदिरो[975] दन्तधावने ॥ ३९९ ॥

गम्भीरी मत्स्यगन्धायां शाकभिद्वज्रयोः पुमान् ॥
जम्बीरः प्रस्थपुष्पे च जम्भले शाकभिद्यपि ॥ ४०० ॥

त्वक्पत्री[976] हिङ्गुपत्र्यां च त्वक्पत्रं तु गुडत्वचि[977] ॥
त्वक्सारस्तु शणे वंशे[978] तुवर्यभ्रमृदोर्भिद्रि[979] ॥ ४०१ ॥

---

951. क—omitted—W. 952. पिशाच्या—W. 953. कर्षास्य—W. 954. शिश०—W. 955. च—omitted—W. 956. जॉङ्गके—Bh—W. 957. करीरा—W. 958 ते—W. 959 कदले—W. 960. शिम्बाया—W. 961. कर्च्चूरो—Bh. 962. कच्चूरं—W. 963. ब for व. 964. वंध्यां—W. 965. जंबोः—Bh. 966. After जम्बोः—W. has चकाश्मीर मे पुरयसागरे कुमारीतरणीवन्ध्यावनमाल्यसहासु च and then follows कुमारो etc. 967. कुजरा—W. 968. पाटलीयां—Bh. 969. केसरे—W. 970 न् after. पुमा omitted in Bh. 971. रे—omitted in W. 972. the verse सूपधूपनके० is omitted in W. upto the middle of the following line and starts with भेदे. 973. शाकु—Bh. 974. भदे—W. 975. वदिरो—W. 976. तक्०—W. 977 त्वर्चि—W. 978. तुवर्य्यं—Bh. तुवर्थ—W. 979. भिदु—Bh.

द्रुभेदे नागरं विश्वे मुस्ते देव्यां तु नागरी ॥
निर्जरा[980] तालपर्ण्यां च वत्सादन्यां शिवाफले ॥ ४०२ ॥

पवित्रः[981] खदिरे दर्भे पत्तूरो लोहमारके[982] ॥
रक्तकाष्ठेऽपि पङ्कारः शैवले जलकुब्जके ॥ ४०३ ॥

पापीरो भक्तसिक्थे स्यात् कदम्बस्य च केसरे ॥
पीतद्रुः पुंसि गौराभपीतचन्दनयोरपि[983] ॥ ४०४ ॥

पुष्करं न द्वयोः पुण्यसागरे पङ्कजेऽपि च ॥
पौष्करं पद्मबीजे स्यान्मूले पुष्करकस्य च ॥ ४०५ ॥

भक्षरः स्वर्जिकाक्षारे[984] गण्डाख्यलवणेऽपि[985] च ॥
मसूरा मसुरा चापि त्रिविद्धान्यविशेषयोः ॥ ४०६ ॥

मसूरमसुरौ[986] [987]पुंसि द्वावेतावपि चैतयोः ॥
मधुरं[988] विषे स्त्रियां द्राक्षामिश्रेयामागधीषु च ॥ ४०७ ॥

महाशतावरीमेदामधूलीयष्टिकास्वपि ॥
मधुवल्यामथो पुंसि जीवन्तचिरजीवयोः[989] ॥ ४०८ ॥

मन्दारः पारिभद्रेऽर्कपर्णे देवमहीरुहे ॥
रुधिरा[990] रोचनायां च रुधिरं[991] कुङ्कुमेऽसृजि ॥ ४०९ ॥

बदरः कुन्तलीशाकतिलपर्ण्याह्वशाकयोः ॥
बदरी[992] कौल्य[993]कर्पास्योर्बदरं[994] तु फले तयोः ॥ ४१० ॥

बदरा तूलबदरीविष्णुक्रान्तारसासु[995] च ॥
बर्बरस्त्वजगन्धायां फञ्ज्यां[996] वोले[997] तु बर्बरम् ॥ ४११ ॥

वल्लूरा त्रिषु संशुष्कमांसशूकरमांसयोः[998] ॥
वशिरं सिन्धुलवणे[999] ना त्वाघाटगजाह्वयोः ॥ ४१२ ॥

वानीरः[1000] कपिचूते रथे विदारी[1001]क्षुगन्धायाम् ॥
सौम्यायां च विचित्रो वरचित्रे[1002] चित्रशोके च ॥ ४१३ ॥

980. निर्ज्जरा—Bh. 981. पवित्रः—W. 982. र omitted—W. 983. गोराभ—W. 984. स्वर्ज्जिका—Bh. 985. गडाख्य—W. 986. मसुर—W. 987. मसु—omitted—W. 988. श्रिषे—Bh. 989. जीवनो—Bh. but comm. जीवयोः; जीविनोः—W. 990. नुधिरा—W. 991. नुधिरं—W. 992. वदनी—W. 993. कोलि—W. 994. कर्पास्यो—W. 995. In बदर and बर्बर, व is changed into ब. 996. फज्ज्यां—W. 997. कोले—W. 998. ०मांसयो—Bh. 999. शिंधु—Bh. 1000. वानीनः—W. 1001. विदारो—W. 1002. वरपित्रे—W.

शम्बरी स्यादाखुकर्ण्यां शम्बरं वालके[1003] जले[1004] ॥
शाबरी शुकशिम्बायां शाबरः शबरोद्भवे ॥ ४१४ ॥

शिलीन्ध्रं[1005] कवके क्लीबं कदल्याः कुसुमेऽपि च ॥
शिशिरं चन्दने चन्द्रे सङ्करस्तु हलाहले ॥ ४१५ ॥

शमीफलं तु क्लीबं स्यात्सामुद्रं लवणाब्धिजे ॥
[1006]अम्बरोऽट्टविलासिन्यां[1007] सिन्दूरं[1008] नागसम्भवे ॥ ४१६ ॥

सिन्दूरी रोचना[1009]रक्तबीजिकाधातुकीषु[1010] च ॥
सौवीरं[1011] काञ्जिके[1012] स्रोतोञ्जने[1013] च बदरीफले ॥ ४१७ ॥

हरिद्रा [1014]स्यान्निशादार्व्योः[1015] पुंसि धूलीकदम्बके ॥
हिण्डीरं दाडिमे नाब्धिकफे[1016] वज्रे तु न स्त्रियाम् ॥ ४१८ ॥

रघ । इन्दीवरं[1017] कुवलये वरीद्रोण्योस्तु योषिति ॥
उदुम्बरो हेमदुग्धे[1018] सर्वधातौ तु[1019] न द्वयोः ॥ ४१९ ॥

उपचित्रा सुतश्रेण्यां दाक्षायण्यां[1020] च योषिति ॥
कटम्भरो[1021] रलौ स्त्री तु सरणीमत्स्यपित्तयोः ॥ ४२० ॥

कलम्बिकायां गोलायां वर्षाभूमूर्वयोरपि ॥
कलिकारी विशल्यायां कलिकारः करञ्जके ॥ ४२१ ॥

कर्णिकारः परिव्याधः[1022] व्याधिघातगणे रुके[1023] ॥
कर्णपूरो वीतशोकनीलोत्पलकपीतने ॥ ४२२ ॥

कादम्बरी[1024] तु वारुण्यां क्लीबं दध्यग्रमद्ययोः[1025] ॥
कृष्णसारो बालपत्रे शिंशपायां तु योषिति ॥ ४२३ ॥

दीर्घनख्यां च भण्डीरे न क्लीबं वज्रकण्टके ॥
घन[1026]सारोऽस्तु[1027]कर्पूरे दक्षिणा[1028]वर्तपारदे ॥ ४२४ ॥

---

1003. वालको—W. 1004. नले—W. 1005. शीलींध्र—W; शिलीध्रं—Bh.
1006. अंबरे—W. 1007. विलाशिन्यां—W. 1008. सिंद्रनं—W. 1009. चोचना—W.
1010. वीजिकाषु—W.– omitted the letters काधातु. 1011. सौवोरं—W.
1012. कामिके—W. 1013. श्रोतो—W. 1014. भिशो—W. 1015. दाव्योः—Bh.
1016. नाब्धि—W. 1017. इंदावर—W. 1018. दुग्धे—W. 1019. तु—omitted W.
1020. दाक्षयण्यां—Bh. 1021. कटभरो—W. 1022. Letters 'म्बिकायां गोलायां' intervene between प and रि —W. 1023. रुके—W. 1024. कादंबनी—W.
1025. मधयो:—W. 1026. घनसैरो—W. 1027. ऽस्तु—Bh. 1028. ०वर्त—Bh.

सुपिच्छकेरी पिचौ बिम्ब्यामपि तोयधर[1029] पुमान् ॥
सुनिषण्णे च मुस्तायां दीर्घपत्रो मधूलके ॥ ४२५ ॥

वेल्लन्तरे च लसुने वर्षाभूर्दीर्घवृक्षयोः ॥
कुम्भयोनावभ्रपुष्पे[1030] पलाण्डौ गुरुवारुणि[1031] ॥ ४२६ ॥

पयोधरे नालिकेरे[1032] मुस्तायां च कसेरुणि ॥
पारिभद्रः पारिजाते तिक्तके देवदारुणि ॥ ४२७ ॥

प्रौढशत्रुः[1033] शरपुङ्खवनतिक्तकयोः पुमान् ॥
पीतदारुः पीतकाष्ठे पीतायां देवदारुणि ॥ ४२८ ॥

मणिछिद्रा[1034] तु मेदायां भेदेऽपि[1035] ऋष[1036]भेऽपि च ॥
रक्त[1037]सारस्तु पत्तङ्गे[1038] खदिरे रक्तचन्दने ॥ ४२९ ॥

वाजीकरी वाजि[1039]गन्धाविदार्यो[1040]मलकीषु च ॥
शतपत्री भवे वर्यां[1041] शतपत्रं सरोरुहे ॥ ४३० ॥

शृङ्गवेरी दार्विपत्र्यां[1042] कटुकन्दे[1043] तु न द्वयोः ॥
स्मृतः सुरतरुर्देव[1044]दारुण्यपि विकङ्कते ॥ ४३१ ॥

सुकुमारा तु रम्भायां मनोज्ञायां शुकप्रिये[1045] ॥
पुंसि पुण्ड्रा[1046]भिधानेक्षौ क्लीबं सीसकसिक्थयोः ॥ ४३२ ॥

सुप्रसरा[1047] प्रसारिण्यां हरितायामपि स्त्रियाम् ॥
सूचि[1048]पत्रा च केतक्यां स्त्रियां ना सिति[1049]वारके ॥ ४३३ ॥

रपं । तमालपत्रं[1050] तापिच्छ[1051]पत्रे श्रीमति[1052]पत्रके ॥
तालीसपत्रं भूम्या[1053]मलकीताली[1054]सयोर्मतं ॥ ४३४ ॥

स्याद्राजबदरं रक्तामलके लवणेऽपि च ॥
सर्वतोभद्र उक्तो ना निम्बे मुर्वां तु योषिति ॥ ४३५ ॥

---

1029. तोय—W. 1030. पुछ—W. 1031. दारुणि—W 1032. नालिकेले—W.
1033. The entire verse has been omitted in W. 1034. मणि—omitted—W.
1035. च—W. 1036. ज्ञषभे—Bh. 1037. नक्तसाउ—W. 1038. पत्तंगे—Bh.
1039. ०गधा—W. 1040. मलकोषु—W. 1041. वर्म्या—Bh; वर्या—W.
1042. दार्विपन्मां—W. 1043. ०कुन्दे—W. 1044. ०दारु—W. 1045. ०प्रिये:—Bh.
1046. पुंद्रा—W. 1047. सुप्रसग—W. 1048. प—omitted—W. 1049. शिति०—W.
1050. ०पुत्रं—W. 1051. तापिछ -Bh and W. 1052. श्रोमति—W. 1053. मलर्मा—W.
1054 ताले०—W.

**रष[1055]।** रसायनवरा धात्रीजीवन्तीत्रिफलासु च ॥
पुनर्नवाकाकमाच्योः क्लीबं पयसि सर्पिषि ॥ ४३६ ॥ रान्ताः ॥

**लाद्विः।** अम्ली चाङ्गेरिकायां स्यादम्लाऽम्लिक्यां स्त्रियामुभे ॥
अम्लोऽम्लवेतसे पुंसि कालःस्यात्कासमर्दके[1056] ॥ ४३७ ॥

कालं[1057] मोघात्रि[1058]वृद्दोळामञ्जिष्ठाकृष्णजीरके ॥
गाङ्गेरुक्यां चाथ काली स्यात्कदल्यामथो कुली ॥ ४३८ ॥

उद्दाले[1059] कण्टकार्यां[1060] च ढण्ढणे[1061] बदरी[1062]भिदि ॥
कोली कोलिश्च कर्कन्ध्वां[1063] तत्फले तु नपुंसकम् ॥ ४३९ ॥

कङ्कोलके[1064] च कोला तु[1065] पिप्पलीचव्ययोः स्त्रियाम् ॥
चलस्तुरुष्के चाम्पेये[1066] जलं वालकनीरयोः ॥ ४४० ॥

जाली[1067] तु घोषके[1068] जालो[1069] नीपे तालस्तले द्वयोः ॥
तामलक्यां[1070] तु ताली स्यात्तालं तु नटमण्डने ॥ ४४१ ॥

तूलो न स्त्री पिचौ तूलं क्लीबं स्याद्ब्रह्मदारुणि ॥
तैलं कल्के तिलस्नेहे नलः पोटगले नलम् ॥ ४४२ ॥

नलिनेऽथ नली नल्यां[1071] कुनल्या[1072]मपि योषिति ॥
नालं नाला पद्मदण्डे[1073] नाली शाककलम्बके[1074] ॥ ४४३ ॥

फलं जातीफले[1075] पूगे मदने च फलत्रिके ॥
कङ्कोले च[1076] फली[1077] गन्धफल्यां चम्पककोरके ॥ ४४४ ॥

फलः कृष्णे बलं[1078] गन्धरसे वाट्या क[1079] बला ॥
बलस्तु शिम्बिधान्यस्य[1080] भेदे स्त्री वीर्यधीरयोः ॥ ४४५ ॥

बालोऽस्त्रियामाचमने यूथीबालैलयोः स्त्रियाम् ॥
भल्ली भल्लातके मल्लोऽ[1081]रलौ शालोऽक्षि[1082]पीलुके ॥ ४४६ ॥

---

1055. पट्ट—Bh. 1056. ०मर्दके—Bh. 1057. काल—Bh and W.
1058. भित्रूद्दोला—W. 1059. उद्दाले—W. 1060. कंटकार्य्यां—Bh. 1061. टणणे—W.
1062. वदनी—W. 1063. कर्कन्ध्वे—W. 1064. कंकोलके—W. 1065. त—W.
1066. चंपेये—W. 1067. जालि—W. 1068. घापके—W. 1069. जाली—W.
1070. Variant reading: मलळा तमलक्यो स्त्रो क्लीवं for ताम०...स्या० in W.
1071. नल्यो—W. 1072. कुनल्या—W. 1073. ०दंड—Bh. 1074. कदम्बके—W.
1075. 'नलिनेऽथनळी'—these words are extra before जाती in W.
1076. च—omitted—W. 1077. फलो—W. 1078. बं for व. 1079. वत्यालके—W.
1080. धनन्यस्य—W. 1081. मर्ली—W. 1082. शालोक्षी—W.

सर्जे[1083] चारेऽपि[1084] शालुस्तु कषायद्रव्यचोरयोः ॥
शिला[1085] मनःशिलायां च शिलाजतुनि गैरिके[1086] ॥ ४४७ ॥

शैलं तार्क्ष्ये[1087] च शैलेये[1088] सालो वरुण[1089]सर्जयोः[1090] ॥
लषिः। अनलोऽरुष्करे चित्रेऽप्युद्दालो[1091] वनकोद्रवे ॥ ४४८ ॥

व्रीहिभेदे कोविदारे मधुभेदे[1092] च न द्वयोः[1093] ॥
उत्पलं पुष्करे कुष्ठे कमलं जलजे जले ॥ ४४९ ॥

ताम्रे[1094] च कपिलश्चित्रे कौन्तीशिंशिपयोः स्त्रियाम्[1095] ॥
कदला कदली[1096] पृश्न्यां[1097] कन्दली[1098] कन्दला[1099]वपि ॥ ४५० ॥

काञ्ची[1100]लिकायां कदलो[1101] शाल्मली भूरुहेऽपि च ॥
कराला कालमालायां[1102] तैले सर्ज[1103]रसस्य च ॥ ४५१ ॥

पुमान् क्लीबं तु रोध्रे[1104] स्यात्कट्फलः सोमवल्कले ॥
कट्फला कृष्णवृन्तायां कन्द[1105]लोऽभिनवोद्भिदि ॥ ४५२ ॥

स्त्री रम्भाभूमिकन्दल्योः काकोलो न स्त्रियां विषे ॥
काणायां[1106] स्त्र्यथ[1107] कीलालं[1108] कुङ्कुमे वालकेऽपि च ॥ ४५३ ॥

कुवलं[1109] तूत्पले मुक्ताफलेऽपि कुवलीफले ॥
कुण्डल्या[1110]रग्वधे कन्दरोहिण्या[1111]मप्यथ द्वयोः[1112] ॥ ४५४ ॥

कोविदारे च कुटिला देव्यां[1113] जिह्मे तु न द्वयोः ॥
ग्रन्थिलो क्षुरके[1114] बिल्वे करीरे च विकङ्कते[1115] ॥ ४५५ ॥

गौरिलस्तु कटुस्नेहे लोह[1116]चूर्णेऽपि चक्रला ॥
गुञ्जायां छत्रमुस्ते च चपलः सूतासिल्हयोः ॥ ४५६ ॥

---

1083. सर्जे—Bh. 1084. सारे—W. 1085. शीला—W. 1086. गैरके—Bh. 1087. मार्क्ष्ये—W. 1088. शैलेय—W. 1089. वरण—W. 1090. सर्जयोः—Bh. 1091. उद्दालो—Bh; उ्दालो—W. 1092, दे omitted—W. 1093. द्वयो—W. 1094. ता—omitted—W. 1095. स्त्रियाम्—omitted—W. 1096. कदलो—W. 1097. पश्न्यां—W. 1098. कदली—W. 1099. कदला—W. 1100. ०काष्ठि—W. 1101. कर्दलो-Bh; कदला—W. कदलः is supported by the comm. 1102. मालयां—W. 1103. सर्ज—Bh. 1104. रोधे—W. 1105. कदलो—W. 1106. करणायां—W. 1107. स्त्र्याथ—W. 1108. कीलायालं—Bh. या scratched on top. 1109. कुवल—W. 1110. कुण्डल्या—W. 1111. नोहिण्या—W. 1112 द्वयो—W. 1113. देयां—W. 1114. गाक्षुरे—W. 1115. विकंते—W. 1116. 'ह' in लोह omitted—W.

शौण्ड्यां योषिति चूडाला[1117] गुञ्जायां[1118]छत्रमुस्तके ॥
जगलः[1119] पिष्टमद्ये च मेदके मदन[1120]द्रुमे ॥ ४५७ ॥

जटिलोग्रानल[1121]दयोर्जम्भलो दन्तहर्षणे ॥
जम्भलार्केऽपि जम्बूलः श्यामपत्रे हलीमके[1122] ॥ ४५८ ॥

तरलः[1123] पुंसि धत्तूरे यवागू[1124]सुरयोः स्त्रियाम् ॥
तमालस्तिलके कालस्कन्धे च वरुणद्रुमे ॥ ४५९ ॥

तण्डुला[1125] धान्यनिकरे वेल्ले तण्डुल[1126]मस्त्रियाम् ॥
ताम्बूली नागवल्ल्यां च ताम्बूलं क्रमुकीफले ॥ ४६० ॥

नकुली कुक्कुटी[1127]मांस्यो[1128]रथ स्यान्नाकुली स्त्रियाम् ॥
रास्नाभित् कुक्कुटी[1129]कन्दचव्यके चाङ्कपोडके ॥ ४६१ ॥

निचुलः[1130] स्थलसम्भूतवेतसे चाम्बुवेतसे ॥
नेपालः स्यादिक्षुभेदे सुवहायां तु योषिति ॥ ४६२ ॥

शिलायां च मनोज्ञायां पललं कर्दमे[1131] पले[1132] ॥
तिलपिष्टे प्रवालोऽस्त्री किसले विद्रुमद्रुमे[1133] ॥ ४६३ ॥

पाटला पाटलितरौ पुष्पेऽस्याः पाटलं त्रिषु ॥
पाटली पाटलायां स्यादाशुव्रीहौ तु पाटलः ॥ ४६४ ॥

पिप्पलः केशवावासे पिप्पलं सर्वतोमुखे[1134] ॥
पिप्पली तूपकुल्यायां पिचुलस्त्विज्जले नरि ॥ ४६५ ॥

झावुके[1135] कम्बुके[1136] चापि पिच्छिलो[1137] द्विजकुत्सिते ॥
तूलिन्यां कृष्णसारायां[1138] पोतिकायां[1139] च पिच्छिला[1137] ॥ ४६६ ॥

भव्ये क्लीबं पिङ्गला तु रुचौ[1140] क्लीबं तु पक्वके ॥
पित्तला तोय[1141]पिप्पल्यामारकूटं तु पित्तलं ॥ ४६७ ॥

---

1117. चूडालां—W. 1118. गुंजाया—W. 1119. जगल—W. 1120. मदनु—Bh.
1121. नदलया—W. 1122. हलो०—W. 1123. तरल—Bh; परलः—W.
1124. यवागु—W. 1125. तंदुलो—W. 1126. त०डल—W. 1127. मर्कटी—W.
1128. मांस्या—W. 1129. कुक्कुटि—W. 1130. निचलः—W. 1131. कर्दमे—Bh.
1132. फले—Bh. 1133. विद्रुमे०—W. 1134. मुख—W. 1135. ब for व.
1136. कुंबुके—W. 1137. च्छ for छ. 1138. ०सानायां—W. 1139. पांसिकायां—W.
1140. रुचौ—W. 1141. तोय०—W.

फेनिलः स्यादरिष्टेऽपि फेनिलं बदरीफले[1142] ॥
मदने बहुलैलायां[1143] नीलिन्यां मष्टिका[1144] स्त्रियाम् ॥ ४६८ ॥

गुन्द्रायां भस्मगन्धिन्यां[1145] मातुलः कनकाह्वये ॥
फले राठस्य भङ्गायां[1146] मातुलानी[1147]च मातुली ॥ ४६९ ॥

मुशली[1148] ताल[1149]मूल्याखुपर्णिकासितकक्गुषु ॥
मृणालं[1150] नलदे क्लीबं पुंनपुंसक[1151]योर्बिसे[1152] ॥ ४७० ॥

रसाला तु[1153] रसादूर्वाविदारी[1154]गोस्तनीषु च ॥
रसालं सिल्हके बोले रसालः पौण्ड्र[1155]चूतयोः ॥ ४७१ ॥

लाङ्गली लाङ्गलं चोचे पृष्टिपर्ण्यां तु[1156] लाङ्गली ॥
कण्टके[1157] च विशल्यायां[1158] वल्कला[1159] तु गुडत्वचि ॥ ४७२ ॥

तेजोवत्यां[1160] वञ्जुलस्तु तिनिशाशोकवेतसे ॥
विमला सातलायां स्याद्विमलः पद्मकाष्ठके[1161] ॥ ४७३ ॥

विदुलस्तु पुमानम्लवेतसे चापि वेतसे ॥
श्यामलः[1162] स्याच्चलदले श्यामलं लवलीफले ॥ ४७४ ॥

शाल्मली रक्तपुष्पायां[1163] तदास्रावे तु शाल्मलः[1164] ॥
शीतलं पुष्पकासीसे कर्पूरे[1165] मलयोद्भवे ॥ ४७५ ॥

शैलजे च पुमान्हेमपुष्पे मरिचपत्रके ॥
श्रीफली नीलिका[1166]धात्र्योर्ना बिल्वे चिक्कणे द्वयोः ॥ ४७६ ॥

शीवलं स्याच्च शीवाले शैलेये[1167] च नपुंसकम् ॥
शैवलः पुंसि शैवाले क्लीबं स्यात्पद्मकाष्ठके ॥ ४७७ ॥

सरलः[1168] पूतिकाष्ठे स्यात्सरला तु त्रिवृन्क्रिवि ॥
सरला ग्रैष्मिकाभूरिफेनाचूडामणिष्वपि ॥ ४७८ ॥

---

1142. पूले—W. 1143. बहुलेस्नायां—W. 1144. सहिला—W. 1145. गंभिन्या—W. 1146. भंगाया—W. 1147. ०लानि—W. 1148. मुसली—W. 1149. तीलमुल्या०—W. 1150. मृशोलं—W. 1151. ०नपुसक०—W. 1152. विसे—Bh and W, 1153. मुनसा—W. 1154. गो—omitted W. 1155. पांड्र—W. 1156. स—W. 1157. कंचटे—W. 1158. विशल्याशा—W. 1159. वल्केला—W. 1160. तेजोवह्यां—W. 1161. फष्टके—W. 1162. श्यानलः—W. 1163. पुष्पायां—W. 1164. साल्मलः—W. 1165. करपूरे—W. 1166. निलिका—W. 1167. शैलये—Bh. 1168. सरल—W.

हिङ्गुलो वर्णकद्रव्ये ना घण्टाक्ष्यां[1169] तु हिङ्गुली[1170] ॥
लच। अमृणाल[1171]मुशीरे स्याद्दीर्घ[1172]मूले च[1173]न द्वयोः ॥ ४७९ ॥

एकाष्ठीला[1174] स्त्रियां पुंसि[1175] पापचेल्या[1176]म्बुके क्रमात् ॥
कन्दरालः पुमान्[1177] गर्दभाण्डे[1178] प्लक्षतरावपि[1179] ॥ ४८० ॥

अथ कर्षफलो धात्र्यां बिभीतकतरावपि ॥
क्षीरवल्ली हेमदुग्धाविदारीक्षीरिणीषु च ॥ ४८१ ॥

अथ गन्धफली फल्यां चम्पकस्य[1180] च कोरके ॥
गन्धमूला पद्मनाड्यां[1181] सुरभौ द्राविडे पुमान् ॥ ४८२ ॥

ताम्रमूला दुरालम्भा[1182]समङ्गाञ्जलिकारिके[1183] ॥
तोयवल्ल्यम्बुसुषवीलाङ्गलिक्योर्दलामलं ॥ ४८३ ॥

फणिज्झके च दमने दीर्घमूलो यवासके ॥
दीर्घमूला स्थिरागोप्योः क्लीबं वेल्ल[1184]न्तरे शरे ॥ ४८४ ॥

प्रचीवलोऽम्बुपिप्पल्यां काकाह्वागण्डदूर्वयोः[1185] ॥
अथ पुष्पफला नील्यां पुंसि तालकपित्थयोः ॥ ४८५ ॥

कूष्माण्डे तु द्वयोः पोटगलः काशे नले पुमान् ॥
अथो बहुफलो नीपे[1186] ना मलय्यां[1187] तु योषिति ॥ ४८६ ॥

काकमाच्यामथो क्लीबं[1188] विज्ञेयं कटुकाफले ॥
महाबलं सीसके स्याद्भारद्वाज्यां[1189] महाबला ॥ ४८७ ॥

महाफला तु कूष्माण्ड्यां पुलिङ्गश्चोचबिल्वयोः[1190] ॥
मुक्ताफलं[1191] तु कर्पूरे मौक्तिके लवलीफले ॥ ४८८ ॥

यवफलो मांसिकायां कुटजत्वचिसारयोः ॥
अथ रक्तफला बिम्ब्यां वटे रक्तफलः पुमान् ॥ ४८९ ॥

---

1169. भटाक्यां—W. 1170. हिंगुलो—W. 1171. अमृगल—W. 1172. दोर्घ—W. 1173. नचन – W. 1174. एकाष्टोला—W. 1175. पुंसि—omitted—W. 1176. पापचेल्यं—W. 1177. पुमानर्द०—W. 1178. गर्दभांडे—Bh. 1179. ०नरावेपि—W. 1180. चंपक—W. 1181. पद्म—omitted. 1182. दुरालभा—W. 1183. कारके—W. 1184. वेल्ल०—W. 1185. द्वयो—W. 1186. नीप—Bh. 1187. तामलप्यां—Bh. 1188. क्लीव—W. 1189. ०द्वाज्यं—Bh. 1190. विल्वयोः—W. 1191. After मुक्ता the entire verse has been omitted and the text copied from अथरक्तफला० onwards in the following verse.

वृश्चिकाली मेषशृङ्ग्यां वर्षाभूभिदि च स्त्रियाम् ॥
समष्ठिल[1192]स्तोयमार्गे गण्डीरे[1193] तु समष्ठिला ॥ ४९० ॥

सदाफलो नालिकेरे मालरे जतुमत्फले[1194] ॥
सोमवल्ल्यमृताब्राह्मी[1195]चक्राङ्गीवाकुचीषु च ॥ ४९१ ॥

अथ सौवर्चलं[1196] स्वर्जिक्षारे[1197] च लवणान्तरे ॥
हरिताली तु दूर्वायां काशे ताले तु न द्वयोः[1198] ॥ ४९२ ॥

लपं । अङ्गारवल्ली शार्ङ्गेष्टा[1199]भार्गी[1200]ज्वालामुखीषु च ॥
जघनेफला मलय्वां[1201] पनसे जघनेफलः ॥ ४९३ ॥

लष[1202] । कृष्णपाकफलः[1203] पुंसि स्त्रियां च करमर्दके ॥
कृष्णपाकफला[1204] तुम्बीखर्जूरीवाकुचीष्वपि ॥ ४९४ ॥

रसायनफला धात्रीमाचिकारुष्करेषु[1205] च ॥ लान्ताः ॥
वह्निः । क्षवश्छिक्काराजिकयोर्जीवस्तु[1206] मधुरप्रिये[1207] ॥ ४९५ ॥

महा[1208]निम्बेऽपि जीवा[1209] स्याज्जीवन्तीवचयोरपि ॥
दार्वी[1210] दारुहरिद्रायां गोजिह्वायामपि स्त्रियाम् ॥ ४९६ ॥

देवी[1211] कुमारिकास्पृक्काजयन्तीतेजिनीषु[1212] च ॥
विद्धकर्णी[1213]पीलुपर्णी[1214] वन्ध्याकर्कोटकीष्वपि[1215] ॥ ४९७ ॥

धवो भर्त्तरि द्रुमे धूर्ते[1216] ध्रुवः[1217] शङ्कौ वटेऽपि[1218] च ॥
ध्रुवा[1219] मूर्वाशालिपर्ण्योः[1220] प्लवः[1221] प्लक्षे[1222] शिलारसे ॥ ४९८ ॥

विकङ्कते च वृक्षाम्ले मेलके[1223] कुलकेऽपि च ॥
कैवर्ति[1224]मुस्तके गन्धतृणेऽपि स्यान्नपुंसकम् ॥ ४९९ ॥

---

1192. समिष्ठिल—W. 1193. गंडोरे—W. 1194. ०फलं—Bh. 1195. चक्रांका—W. 1196. सौवर्च्च०—Bh. 1197. स्वर्जि०—Bh. 1198. द्वयो—W. 1199. शार्ङ्गेष्टा—W. 1200. भागो—W. 1201. मलयां—Bh; मलव्यां—W. 1202. लषट्—Bh. 1203. ०फला—W. 1204. ०पला—Bh. 1205. मीचिकानुष्क—W. 1206. जीव०—Bh; जोंव—W. 1207. प्रिर्ये—W. 1208. र्निबे—W. 1209. जीवे—W. 1210. दावोदानु—W. 1211. कुवी is added after देवी—W. 1212. तेजनो—W. 1213. ०कर्णि—W. 1214. ०पर्णो—W. 1215. ०ष्कपि—W. 1216. धूर्त—Bh and W. 1217. ध्रुवे—W. 1218. वरे—W. 1219. ध्रुव—W. 1220. सालिपर्ण्यो—W. 1221. प्लव—Bh. स्पवः—W. 1222. स्पक्षे—W. 1223. मे—omitted; लेके—W. 1224. कैवर्तो—W.

मृद्वी द्राक्षातिविषयोर्य[1225]वाश्वप्रियद्वन्द्वयोः[1226] ॥
लट्वाऽलक्ते करञ्जेऽपि विश्वा विश्वं च नागरे ॥ ५०० ॥

क्लीबं गन्धरसे चोपविषाशङ्काह्वयोः स्त्रियाम्[1227] ॥
शिवः पुरे[1228] पुण्डरीके वकुले सैन्धवे[1229] शिवम् ॥ ५०१ ॥

शिवा कुम्भ्यभयाधात्रीभूमिधात्रीशमीषु[1230] च ॥
शिखिर्भूर्जे[1231] च वकुले स्वाद्वी[1232]श्रेणीरसालयोः ॥ ५०२ ॥

अथ स्त्रुवा स्याच्छल्लक्यां मूर्वाधूलीकदम्बयोः[1233]॥
वषिः । अष्ठीवमष्ठि[1234]लवणे न स्त्री पुंसि घनच्छदे[1235] ॥ ५०३ ॥

कारवी[1236] रामचीघोषाजमोदाकृष्णजीरके ॥
कितवश्चोरके धूर्ते[1237] कैरवं कुमुदेऽम्बुजे[1238] ॥ ५०४ ॥

पदवी सहदेवायां नागवलायां च माधवीकुम्भ्याम् ॥
नेपाल्यामतिमुक्ते वीरायां क्षौद्रशर्करायां[1239] च ॥ ५०५ ॥

क्लीबं जरणेऽथाम्रे[1240]ऽश्वत्थे[1241] सिक्थे च किंशुके[1242] पुंसि ॥
शताह्वा[1243] मधुसम्भूतशर्करा[1244]जातिपोषिषु[1245] ॥ ५०६ ॥

शङ्खाह्वा तु वचाकम्बुमालिन्योर्दध्नि[1246] न द्वयोः ॥
सारिवा गोपकन्यायां सारिवः शालिभिद्यपि ॥ ५०७ ॥

सुषवी[1247] कारवेल्ले स्याज्जीरके कृष्णजीरके ॥
वष । धामार्गवस्तु पुंसि स्यादपामार्गे च घोषके[1248] ॥ ५०८ ॥

मरुद्भवस्तु कर्पासे खदिरे[1249] च यवासके ॥
मधुस्त्रवा धवश्रेणी[1250]जीवाहंसपदीषु च ॥ ५०९ ॥

मधुयष्ट्यां[1251] वारिभवो नखे शङ्खे च शैवले ॥
शीतशिवं शैलेये सिन्धुतिमिस्यां[1252] तु शीतशिवः ॥ ५१० ॥

---

1225. ॰र्यवो॰—W. 1226. दद्रेज—W. 1227. स्त्रियां—omitted—W.
1228. प्रिये—Bh. 1229. सैधवे—Bh, com. and W; but see धन्वंतरिः p. 73—" सैंधवं —सिंधुजं शिवं ।." 1230. समीषु—Bh. 1231. शिविभूर्जे—Bh. 1232. स्वाद्रि—W.
1233. कर्दंबयो—W. 1234. ॰मष्भि—W. 1235. च्छ for छ. 1236. कारवा—W.
1237. घूर्ते—Bh and W. 1238. कुमुदेंबुजे—Bh. 1239. शर्करायां—Bh.
1240. प्याम्रे—W. 1241. स्वत्थ—W. 1242. किशके—W. 1243. शताह्वा—W.
1244. शार्करा—Bh. 1245. जात्रि—Bh. 1246. दध्रि—Bh. 1247. सुसवी—W.
1248. वोषके—W. 1249. खादिरवे—W. 1250. स्रेणी-Bh; श्रेणो—W. 1251. यष्टया—W.
1252. निमिस्यां—W.

सहदेवी सर्पाक्ष्यां[1253] सहदेवा सारिवाबलयोः ॥
वर्पं । वारिसम्भवमम्भोजे[1254] श्रीखण्डे शिखरे[1255]ऽपि च ॥ ५११ ॥ वान्ताः[1256]॥

शद्विः । कुशं जलेऽस्त्रियां दर्भे[1257] निशा दार्वी[1258]हरिद्रयोः ॥
पांशू रजसि सस्यार्थविरसाश्चित[1259]गोमये ॥ ५१२ ॥

शत्रिः[1260] । कपिशा त्वतिमुक्तेऽपि कपिशः कृमि[1261]पिण्डिते ॥
कर्कशास्त्विक्षुभित्काशमर्द[1262]कम्पिल्लपिप्पले ॥ ५१३ ॥

दुःस्पर्शा[1263] तु स्वयंगुप्ता[1264]कण्टाल्यो[1265]र्ना[1266] यवासके ॥
पलाशः[1267] किंशुके[1268] शट्यां[1269] भूकेशः शीवले वटे ॥ ५१४ ॥

लोमशा तु जटामांसी काकजङ्घाबलामिदि[1270] ॥
आत्मगुप्ताहैमवतीमहामेदा[1271]मलीमसे[1272] ॥ ५१५ ॥ शान्ताः[1273] ॥

षद्विः । अक्षं सौवर्चले[1274] तुत्थे ना रुद्राक्षे विभीतके ॥
ऋक्षस्तु[1275] भल्लुके दीर्घवृन्ते[1276] च कृत[1277]वेधने ॥ ५१६ ॥

काक्षी[1278] तुवरिकागुष्ट्योः घोषः[1279] कोशातकी[1280]भिदि ॥
घोषा[1281] मिस्यां च कर्कोट्यां[1282] तुषो धान्य[1283]त्वगक्षयोः[1284] ॥ ५१७ ॥

प्लक्षस्तु पर्कटी गर्द[1285]भाण्डयोः कुञ्जरा[1286]शने ॥
विषं जलेऽस्त्रियां क्ष्वेडे स्त्री माद्यां च वृषः स्त्रियाम् ॥ ५१८ ॥

अश्वा सिंह्योर्वृषा शृङ्गीलतागुप्ताजयासु च ॥
षत्रिः । कुल्माषं काञ्जिकेनार्ध[1287]स्विन्नधान्ये यवे चणे ॥ ५१९ ॥

पेयूषमपि पीयूषं[1288] नवे क्षीरेऽपि चामृते ॥
शिरीषो मृदुपुष्पे च कृष्णपाककलेऽपि च ॥ ५२० ॥

---

1253. सर्प्पाक्ष्यां—Bh. 1254. मंभौजे—W. 1255. शिखिरे—Bh. 1256. वाताः—W. 1257. दर्भो—W. 1258. नशादार्वो—W. 1259. चित—Bh. 1260. रात्रिः—W. 1261. क्रिमि—Bh. 1262. ०मर्द—Bh and W. 1263. द्रस्पर्शा Bh. दुस्पर्शा—W. 1264. गुप्ता—W. 1265. कंटाल्ग्यो—Bh. 1266. ना—W. 1267. पलासः—W. 1268. शिशुके—W. 1269. शत्वा—W. 1270. दिभि—Bh. 1271. ०मोदा—W. 1272. मलीमशे—Bh. 1273. शाताः—W. 1274. सौवर्च्चले—Bh; सौवर्चल—W. 1275. ऋक्षु—W. 1276. वृते—W. 1277. कृते०—W. 1278. काक्षो—W. 1279. घोषं—W. 1280. घोषातकी—W. 1281. घोप—W. 1282. कर्क्कोटपां—Bh; कर्कोत्यां—W. 1283. धान्म—W. 1284. ०क्षयो—W. 1285. गर्द०—Bh; गर्भ—W. 1286. After कुंज—all the words upto गुप्ताज in the following verse are omitted and 'यासु' added to कुंज in W. 1287. नार्द्ध०—Bh and W. 1288. पीयूष—W.

षच। अलम्बुषश्छर्दता[1289] स्त्री मुण्डीर्यां[1290] च खरत्वचि ॥
ऋषभाक्षी[1291] द्रवारुण्यामृषभाक्षस्तु मुस्तके ॥ ५२१ ॥

कालमेषी समङ्गायां वाकुच्यां[1292] त्रिवृताभिदि ॥
देववृक्षः पुरे पर्णे मन्दारादौ[1293] स्नुवोद्रुमे[1294] ॥ ५२२ ॥

नन्दीवृक्षस्तु काश्मर्यां[1295] कुबेरे च प्ररोहिणि ॥
पलङ्कषा रसामुण्डीलाक्षास्त्वथ पुरे क्षुरे ॥ ५२३ ॥

किंशुके च पुमान् वीरवृक्षो भल्लातकेऽर्जुने[1296] ॥
भूतवृक्षस्तु शाखोटे श्योनाके च विभीतके[1297] ॥ ५२४ ॥

राजवृक्षस्तु शम्पाके[1298] पियाले[1299] क्षवियै प्लवे ॥ षान्ताः ॥
सद्विः। वसुवृद्धौ[1300] बुके मांसी कङ्कोलीजटयोः[1301] स्त्रियाम् ॥ ५२५ ॥

मिसिः[1302] स्त्री[1303] मधुरामांस्योः शतपुष्पाजमोदयोः ॥
मृत्सा काक्षी[1304]श्रेष्ठमृद्रो रसो सूते[1305] विषे[1306] बले ॥ ५२६ ॥

स्त्री रास्नाशल्लकी[1307]पाठा[1308]द्राक्षामूर्वामुदीषु[1309] च ॥
सत्रिः। कलसी[1310] पृष्टिपर्ण्यां[1311] स्याद्दाडिमीलेख्यपत्रयोः ॥ ५२७ ॥

पयः क्षीरे च नीरे च रजो रेणुपरागयोः ॥
वायसो वृकधूपे च पुंसि स्यादगुरुद्रुमे[1312] ॥ ५२८ ॥

काकोदुम्बरिकायां तु काकमाच्यां तु[1313] वायसी ॥
श्रीवासः सरलास्रावे[1314] पङ्कजे चाथ[1315] श्रेयसी[1316] ॥ ५२९ ॥

रास्नायां करिपिप्पल्या[1317]मभयावचयोरपि ॥
सुरसस्तु द्वयोरर्जे[1318] तुलसीरास्नयोः स्त्रियाम् ॥ ५३० ॥

सत्र। अथो घनरसः पीलुपर्ण्यां च क्षीरमोरटे[1319] ॥
हिमोपले मेघपुष्पे दक्षिणा[1320]वर्तपारदे ॥ ५३१ ॥

---

1289. रछर्द्दत—Bh; छर्दने—W. 1290. मुण्डोर्या—W. 1291. ऋषभा—न्क्षो—W; ऋषभाक्षीं—Bh. 1292. वाकुच्या—W. 1263. मंद्रारादौ—W. 1294. शुचो—W. 1595. कास्मर्या—W. 1296. र्ज्जुने—Bh; र्ज्जुने—W. 1297. विभीरके—W. 1298. संपाके—Bh. 1299. पियाल—W. 1300. वशु०—W. 1301. जरयोः—W. 1302. मिषि—W. 1303. स्त्रि--Bh. 1304. काक्षो—W. 1305. भूते—Bh. 1306. वृषे—W. 1307. सह्लकी—W. 1308. पाटा—W. 1309. मूर्वागुदीषु—W. 1310. कलसा—W. 1311. पृष्टि०—W. 1312. वगुनु—W. 1313. च—W. 1314. श्रवे—W. 1315. चाप—W. 1316. स्नेयसी—W. 1317. पोप्प०—W. 1318. रर्ज्जे—Bh; रजर्त्रा—W. 1319. मोररे—W. 1320. ०वर्त्त—Bh.

दीर्घायु[1321]स्ताम्रपुष्पायां पुंसि स्याच्चिरजीवके ॥
मधुरसा गुडामूर्वागम्भारीक्षीरिणीषु च ॥ ५३२ ॥

महारसो दीर्घपवे खर्जूरेऽपि कसेरुणि[1322] ॥
सूते मलीमसं पुष्पकासीसे सर्वतैजसे ॥ ५३३ ॥

सुमना ना करञ्जे स्त्री जात्यां भूम्नि[1323] स्त्रियां[1324] सुमे ॥ सान्ताः[1325] ॥
हवि: । व्रीहिः सामान्यधान्ये स्याच्चाशुव्रीहौ पुमान् रुहा[1326] ॥ ५३४ ॥

रोहिणी[1327]दूर्वयोर्लोहं[1328] जोङ्गके सर्वतैजसे ॥
सहा तु सहदेवायां मुद्गपर्ण्यां नखेऽपि च ॥ ५३५ ॥

कुमार्यां वनकर्पास्यां [1329] शतपत्र्यां बलाभिदि ॥
सिंहो[1330] बकुले सिंही[1331] बृहतीद्वयवृषककाकणीवङ्गे[1332] ॥ ५३६ ॥

हचि: । किणिह्यश्वखुरे मार्गे[1333] वराहः[1334] किटिमुस्तयोः ॥
वैदेही रोचनाशौण्ड्योः[1335] सुवहा शल्लकीद्रुमे ॥ ५३७ ॥

रास्नाशेफालिकागोधापद्येलापर्णिकासु च ॥
हच । महासहा माषपर्ण्याम्म्लाने वक्रकण्टके ॥ ५३८ ॥ हान्ताः ॥

प्रचुरप्रयोगवित्ता ये शब्दास्त इह कीर्तिताः[1336] प्रायः ॥
दृष्टा अप्युत्पलिनीप्रभृतिषु चान्ये परित्यक्ताः[1337] ॥ ५३९ ॥

नवग्रह[1338]तिथिप्राप्ते[1339] हायने हालभूभुजः ॥
चक्रे[1340] चातुर्भुजिः कोषं शिवदत्तः शिवाभिधम् ॥ ५४० ॥

* इति कर्पूरीयशिवदत्तकृतः शिवकोषः पूर्णः ॥

---

1321. दोर्घा०—W. 1322. कसेनुणि—W. 1323. भून्मि—W. 1324. स्त्रिया—W. 1325. सांताः—omitted by Bh. 1326. रुहौ—W. 1327. नोहिणी—W. 1328. लोह—Bh; लैहिं—W. 1329. कर्प्पास्यां—Bh. 1330. सिंही—W. 1331. सिंहो—W. 1332. 'काडोः सुवहो शल्लकोकिणी'—W. 1333. मार्गे—Bh. 1334. वराहिः—W. 1335. शौंडोः—W. 1336. कीर्त्तिताः—Bh. 1337. पष्ठुचान्ये before परित्यक्ताः—W. 1338. नवग्रहा—W. 1339. प्रीते—W. 1340. चक्रो—W.

* The Colophon in W. ends thus: इति कर्पूरोय शिवदत्तकृतः शिवकोषः ॥ समाप्तं ॥ शुभमस्तु ॥ संपूर्ण ॥ संम्वत ॥ १८ ॥ ७६ ॥ मास श्रावण कृष्ण तिथौ त्रयोदशी चंद्रवासरे लिखितं मोहनराय ब्राह्मन यद्रसं पुस्तकं दृष्टा तद्रसं लिख्यते मया सुद्धं वा मम दोसो न दीयते ॥ रामराम.

# श्रीशिवकोष-व्याख्या

मदकलितकपोलमञ्जुगुञ्जन्
मधुकर निक्वण दत्तकर्णतालः ॥
रदवलयितविघ्नचण्डशुण्डः
कलयतु मङ्गलमङ्गजो भवान्याः ॥ १ ॥

स जयति देवसोमः शिरसा प्रविभर्ति[2] यं शिवः सोमः ॥
अनवरतं विपुलसुधां किरन्करैरवति यो वसुधाम् ॥ २ ॥

विविच्य वाग्भटग्रन्थान् टीकाः कोषांश्च भूरिशः ॥
शिवदत्तः स्वकोषस्य व्याख्यामाख्यातुमीहते[3] ॥ ३ ॥

१. प्रारिप्सितग्रन्थनिर्विघ्नपरिसमाप्तये कृतं मङ्गलं शिष्यशिक्षार्थमुपनिबध्नाति[4]। वन्दामह इति। हे भारति करुणापरायाः भवत्याः तं कृपाकटाक्षं वयं वन्दामहे। तं कं। यतः यस्मात् व्यस्तसमस्तवस्तु जगत् स्वहस्तविन्यस्तमिव आभाति। अत्र स्वहस्तेन स्वहस्ते वा विन्यस्तमिति तत्पुरुषः। अत्र च ग्रन्थकर्तुर्भारतीविषया प्रीतिरभिव्यज्यते इति भावध्वनिः। तदुक्तं 'रतिर्देवादि[5]विषयाऽव्यभिचारी तथाञ्जितः भावः[6] प्रोक्त' इति ॥ १ ॥ [ *Folio 1 b* ].

२–३. इह सप्रयोजनमभिधेयमाह—शब्दार्णवेत्यादि—विविधानि यानि औषधनामानि तत्र संदिहानस्य भिषजः प्रीत्यै सन्देहनिवृत्तेः[7] शब्दार्णवादीन् कोषान् विविच्य शब्दार्णवादिकोषतात्पर्यं ज्ञात्वा लिङ्गभेदेन सह नानार्थौषधकोषः विरच्यते। कोषः—सङ्ग्रहः। उपोद्घातसङ्गत्यादि[8]।

४. त्रिष्विति। निषिद्धलिङ्गमिति। निषिद्धात् लिङ्गात् शेषे लिङ्गे बोधनीयत्वेनोद्देश्ये सति लिङ्गनिषेधोऽत्र बोध्यः[9] इति निष्कृष्टोऽर्थः[10]। त्वन्तेति। त्वन्तं अथादि च न पूर्वं भजतः। स्वार्थे कन्[11]। [ *2 a* ].

५. नानार्थेत्यादि स्पष्टम्।

---

१. गुञ्ज×. २. विभर्ति. ३. ०मीहरे-रे changed into ते by a later scribe. ४. बध्नाति. ५. देवादि०. ६. भाव. ७. निवृत्ते। ८. संगत्यादि. ९. बोध०. १०. षोध्य. ११. 'राम' written after 4 in the remaining space of folio 2a.

६. प्रागिति—पूर्वेणान्वयशङ्कानिरासार्थमेतत्। द्वयोः द्वन्द्वेन एकता—एकपदत्वं च न कृतं एकार्थत्वशङ्कानिरासाय[१२] द्वयोरित्युक्तेर्बहूनां[१३] द्वन्द्वेऽपि न क्षतिः। शब्दावृत्ति[१४]रिति—लिङ्गैक्ये[१५] शब्दावृत्तिर्न कृता सकृदुपात्तस्यैवेतरान्वययोग्यत्वात्। सप्तमीति। न विशेषणे इति-स्वतन्त्रार्थत्वभ्रमनिरासायेति भावः[१६]।

७. लिङ्गमिति—रूपात् पुंस्त्वाद्यभिव्यञ्जकशब्दसंनिवेश[१७]विशेषात् प्रकटमपि लिङ्गं लिपिभेदकृतभ्रांतिनिवारणाय स्त्रियामित्यादिशब्दैः पुनरिहोच्यते वक्ष्यते। वर्तमान[१८]सामीप्ये इति भविष्यति लृट्[१९]। [ 2 b ].

८. एकेति—स्वराश्च कादयश्च ते च ते काद्यन्ताश्च तादृशशब्दानां ये वर्गाः समुदायास्तैः नानार्थसङ्ग्रहः एकद्वित्रिचतुः[२०]पञ्चषट्वर्णानुक्रमात्कृतः।

९. कैकः। क इति। चित्रको—वह्निसंज्ञकः वह्निपर्यायनामक इत्यर्थः[२१]। ' चित्रको गुल्मकः साग्रवृन्त[२२]पत्रस्त्रिधा सुमैः। सितपीतारुणैः कृष्णैः पुष्पैरेष गुणोत्तर ' इति। सूर्याह्वोऽर्कः[२३]। ' श्वेतो वृकः[२४] क्षेत्रेषु सिद्धकः। तृणकः काष्ठगर्भश्च भेदः श्वेतार्कयोः[२५] सुमैः॥ सुगन्धिपुष्पश्चान्योऽर्कः[२६]' इति। वालकं-ह्रीवेरं। 'वालकं वारि तोयं च ह्रीवेरं जलनामक' मिति सिद्धौ चाम्बुदवालकाविति[२७]। ' को ब्रह्मणि[२८] समीरात्मयमदक्षेषु भास्करे। मयूरेऽग्नौ च पुंसि स्यात् सुखशीर्ष[२९]जलेषु क 'मिति **मेदिनी**। ' को विधातरि वायौ च सूर्ये सूर्याह्वयेऽपि च। वैश्वानरेऽग्निसंज्ञे सर्वना-[ 3 a ]म्नि शिखिन्यपि। शीर्षे सुखे जले केशनाम्नि चापि नपुंसक ' मिति **शब्दार्णवः**। कद्विः[३०]। काकेति। काकजङ्घा—सुलोमशा। ' काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा। पारावतपदी दासी काका लोके तु सा " मसी " 'ति। ' काका स्यात्काकनासायां काकोलीकाकजङ्घयोः। रक्तिकायां मलय्यां च काकमाच्यां च कीर्तिते' ति **विश्वः**। " का को ओं गो " इति लोके। काकोली—वीरा। ' मण्डुरा जीवनीया च वीरा धीरा च सा स्मृते'ति **धन्वन्तरिः**। ' अथ काकोलिका नृपे रविपत्रपयोन्विता। कान्देन्यकाष्ठा मधुरा व्यावल्ली क्षीरिणी स्थिरा। कन्दिन्यौ[३१] मधुरा पूर्वा गुल्मकोऽन्या

---

१२. निराशाय. १३. वेहूनां. १४. व्रति. १५. लिंगे०. १६. भाव. १७. शान्निवेश. १८. वर्त्त०. १९. लट. २०. चतु. २१. इत्त्यर्थः. २२. व्रत. २३. ऽर्कं—bar instead of visarga. २४. M. W.—has वृक—P. 955 ( Ed. 1872 ). २५. श्वेतार्कयोः २६. ऽर्क very often double क is written like this. २७. ०बुद. २८. व्रह्मणि. २९. सुष० ३०. कद्वि ३१. कन्दिन्य.

अथोदिते'ति । भावमिश्रस्तु–' यथा स्यात् क्षीरकाकोली काकोल्यपि तथा भवेत् । एषा किञ्चिद्भवेत्कृष्णा मेदोऽयमुभयोरपी'ति । काकनासा–चोरस्नायुः । 'काकास्यसस्या काकाङ्गी चोरस्नायुः शिरोबेला[३२] । काकनासा च लोके तु "कौ वा टों टी" ति[३३] विश्रुता' ।

१०. काष्ठोदुंबरिका[३४]–मलयू । 'वटसंकीर्णदीर्घातिकर्कशच्छदनाफलैः । सोदुम्बरैः खरैः क्षीरिण्यपगा कोटरे द्रुम' इति । 'काकमाची–ध्वांक्षमाची काकाह्वा चैव वायसी । रसायनी च लोके तु "तुम कोई" ति[३५] विश्रुता' । रक्तिका–गुञ्जा । 'गुञ्जायां काकचिञ्चिका' । 'ताम्रा च रक्तिका काका मण्डिका सा सिता यदि । चक्रिका दुर्मुखा चूडा सैवोक्ता काकपीलुके' ति सिंहः । [3 b]. टङ्क[३६]–इति । टङ्कणो–धातुद्रावी 'क्षारः स्वाभाविको भूस्यो महचण्डीशाकेशय'मिति । नीलकपित्थो–मन्मथावासः आम्रातभेदः । तथा च राजनिघण्टुः[३७]– 'अन्यो महाराजचूतो महाराजाम्रकस्तथा । स्थूलाम्रो मन्मथावासष्टङ्को नीलकपित्थक' इति । अमरमालायां–' कपित्थः पवर्गतृतीयमध्योऽपि । आम्रातपादपो बिम्बयवोदरफलोऽम्लकः । जम्बीरकन्दे[३९]–"लों ग्वा डा–" नाम ख्यातो हिमालय' इति । अथ त्रिक–इति । क्षुरो-गोक्षुरः । 'गोक्षरूर्गोक्षुरः क्षुर' इति कैयदेवः । 'त्रिकण्टस्त्रिकटस्त्रिक' इति च । 'एकस्त्रिकण्टस्तृणकः पङ्क्तिपत्रः प्रसिद्धकः । वल्लिका पीतकुसुमा भूमिगाऽन्यो महानथ । वृन्तारिपत्रो विटपस्तत्सच्छाँयसमित्सुमः[४०] । वृन्तं फलं चतुःकण्टमयभाभ्यां गुणोत्तरः । शर्कराश्मरिमेहेषु कृच्छ्रेऽन्यासु तदर्त्तिषु । रसायनप्रयोगे च 'महानेष गुणोत्तर' इति । 'शृङ्गाटके गोक्षुरे च त्रिकः क्लीबं[४१] त्रिकत्रयं[४२]' इत्यभिधानचूडामणिः ।

११. शृङ्गाटकः–प्रसिद्धः "सि घा डा" इति लोके । 'शृङ्गाटवल्ल्यगाघाम्बुस्थासारिघनपत्रिणी[४३] । फलं शृङ्गाटकं सिद्धं द्विकण्ट इति कल्कल' मिति । त्रिकत्रयं । विभीतकामलकहरीतक्य एकं । शुण्ठीमरिचपिपल्यो द्वितीयं । त्वक्पत्रे चेति तृतीयम् ॥ १० ॥[४४] [4 a]. वक्रो वुंके[४५]–इति । वङ्गसेनोऽगस्तिः । 'श्वेतपीतनीललोहित[४६]-

३२. वला. ३३. ति—Written in the margin by a later scribe. ३४. ०ढुंव०. ३५. इति–इ dropped for metrical purposes. ३६. टक—in the Comm. but टंक in the text. ३७. निघंटु. ३८. विंव. ३९. जंवीरकद०. ४०. छाय. ४१. क्लीवं. ४२. त्रिय. ४३. ०गाधांबु०. ४४. In the empty space is written रामाय नमः. ४५. वक्रोचु (?) क. ४६. सेत.

कुसुमविशेषाच्चतुर्विधोऽगस्ति'रिति **राजनिघण्टुः** । 'सिद्धोऽगस्त्यः पङ्क्तिपत्रो मृदुः शम्बी[47] महीरुहः । अगस्त्यस्योदयं यावत्सपुष्पः स तु दृश्यत' इति । "अ ग थि या" इति लोके । एरण्डः–पञ्चाङ्गुलः । 'सिद्ध एरण्डको विष्वक् रक्त-पीतसितासिताः । ते नैके कुसुमैः सस्यैर्मृदुकण्टैस्त्रिबीजिभिः । पर्यग्रच्छदनैरेकवृन्तैः श्वभ्रसमिद्युतै' रिति । वसू–रक्तार्कः । 'शिवमल्ली पाशुपत एकाष्ठीलो वको वसु' रित्यमरः । 'वृकश्च वसुको वृकः' इति द्वितीयवर्गे **हृदयदीपकः** । 'वको वुको नागकर्णे तथाऽगस्त्यार्कपर्णयोरि' त्यजयः । [ *4. b* ].

१२. शाक–इति । हरितो–मूलकादिशिग्रुः । 'मूलपत्रकरीराग्रफलकाण्डाधि-रूढकं । त्वक् पुष्पं कवकं चैव शाकं दशविधं स्मृत' मिति । मूलं मूलकादेः । पत्रं निम्बादेः । करीरं वंशाङ्कुरं । अग्रं वेत्रादेः । फलं कूष्माण्डादेः । काण्डं उत्पलादीनां नाडी । अधिरूढं तालबीजाङ्कुरास्थिमज्जा । त्वक् मातुलुङ्गादेः । पुष्पं तिन्तिडीकोवि-दारादेः । कवकं छत्रिकाः । द्रेष्का–अक्षिपीलुकः । 'रोमको रम्यको द्रेष्का शाकः शालोऽक्षिपीलुक' इति **निघण्टुः** । "व का" इति लोके । खरच्छदो–भूमिसहः । 'स च खरमसृणपत्रसृष्टोदर' इति **डल्लणः** । 'विस्तीर्णखरपत्रोच्चः शाकः प्रायः स भूभृती' ति । "सा गो न" इति लोके ख्यातः । शुक–इति । शिरीषो–मृदुपुष्पः । 'शिरीषो[55] मृदुपुष्पश्च भण्डीरः शङ्खिनीफलः । कपीतनः शुकतरुः श्यामवर्णः शुकप्रिय' इति **धन्वन्तरिः** । 'शिरीषतरुरानीलपङ्क्तिपत्रोऽस्य शम्बकाः[56] । तन्वायता विस्तृताश्च बीजं[57] वन्चूलवद्दृढ'मिति । "सि रि स" इति लोके । स्थौणेयः–शुकच्छदः[58] । 'स्थौणेयकं बर्हिचूडं[59] शुकवर्णं शुकच्छद'मिति **निघण्टुः**[60] । 'वल्ली स्थौणेयकोऽसितं पुष्पफलं सबिम्बं[61] च सुगन्ध्यङ्गानि [ *5 a* ] सर्वेश' इति । टिण्टुररलुः । 'भल्लूकाष्टिण्टुकोऽरलु' रिति **केयदेवः** । 'निम्बादभ्रमलो[62] विष्वग् भल्लूकः पङ्क्तिपत्रकः । प्रसिद्धो भङ्गुरो सारो "र लु को" देशभाषये'ति । 'टिण्टुकः पादपो दभ्रतिन्दुकाभदलो गिरौ । प्रसिद्धो फलपुष्पोणुरिति भेदे महत्यपि । रसादिसाम्यात्[63]द्विबुधैरभेदः[64] परिकल्पित' इति । पूगः–क्रमुकः । 'तृणध्वजः पूगवृक्षो निःशाखो बहुपर्वकः । फलं सवल्कं अण्डकाभं तद्धि पश्चाद् द्विवल्कल' मिति ।

---

४७. शंबी. ४८. मृदु. ४९. रोकवृतैः ५०. रक्तार्क्कः. ५१. ०स्त्यार्क्क०. ५२. ०वा. ५३. वशांकुरं. ५४. वीजां०. ५५. शीरी०. ५६. ०वकाः ५७. वीजं. ५८. छदः. ५९. वर्हि०. ६०. निर्घंटुः. ६१. सविंवं. ६२. निंवा० ६३. साम्या०. ६४. ०बुधैदभेदः ६५. अ is omitted.

१३. स्पृक्कापृक्के[६६]ति। माल्य[६७]वती—मोहना। 'मुनिर्माल्यवती माला मोहना कुटिला लते ' ति वाचस्[६८]पतिः। 'स्पृक्का वल्ली स्थिरा तिक्ता सुगन्धिः कोलसम्फला। अरिपत्रा दाक्षिणात्या सिद्धा लोके तु "पा न री" '। लज्जा—अञ्जलिकारिका। 'रक्तपादा शमीपत्रा समङ्गाञ्जलिकारिका। नमस्कारी गन्धकारी स्पृक्कौ[६९] खदिरिकारुणे 'ति **निघण्टुः**। 'शुष्के सरसि रक्ताङ्घ्रिस्तृणकारुणपत्रिका। प्रसिद्धाऽन्या सिता छन्नदलाग्निभयरुच्छ्वसे ' ति। "ल ज्जा लू" इति लोके ख्याता। [5b]. कत्रिः[७०]। अशोक—इति। वञ्जुलः-कङ्केल्लिः। 'अशोके कङ्केल्लिवञ्जुला' विति **हैमः**। 'अशोकपादपो वृन्ताग्न्यरिपत्रो मृदुः पृथुः। भृशारुणं सुगन्ध्यस्य पुष्पवाटं स्थिरं कटु। फलं कषायमधुरं युग्मं चैकं पलार्धक 'मिति। मानद्रुमः—शाल्मली। 'असारः शाल्मलिकुटो द्विधा स्थूलाणुकण्टकैः। पञ्चषट्वर्णिपर्णोऽत्र वाटस्थूलसुमः फलं। सतूलं फल्गु चैतस्य रसो मोचा रसाभिध ' इति। 'शाल्मली पिच्छि[७१]ता मोचा कुक्कुटी स्थिरजीविका। मानद्रुमो मानतरु 'रिति **कैयदेवः**। पारदो—रसेन्द्रः। 'पारदश्चपलः श्वेतस्तरस्वी द्रुतरूप्यवत्। स्वर्णलेपे विधेये यो न तत्र विकृतिं भजे'दिति। 'रसेन्द्रः पारदः सूतो हरज ' इति **धन्वन्तरिः**।

१४. कटुरोहिणी—'मत्स्यपित्तारोहिण्यौ दाडिमच्छे[७२]दे। सितारुण[७३]सुमे सस्य[७४]जाङ्गले काष्टकन्दिके ' इति। 'रोहिणी कटुरोहिणी। मत्स्यपित्ता कृष्णभेदी चक्राङ्गी शकुलादनी '**त्यमरः**। 'अशोको वञ्जुले मानद्रुमनिःशोकयोर्मतः। अशोका कटु-रोहिण्यामशोकं पारदे स्मृत 'मिति **विश्वः**। [6a]. अम्लकमिति। अम्लवेतसो—रसाम्लः। 'रसाम्लो वेतसाम्लश्चाप्यम्लकश्चाम्लवेतस ' इ**त्यजयः**। 'रसाम्लश्चाम्ल-विदुलो वेतसाम्लोऽम्लवेतस ' इति **हृदयदीपकः**। 'लुङ्गद्रवं च जम्बीरं[७५] नारङ्गं लकुचं तथा। वृत्तवृन्तोपपत्राश्च दीर्घकण्टकपादपाः। अल्पान्तरा मिथः[७६] संज्ञा कृतैषां कण्टकेसरा ' इति। चिञ्चा—तिन्तिडिका। 'तिन्तिडी त्वम्लिका चिञ्चा तिन्तिडीका कपिप्रिये 'ति **वाचस्पतिः**। 'चिञ्चातरुर्वक्रफलः पङ्क्तिसूक्ष्मच्छदस्तथे 'ति। अम्लिकाकन्दः। 'अम्लिका स्वल्पविटपा सुकुमाराम्लनालिका। प्रायेण कामरूपादौ तत्कन्दश्चार्शसेदित ' इति **वाप्यचन्द्रः**। चाङ्गेरी—अम्लपत्रा। 'लोण्ढा लोणा चतुःपर्णी सैव दन्तशठाम्लिका। चाङ्गेरी चुक्रिका चाम्ला सुनिषण्ण[७७]कपत्रिके 'ति **निघण्टुः**। तिन्तिडी—वृक्षाम्लं। 'अथ

६६. एकके० ६७. माल्या०. ६८. ०स्वर्ति. ६९. मुक्का. ७०. कत्रि. ७१. पिछि०. ७२. छदे. ७३. सुसे. ७४. सास्म (?) ७५. जंवीर. ७६. मिथ. ७७. सुनिषणक.

पादपः तिन्तिडीकः ( फलं तस्य ) चिञ्चार्धे[७८] दाडिमीदलः । दलं कषायमम्लं च फलं तद्रसशोषकं । फलानि चास्य शुष्काणि तिन्तिडीकमुदाहृतं । उदीच्यां तत्सिद्धतरं शुष्कं मङ्गल्यकाकृती[७९]'ति । " डा स र या " इति लोके । [ 6 b ].

१५. आढकीति । शिम्बि[८०]धान्यभिदत्र तुवरी । मृद्भिर्त्[८१]-काक्षी ' । ' आढकी तुवरी काक्षी सुर्जाता[८२] हेमशोधिनी 'ति **केयदेवः** । ' सौराष्ट्रीभूमिजः पांशुक्षार ' इति । आर्द्रकमिति । शृङ्गवेरं-कटुभद्रं । ' आर्द्रकं शृङ्गवेरं च कटुभद्रं प्रदीपक'**मित्यशोकमल्लः** । ' प्रसिद्धमार्द्रकं शुष्कं नागरप्राग्भवं शुभ'मिति । वितुन्नकं[८३]मल्लुका । ' धनिका धानिका धान्यं धानी धाना वितुन्नकं । धानेयं धान्यका छत्रा हृद्यगन्धा च वेषणा । आर्द्रा-र्द्रिकाल्लुका 'चे ति **निघण्टुः** । ' आर्द्रिकार्द्रककुल्माषसक्तु[८४]मांसादिगर्भिणी'ति **वाग्भटः** ।

१६. इक्ष्वाकुरिति । कटुतुम्बी-तिक्तरसा तुम्बी । ' लम्बे[८५]क्ष्वाकुस्तुम्ब्येलबुदुग्धि-नीका च दुग्धिके 'ति **हृदयदीपकः** । ' तिक्ततुम्बी तु वल्ल्येव सिद्धा स्वादुश्च तद्वि[८६]धे 'ति । मुञ्जः—शरत्वक् ब्रह्म[८७]मेखलाभिधानः प्रसिद्धः । 'मुञ्जःक्षुरःस्थूलदर्भो बाणाह्वो ब्रह्ममेखले 'ति **मदनविनोदः** । राजादनो—दृढस्कन्दः । ' राजादनतरुः क्षीरी बाल-बिम्बफलं मधु । पक्वं पीतं कृष्णबीजं विशेषाद्वानरप्रिय'मिति । ' राजातन ' इति च । " खि र णी " इति लोके । [ 7 a ]. कनक--इति । चम्पकः-गन्धफली । ' हेमपुष्पो गन्धफली चम्पक'श्चेति **हैमः** । अथ चम्पकः—'पादपो गौरचूतभि[८८]र्बृहन्मृदुफलः सुमं । पीतारुणं द्विधा बाढ'मिति । धूर्तो—धत्तूरः । 'धत्तूरः सितमध्यैस्तु सितपीता[८९]रुणैस्सुमैः । सिद्धः पाकस्फुटद्वृक्षैः फलैरकटुकण्टकै'रिति । 'कालीयकं—पीतकाष्ठं चन्दनाष्टकमध्यगं । सर्वे द्रुमाश्चम्पकाभपत्रास्तेषु द्वयं पुनः । पतं[९०]गो रक्तसंज्ञश्च इयं रोहितकं[९१]च्छदं । मुख्यं त्रिचन्दनं तद्धि फलपुष्पविवर्जित' मिति । नागकेसरः-करिकेसरः । अथ केसरः । 'प्रतानीपादपः स्वल्पार्धा[९२]ङ्गुलीच्छदनः सुमैः । पीतकैश्च सुगन्धिः स्यात् सारत्वक्पत्रकेसरैः । तस्य त्वक्[९३] चोचं । " त ज " इति लोके । पत्राणि तमालः । केसरो नागकेसरः । सारस्त्वनुपयोगित्वा[९४]न्नोक्तः ।

---

७८. चिंचार्द्धे. ७९. काकती० ८०. शिंबि. ८१. मृद्भिद०. ८२. सुजातो; for सुजाता see M. W. p. 1119. ८३. वितुन्नक. ८४. सुक्त. ८५. Substituted ब for व. ८६. तद्विधति. ८७. ०चूताभृ. ८८. सुमंपीता० ८९. पीत. ९०. पत्तंगो. ९१. छदं. ९२. ०द्धांगुली. ९३. त्वक ९४. ०योगीत्वा०.

१७. किंशुकः–पलाशः। 'पलाशपादपः सिद्धस्त्रिदलः शिशिरक्षये[95]। कृष्ण-वृन्तो ज्वलद्रक्तपुष्पः शिरीषवदि'ति। काञ्चनारः–कोविदारः। 'अस्मन्तः पादपः शॅम्बी युग्मपत्रोऽणुपुष्पकः। कषायमधुरो नूपो[97] कोविदारोऽपि तादृशः। किञ्चिन्महान्महारक्त-पुष्पः शॅम्बी कषायक' इति। 'कोविदारोऽथ कुन्दॅलः कुण्डली कुली। ताम्रपुष्पश्च-मरिको महायमलपत्रक' इति निघण्टुः। [7b]. क्रमुक इति। श्लेष्मदारु–तूदं। 'तूॅदंतूलं श्लेष्मनिष्ठं क्रमुकं श्लेष्मकाष्ठक'मिति केयदेवः। 'तूदो महीरुहः सारिसाग्रपत्रः प्रसिद्धकः। सिन्दूरी सदलोबीजोङ्गुलीसमफलो मधु'रिति। "तूंत[101]" इति लोके। ताॅम्बूलं–नागवल्लीदलं। 'ताम्बूॅलवल्ली सिद्धैव सौराष्ट्रमगधादिषु। किञ्चिदुन्नतभूभाग-विपुलोटजमध्यमा। स्थिरोर्ध्वगा प्रतनुका फलपुॅष्पैविवर्जिते'ति। 'क्रमुको भद्रमुस्तेऽपी' ति त्रिकाण्डशेषः। 'मुस्तमॅम्बुॅधरो नूपे तृणकन्दकसेरुवदि'ति। गूवाकः-पूगः। 'पूगे क्रमुकगूवाकौ तॅथोद्वेगं पुनः फल'मिति हैमः। पूगे क्लीबमपि[104]। 'क्रमुकं केञ्चुकं पूगं चिक्का घोण्टाफलं तथे'ति[105] बोपदेवः। 'खॅर्जूरी नालिकेरी च तालॅवतपूगकाः। अशाखोच्चा दृढदलाः संज्ञा तेषां तृणध्वजाः। विष्वक्प्रसिद्धाश्चे'ति। रोध्रभित्–शॅबॅरदेशजः श्वेतरोध्रः। 'तिरीटस्तिल्वको रोध्रश्चॅान्यॅः शॅबॅरदेशजः। श्वेतरोध्रः शॅाबॅरोक्षिभैषज्यं शॅबॅरोद्भवमि'ति हृदयदीपकः। 'शैले महीरुहो रोध्रो वटदीर्घदलः सितः। क्षीरी कषायो हेमन्ताद्यासः श्वेततरैः सुमैः। सॅशॅम्बो बल्कमेतस्य सोपयोगी-तरन्नत्वि'ति। 'वयनी–कॅार्पासिका च शणपुष्पी'ति हृदयदीपकः। [ 8 a ].

१८. कटुकेति। राजिका–आसुरी। तुॅम्ब्यलाबू उभे समे। करञ्जी–अङ्गारवल्ली। 'करञ्जभेदे कटका मर्कट्यङ्गारवल्लिके'ति रभसः। अथ करञ्जः। 'सिद्धोॅग्रॅगन्धो भूर्जॅत्वॅक् प्लक्षपत्रोऽल्पशॅम्बॅक'इति। रोहिणी–कटुरोहिणी। कङ्कोलकं–कङ्कोलीफलं[113]। 'कङ्कोलकं कटुफलं मारीचं माधवोषितं। उलं बॅहुॅफलं कोलं कटुकं कटुकाफलमि'ति। 'कङ्कोली[114] वल्लिका वाटपत्रा मरिचसंफले'ति। व्योषं–शुण्ठी। मरिचपिप्पलीसमुदाय-स्येयं संज्ञा। त्रपुषं–त्रपुषीफलं। 'त्रपुषी चिर्भटं चैव कालिङ्गैर्वारुपुंस्फली। तिण्ठिसी[115]

---

९५. शिरक्षये. ९६. ब substituted for व. ९७. नूपे. ९८. कुदाल. ९९. निघंटु. १००. तंतू. १०१. नूंत. १०२. तांबूली. १०३. विवर्ज्जितेति. १०४. ब substituted for व. १०५. खर्ज्जूरी. १०६. शवरदेजः १०७. श्चान्य. १०८. शवरो०. १०९. कार्पा०. ११०. ब for व. १११. सिद्धो०. ११२. भूर्ज०. ११३. कोलीफलं. ११४. कंकाली. ११५. तिंठिसी.

शीर्णवृन्ती[११६] च मायालीत्यष्टवल्लिकाः । प्रसिद्धा सर्वदेशेषु लक्षणैर्नामभिः सहे'ति । सर्षपः—सरिषपः । 'रक्षोघ्नः सर्षपश्चाम्यः सिद्धार्थः श्वेतसर्षप' इति **हृदयदीपकः** । 'कटुका रोहिणी लम्बा[११७] करञ्जा राजिकासु च । कटुकं व्योषकङ्कोलत्रपुषेषु पुमान्कटावि' ति **लोचनः** । कटु—सर्षपः । [8 b].

१९. कण्टक इति । कोरकः— इङ्गुदः । 'इङ्गुदः[११७] कोरको वृक्षः । कण्टकस्तापसद्रुम' इति **धर्मिष्ठः**[११८] । 'इङ्गुदी दीर्घकण्टका । सिताङ्गुलिदला दारु पलसस्य[११९] महीरुहः[१२०] । दुष्कल्यपत्रे'ति । "हागोट" इति लोके । वेणुर्वंशः । पद्मबीजं—पद्माक्षं । 'पद्मबीजं[१०४] तु पद्माक्षं कलोड्यं पद्मकण्टकमि'ति **देवलः** । 'पद्मं शरदि[१२१] दृश्यत' इति च । 'पद्मबीजं[१०४] तु पद्माक्षं कलोड्यं पद्मकर्कटी । नलको भेडनापाकौ बिम्बोष्ठं[१०४] कण्टकं मतमि'ति **केयदेवः** । शाल्मली—स्थूलकण्टका । 'शाल्मली पिच्छिरो[१२२] मोचा कण्टकाख्या सुरूपिणी'ति **केयदेवः** । कच्छुरा—यासः । 'यासो यवासो दुःस्पर्शः[१२३] कच्छुरा ताम्रमूलिके'ति **केयदेवः** । करक इति । सारो—दाडिमी । 'दाडिमो दाडिमी सारः कुट्टिमः फलशाडवः[१२४] । मधुराम्लो रक्तबीजो[१२५] दन्तबीजः[१२५] शुकप्रियः । करको रक्तकुसुमः सारः[१२६] स्याच्चालेमर्कट[१२७]' इति **केयदेवः** । 'द्विदाडिमं[१२८] तु मध्वस्तं तुल्याकारं प्रसिद्धकमि'ति । लट्वा—कुसुम्भ इति **हृदयदीपके** द्विनामवर्गः । 'कुसुम्भपावकंपीतमलक्तं वस्त्ररञ्जनं । पद्मोत्तरा तु करटा लट्वा रक्तं च रोहितमि'ति **केयदेवः** । [9 a].

२०. कणिकेति । अरणिरग्निमन्थः । 'अग्निमन्थोऽरणिः केतुस्तर्कारी[१२९] वैजयन्तिके'ति **निघण्टुः** । 'दुर्गे धारणिका[१३०] श्वेतःश्वभ्रकं चानुजातिभिः । सुमैः सारिदला चे'ति । सुमनो—गोधूमस्तस्यचूर्णं क्षोदः । 'गोधूमको यवनकः सुमनश्चमटो मत'इति **केयदेवः**[१३१] । कर्णिक इति । तालो—ध्वजवृक्षः । 'तालः सिध्दो विशाखोचः प्रस्थंकूर्च[१३२]फलोऽसितः' । कोकिलाक्ष[१३३] इति—क्षुरः । 'कोकिलाक्षे क्षुरक्षुरा 'इत्यमरः । 'अथेक्षुरो ग्रन्थ्यभिकण्टकः । तृणकोऽर्धाङ्गुलिदलः[१३४] कर्कशः कृष्णकः[१३५] स्थिर'इति । तरणी—'शतपत्री तरण्युक्ता कर्णिका चारुकेसरा । सहा कुमारी गन्धाढ्या नीलालिकुलसङ्कुले'ति **निघण्टुः** । वक्रकण्टका शतपत्रिका पङ्क्तिपत्रा चेति । मल्ली—शीतभीरुः ।

---

११६. शार्णवृत्ती. ११७. इगुद—Visarga dropped. ११८. धर्म्मि०. ११९. पलसस्या? १२०. महीरुत-ह? १२१. सरदि. १२२. पिछिरा. १२३. दु० १२४. ०शाडव: Raj. p. 422; in the Comm. खाडवः १२५. ब for व. १२६. सार. १२७. च्चा (?) ल (?) मर्कट०. १२८. द्विदाडिम. १२९. तक्कारी. १३०. श्वेत. १३१. ध्यदेवः १३२. कूर्च०. १३३. क्षुरः १३४. तृणकोंद्वांगुदि. १३५. कृष्णकौ.

' मल्लिका वाटकुसुमा वसन्तै:[१३६] त्रिषु सा त्रिधा[१३७] । महापुष्पाणुपुष्पा च दीर्घपुष्पाच तुल्यका: । गन्धेनाल्पान्तरा ' इति । सिंहस्तु—' मवयन्ती[१३८] गवाक्षी स्यादुटजं भद्रमल्लिका । मुद्गर:स्याद्विचिकिलो यो भवेदष्टपत्रक: । सुगन्धा धौतिका तैलभाविनी नवमालिका । सप्तला सुकुमारा च सुरभि: सूचिमल्लिके'ति । पद्मगर्भो—[१३९]बीजकोष: । '[१३९]बीजकोषो वराटक: कर्णिके'ति हैम: । [ 9 *b* ].

२१. कामुक—इति । रम्यको—द्रेष्का । 'रोमको रम्यको द्रेष्का निम्बको[१३९] विषमुष्टिक: । कामुको मालक: क्षीर: शाक: शालोऽक्षिपीलुक' इति केयदेव:[१४०] । अशोको—वीतशोक: । 'अशोको वीतशोकश्च कामुको वञ्जुलस्तथे'ति सिंह: । अतिमुक्तो—माधवी । 'कामुक: सुवैसन्त:[१४१] स्यान्माधवी त्वतिमुक्तक'इति केयदेव:[१४२] । 'माधवी चम्पकदला तिलपुष्पा[१४३] महालता । स्थिरोर्ध्वगा[१४४] गुच्छपुष्पा[१४५] सिद्धवृन्दा वनावि[१४६]'ति । चम्पको—हेमपुष्पक: । किम्पाक इति । परिव्याधो—द्रुमोत्पल: । 'किम्पाको राजवृक्षश्च परिव्याधो द्रुमोत्पल 'इति धर्मिष्ठ:[१४७] । 'किम्पाक: स्यान्महाकाल' इति हलायुध: । सम्यक् पाको[१४८]ऽस्येति सम्पाक: । शं कल्याणं पाकोऽस्येति शम्पाक: । स्वामी तु ' शमीशिम्बिमकतीति ' विगृह्णन् शम्पाकमित्याह । ' अग्रपत्रो महाशिम्बी[१४९] विटपी राजवृक्षक ' इति । वारुणीफलं—इन्द्रवारुणीफलं । ' ऐन्द्री विशाला च समे वल्ल्यौ स्वल्पमहाफले । तिक्ते वने स्थिर' इति ।

२२. अथ किंशुक इति । पलाशो ब्रह्मवृक्ष:[१४९] । नन्दीवृक्ष:—प्ररोही । अधोमुखपत्रशाक: वनस्पति: । पिप्पलभेद: । ' नन्दीवृक्षोऽश्वत्थभेद: प्ररोही राजपादप ' इति भावमिश्र: । "पारसपीपर" इति लोके । पीततैला—ज्योतिष्मती । ' वल्ली तेजोवती समा । ज्योतिष्मत्या: स्थिरा सा तु सिद्धा वीरुद्गुणा बहुरि'ति । ' किंशुकश्च शुकश्चापि स्मृततालव्यदन्त्ययो रि'ति द्विरूपकोष: । [ *10 a* ]. कुशिक—इति । अक्षो—विभीतक: । ' अथ त्रिषु विभीतकी । तुषवासन्तसंवर्त[१५०] कर्कोक्ष[१५१]तिनपुष्पका ' इति सिंह: । ' अथो द्रुम: । मधूकबहेलै[१५२] रूक्षै: फलं तस्य विभीतकमि'ति । रक्तं—प्राचीनामलकं । ' प्राचीनामलकं रक्तं बदरामलकं[१५२] च तत् । प्राचीनागरमप्येतदि'ति सिंह: । ' प्राचीनामलकं रुच्यमुष्णं गुरुगरापहं । वातघ्नं पित्तकफकृत् पक्वं तु त्वरपीलुवदि'ति

---

१३६. वसंत. १३७. त्रिधाम—म in addition. १३८. मवृयंती. १३९. ब for व. १४०. कय०. १४१. सुवसंत. १४२. कय०. १४३. तिल०. १४४. ०र्द्धगा. १४५. गुछ०. १४६. वनावना०. १४७. धर्म्मिष्टः १४८. ऽाको०–avagraha misplaced. १४९. ब for व. १५०. संवर्त्त १५१ कर्कों० १५२. ब for व.

केयदेवः[१५३] । '[१५४]सेर्जः शालः प्रांशुः शालं सर्जं च सूरय' इति हलायुधः । 'न्यग्रोधशालाक्षोटकदेवदारुधवादयः । चिरायुषो महास्कन्धाः शतहस्तोत्तरोचगा' इति । 'तत्र सिद्धः सारदारुर्दीर्घपत्रोऽणुपुष्पक' इति च । [१५५]दीर्घपत्रोऽरण्यः । 'अश्वकर्णस्तथारण्यः सस्यसंवरणोऽपि च । दीर्घपत्रो दीर्घवृक्षःकुशिकश्चीरिपत्रक' इति केयदेवः[१५६] । '"शां खु" इति लोके' इति भावमिश्रः ।

२३. कुलकमिति । पटोलं—राजीफलं । 'स्वादुतिक्ते पटोल्यौ तु वल्ल्यौ दुर्गन्धपत्रके । मृदुके लोमशे श्वेतराजिमद्यवमध्यके[१५७] बिम्बानूकं फलमि'ति । काकतिन्दुकः—कपीलुः । 'कुपीलुः[१५८] कुलकः काकतिन्दुकः काकपीलुकः । काकेन्दुर्विषतिन्दुश्च[१५९] लोके तु "कुचिला[१६०]"भिधः । पादपो[१६१] विषतिन्द्वाख्यो दीर्घशेलुदलः कटुः । [१६२]तद्बीजं वृन्तकठिनं शाणिकं पाण्डुलोमश'मिति । क्षुरक इति । क्षवक च्छिक्का । 'क्षवकः क्षुवकच्छिक्का कूर उद्वेजकस्तथे'ति निघण्टुः । 'कन्दिन्यल्पदला सिद्धा तृष्णाक्षुत्कारिका तनु'रिति । अध्यण्डः—कोकिलाक्षः । गोक्षुरस्त्रिकण्टः । तिलकः—श्रीमान् । 'तिलकः क्षुरकः श्रीमान् पर्णको मुखमण्डन' इति धर्मिष्ठः[१६२] । 'श्रीमानरिदलः सस्यं पिप्पलीवत् सितं मृदु । मधुरं व्यस्थि यवनपादपः स तु तुच्छक'इति । शर इत्कटः । 'शरो बाणो[१६३] इषुः काण्ड इत्कटः सायकः क्षुर 'इति । [ *10 b* ].

२४. कृतकमिति । खण्डलवणं—बिडं । 'कृतकं खण्डलवणं द्राविडं धूर्तमासुरं[१६४] । बिडं चे'ति निघण्टुः । अथ शुद्धसैन्धवं[१६५] गोमूत्रमजितं निवाप्यारनाले ततस्त्रिधा । 'स्वर्जिकाम्बुनि[१६३] तत्तीर्णमन्तर्धूमेन[१६६] दाहितं । बिडाभिधं स्यादि'ति । कङ्कोलः—कक्कोलं । विडङ्गं—कृमिघ्नं । 'विडङ्गपादपोऽर्थ्यस्त्रिवृन्तपत्रोणुपुष्पकः । मरिचाभफलो गुच्छमञ्जरीक[१६७]' इति । कोरक इति । इङ्गुदस्तापसतरुः । कोलं-कङ्कोलं । मृणालं—बिसं[१६३] । कौशिक इति । पुरो गुग्गुलुः । 'गुग्गुलुः कौलनिर्यासो[१६८] जटायुः कौशिकः पुर' इति धन्वन्तरिः । 'गुग्गुल्यच्छदलाऽसुमा[१६९] । बल्लीबीजा[१६३] सभूर्जत्वक् अमरा खर्वपादपाः । तद्द्रवो गुग्गुलु' रिति ।

---

१५३. कय• १५४. सर्जः १५५. दीपत्रो—र्घ omitted. १५६. कय० १५७. ०मध्यक. १५८. There exist both these forms कपीलुः and कुपीलुः १५९. •र्विषदुतिंदु० १६०. कुचला ? १६१. पादपा. १६२. धार्मिष्ठः १६३. ब for व. १६४. धूर्त• १६५. शुद्ध० १६६. तत्तार्ण ? १६७. गुछ. १६८. निर्य्यासो. १६९. •गुग्गुल्यछ•

२५. वत्सकः—कुटजः । 'कुटजो मालती गायपुष्पः क्षीरी सशाम्बकः[181] । तिक्तश्चम्पकसच्छायपत्रो वर्षादिपुष्पितः । [171]बीजमिन्द्रयवा[172] दीर्घास्तिक्तः सर्वेस्त्व-गादिषु पादप' इति । 'कुटजकुसुमैः कल्पितार्घाय तस्मै' इति मेघदूतः । गणिकेति । यूथिका—बालपुष्पा । 'यूथिका बालपुष्पा तु पुण्यगन्धा गुणोज्ज्वला[173] । प्राक्ताम्या[174] शङ्खधवला नामतः शङ्खयूथिका । स्वर्णयूथ्यपरा पीता[175] गणिका स्वर्णयूथिका । वर्षासु[176] यूथिका पुष्पं[177] तद्गुच्छो मल्लिकाघनः । क्षणं सुगन्धी'ति । वह्निमन्थस्तर्कारी[178] [*11 a*]. ग्रन्थिकमिति । मागधं—मगधाजटा । 'अथ पिप्पलिका नाडी नागवल्लीदला मृदुः । स्थिरा फलं पिप्पलीति मूलं तस्यास्तदाह्वय'मिति । 'ग्रन्थिकं पिप्पलीमूलं मागधं मगधाजटे'ति नाममाला । गूढछदनः—करीरः । 'करीरः कण्टकी विष्वग्गूपत्रः पादपःफली'ति । ग्रन्थिपर्णो—नीलपुष्पः । 'तृणको ग्रन्थिपर्णस्तु सग्रन्थ्यङ्गुलिपत्रक' इति । "गठिवता" इति लोके । अयं 'कच्चूरभेद' इति धन्वन्तरिनिघण्टुः ।

२६. गुग्गुलुः—पुरः । 'ग्रन्थिकं मागधीमूले ग्रन्थिको गुग्गुलुद्रुमे । मार्द्रेये च करीरे'चेति विश्वः । गैरिकमिति । धातुः—गिरिमृत् । 'गैरिकं धातुभेदे स्याध्दातुमात्रे च काञ्चन' इति विश्वलोचनः । स्त्रियां च गैरिका गिरिमृत् धातुररुणद्वित्रिवर्णके'ति वाग्भटाचार्यः । रुक्मं काञ्चनं । 'हिरण्यं हाटकं रुक्मं सुवर्णं हेमकाञ्चन'मिति केयदेवः[180] । रक्तं—हंसपादिकं । 'मणिरागकरं रक्तं गैरिकं हंसपादिक'मिति धन्वन्तरिः । 'सूतगन्धकसंयोगादरदं कृत्रिमारुण'मिति । 'हिङ्गुलः शुकतुण्डाख्यो हंसपाकस्तथा-परः । प्रथमोल्पगुणस्तत्र[181] चर्मारः[182] स निगद्यते । श्वेतरेखः प्रवालाभो हंसपाकः स ईरित' इति वाग्भटाचार्यः[183] । हल्लकं—'रक्तोत्पलं कोकनदं[184] हल्लकं रक्तसन्धिक'मिति केयदेवः[180] । 'रक्तोत्पले गैरिक'मिति हारावली । [*11 b*]. चित्रक इति । पावकः—पाठीनः । 'चित्रको दहनो व्यालः पाठीनो दारुणोऽग्निक' इति धन्वन्तरिः । अमण्डः—आमण्डः । "एरंडं"[185] इति लोके । गन्धर्वहस्तकोऽमण्ड आमण्डो व्याघ्रपुच्छक[186] '

---

१७०. सछाय. १७१ ब for व. १७२. ०बजिं मिंद्रियं० १७३. ०ज्वला० १७४. प्रोक्ताम्या (?). तामी is night-M. W. p. 309. प्राक् तामी is before night = evening. यूथिका is an evening flower. Hence प्राक्ताम्या. १७५. पीता. १७६. वर्षासु. १७७. पुष्प. १७८. स्तर्कारी. १७९. १८०. कय० १८१. प्रथमों. १८२ चर्म्मारः १८३. वाग्भट्टाचार्य्यः १८४. कोकनंदं. १८५. Written in the margin above. एरंड इति लोके = 2 (line on f. 12*a*). १८६. पुछक.

इति **तारपालः** । मुखमण्डनस्तिलकः । ‘तिलकः पूर्वकः श्रीमान् क्षुरकश्छिन्न[१८७]पुण्पकः । मुखमण्डनको रेची विटश्चित्रविशेषक’ इति **धन्वन्तरिः** । ‘श्रीमान् विटश्छिन्नपुष्पः स्त्रीनिरीक्षणदोहदः । वसन्तपुष्पित ’ इति ।

२७. चीनाक इति । ‘कृतकर्पूरः[१८८] प्रसिध्दः चीनाकः कृत्रिमः [१८९]सर्वव्याधिजन्मैककारण’मिति । “ची नि यां क पू र ” इति लोके । तृणधान्यमत्र काककङ्ग्वाख्यं । ‘सितकङ्गुस्तु शमठी रक्तकङ्गुस्तु शोधिका । चीनाकः काककङ्गुः स्यात् श्यामाकस्तृणबीजकं[१९०]’ इति । चीनकश्चीना । ‘चीनाकश्चीनकश्चीने’ति **केयदेवः**[१९१] । दीर्घमण्डपवल्लीफलं । “चि चि ड ” इति लोके । ‘चिचिडः श्वेतराजिःस्यात् सुदीर्घो गृहकूलक ’ इति **भावमिश्रः** । ‘चीनकः कृत्रिमे चन्द्रसंज्ञे स्यादाजिमःफले । वृद्धे च तृणधान्ये चे’ति **लोचनः**[१९२] । [*12 a*]. छग्रिकेति । कन्दरोहिणी । ‘गुडणी गुडूची जीवन्ती मधुपर्णी च तन्त्रिका । कन्दरोहिणी ’ । ‘पिण्डा नागकुमारी च छग्रिका[१९३] ज्वरनाशिनी’ति **निघण्टुः** । ‘वल्ली गुडूच्यात्रिदिना स्थिरा मिश्रप्ररोहिणी’ति । रक्ता— ‘मञ्जिष्ठा विजया रक्ता रक्ताङ्गी कालमेषिका । वञ्जुला विकसा भण्डी छग्रिका[१९३] ज्वरनाशिनी’ति **धन्वन्तरिः** । जतुक इति ।

२८. ‘लाक्षा—द्रुमामयः । ‘राक्षा जतु क्लीबे[१९४] यावो ऽलक्तो द्रुमामय’ **इत्यमरः**[१९५] । ‘पिप्पलस्य द्रवो लाक्षाऽन्यस्मिंश्चापि कचित्तरा’विति । गुग्गुलुः पुरः । पालाशस्त्रिपत्रः । [१९६]पर्पटोऽ[१९७]र्जः । ‘[१९८]पर्पटोऽर्जकवत्सिद्धस्तृणकः क्षेत्रसम्भव ’ इति । हिङ्गु—सूपधूपनम् । ‘अगूढगन्धं जरणं जतुकं सूपधूपन’मिति **मदनविनोदः** । ‘हिङ्गु मौलवङ्गिरौ । पृथुस्कन्धः प्रकाशोऽस्य हिङ्गुनश्चतुरङ्गुलः । तत्क्षीरं [१९८]प्रच्छिते हिङ्गु शुष्कं शुद्धं दलादिभिः । मूत्रकाभं फलं रक्तं त्रुटिवत् हिङ्गुपत्रिके ’ति[१९९] । [*12 b*]. जीविकेति । जीवनीया—जीवन्ती[२००] । ‘जीवन्ती स्याज्जीवनीया ’ । ‘सजीवा जीवा जीव्या जीवेदी जीवदात्री शाकश्रेष्ठा जीवभद्रा च भद्रा मङ्गल्या चक्षुजीवा च सा स्या’दित्यभिधानचूडामणिः । ‘वीरुज्जीवन्तिका शाकः [२०२]प्रसिध्दो [२०३]गुर्जरेषु चे’ति । प्रियो—जीवदः ।

१८७. शिछन्न. In the Anandaśrama edition of धन्वन्तरीय निघण्टु the reading is : तिलकः पूर्णकः श्रीमान् क्षुरकश्छत्रपुष्पकः मुखमण्डनको रेची पुण्ड्रश्चित्रो विशेषकः—Vide p. 202. १८८. ०कर्प्पूरः १८९. सर्व्य० १९०. ब for व. १९१. केयदेव. १९२. लोचन. १९३. छग्रिका. १९४. ब for व. १९५. ०मयस्यमरः १९६. पर्प्पटो. १९७. एजः. १९८. प्रछिते. १९९. At the end of the folio 12*b* is added ॥ गोपालो जयति मम॥ ॥ २००. जीवंति. २०१ जीवश्रा जीवश्रा. २०२. पासिद्धो. २०३. गुर्जरे०

'जीवको–जीवदः क्षोदी मङ्गल्यो मधुरः प्रिय' इति **केयदेवः**। जीवन्तीसदृशैः पत्रै-र्जीवको गुल्मकः स्थिरः। क्षीरी कन्दी सदा नूपे विकाष्ठश्चे'ति। [२०४]सँर्जः–पीतसारः। अथ पीतसालके–' [२०५]सँर्जकासनबन्[२०६]धूकपुष्पप्रियकजीवका' इत्य**मरः**। 'द्रुमोऽसनः कोलदलोऽरुणपुष्पः कुसस्यक' इति। विजयसाराख्यया ख्यां[२०७]तः।

२९. तनुकेति। स्फूर्जः–'कालस्कन्धा कालसारा तनुकादीर्घन[२०८]र्ल्ययोः। स्यन्दिता स्[२०९]फूर्जनः स्[२१०]फूर्जो लोके "तें दू" इति विश्रुत' इति। 'तिन्दुको विटपी कृष्णतनुर्न्यग्रोधस[२११]च्छेदः। पलवृत्तफलः स्थूलद्वित्रिबीजो[२०९] मधुःशिति'रिति। 'लता प्रियङ्गुःश्यामा तु महिलाह्वया'। 'लता गोविन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली'त्य**मरः**। अथाद्रौ महीरुहः। 'प्रियङ्गुर्ब[२१२]कुलैभासदलस्तन्मञ्जरी तनु'रिति। गुडत्वक्–चोचं। 'गुडत्वगुत्कटं हृद्यं तनुकं स्वर्णभूमिकं। लाटपर्णं च सकलं त्वक्चोचं वल्कलं त्वच'-मिति **केयदेवः**। "दारुचीनी"ति लोके। 'त्वक्पत्रमुत्कटं भृङ्गं त्वचं चोचं वराङ्गकमि'त्य**मरः**। [*13 a*]. तिन्दुकीति। कालस्कन्धस्तिन्दुकः। 'कालस्कन्धस्ते[२१३]मौले स्यात् तिन्दुके[२१४] जीवकद्रुमे' इति **लोचनः**। तिण्डिशं–लोमशफलं। "ढींढस" इति लोके। 'तिण्डिशं लोमशफलं फलशाकेषु सिद्धक'मिति।

३०. तिलकमिति। मेचकं–'कृष्णं च कृष्णलवणं मेचकं तिलकं तथे'ति **केयदेवः**। 'कृष्णे सौवर्चल[२१५]गुणो लवणे गन्ध[२१६]वर्जिता' इति **वाग्भटाचार्यः**। पटोलं–राजीफलं। श्रीमान्–तिलकः। 'तरुणीकटाक्षकामो वासन्तः सुन्दरः श्रीमानि'ति **धर्मिष्ठः**[२१७]। तिलो–लोध्रः। 'लोध्रो रोध्रः शाबरकस्तिल्वकस्तिलकस्तिल' इति **गुणरत्नमाला**। दीपक इति। यवसाह्वा–यवानी। 'यवानी दीपको दीप्यो यवसाह्वा यवानिके'ति **धन्[२१८]वन्तरिः**। 'यवाना वल्लिकाल्पाणुच्छदे[२१९]नो तृणकोग्रका। अणुबीजं[२२०] तु गुणै[२२१]श्छेयं फलि[२२२]तवती'ति। जीरको–ऽजाजी। 'गौरादिर्जीर[२२३]कैश्चान्योऽजाजी स्याच्छ्वेतजीरक' इत्य**भिधानचूडामणिः**। 'अजाजी शतपुष्पा चाजमोदा दरकृष्णकः। यवानी धान्यपृथ्वीका-दीप्यकादीनि भूरिशः। भवन्ति यत्तत्केदारे संज्ञैषां[२२४] तृणगन्धक'मिति। तैत्रै[२२५]

---

२०४. सर्जः २०५. सर्ज० २०६. ब for व. २०७. ०ख्यात. २०८. ०नरुल्ययो
२०९. स्फूउर्जनः २१०. स्फूउर्जो. २११. सछदः २१२. ०वकुला० २१३. ०स्तमाने.
२१४. तिदुके. २१५. ०वर्चल. २१६. ०वर्जिता. २१७. धर्मिम० २१८. धन्वंरि।
२१९. ०छयना. २२०. ब for व. २२१. ०छेयं. २२२. फलिवति. २२३. ०जीरक०
२२४. संज्ञे० २२५. तत्रै।

‘धन्वयासो म मो[२२६]ऽजाजी तृणकोऽकण्टकस्तनु’रिति । लोचमस्तक—अजमोदा । ‘अलङ्कारे यवान्यां च दीपको लोचमस्तक’ इति **रभसः** । ‘अजमोदाद्वयं प्रोक्तं द्वयं तनुदलं तनु । क्षेत्रे विचीर्णपत्रं च तत्र तीक्ष्णेऽजमोदकः । सूक्ष्मः सरे सबीजस्तु सदा पथ्यो भृशं कटुरि’ति । [ *13 b* ].

३१. दीप्यक इति । वस्तमोदा—अजमोदा । यवानी—यवसाह्वा । [२२]बर्हिचूडा—मयूरशिखा । ‘[२२]बर्हिचूडा तु शिखिनी शिखालुः सुषिरो[२२७] शिखी[२२८]’ । ‘शिखी[२२८] बैलांके शिखी मयूराद्याभिधा शिखे’ त्यभिधानचूडामणिः । ‘शिखिचूडा तु तृणका [२२९]मञ्जर्यस्या यथार्थका । अयतां[२३०]र्जदला पङ्क्तिसुमे’ति । [२३१]अर्जः कुठेरकः । [२३२]नर्तकीति । शून्यमध्या—नली । ‘नलिका सुषिरा शून्या निर्मध्या [२३२]नर्तकी नटी । धमनी विद्रुमलता कपोतचरणा नली’ति **केयदेवः**[२३३] । नलिका उत्तरापथे प्रसिद्धा । ‘सुगन्धा प्रवालकृत्तिः क्वचित् “प वा री” ति प्रसिध्दे’ति **भावमिश्रः** । नलः पोटगलः । नीवारो—मुनिप्रियः । ‘मलिङ्गको नृत्यकुण्डो[२३४] नर्तको [२३५]नर्तकुण्डकः । नीवारदुड्डिका दुड्डी वनव्रीहिर्मुनिप्रिय’ इति **केयदेवः** । नरि—पुल्लिङ्गे ।

३२. नलिकेति । ‘नाडी—वल्ली जलाभ्यर्णा कषायकुसुमा मृदुः सिध्दे’ति । ‘यथापूर्वं अधःपत्रत्यागी कन्दविशेषकः । तस्यैव नाडी नलिका नालिका च [२३६]प्रकीर्तिते’ति क्वचित् । **सिद्धमन्त्रप्रकाशे** तु–‘[२३७]कलम्बुर्नालकः नाडीयो नाडिका’ । तयोर्लक्षणं[२३८]—‘[२३७]कलम्बुर्नालकः स्वादुः सुषिरो बहुतोयजः । तद्भेदो नालिका [२३९]श्लक्ष्णा ज्ञेया सान्या कलम्बिके’ति । निर्मध्या—सुषिरा[२४०] । ‘नलिका [२४१]सुषिरा नाडीशाकयो’रिति **लोचनः** । [ *14 a* ]. नालिकेति[२४१] । जलनीली—जलज्वरः [२४२]दुर्णीषसंज्ञः ‘सरीसृपेषु पर्वाप्रसूनेषु च नीलिकाप्सु’ इति **वि[२४३]ह्रद्वैद्यवल्लभा** । युग्मफला—इन्दीवरी । ‘करम्भा कर्कशा द्रोणी दीर्घवृन्तोत्तमारणी । इन्दीवरी युग्मफला सुलोणी नीलिका च से’ ति **केयदेवः** । शेफाली—पुष्पवर्त्रिणि ‘निर्गुण्डी कटू[२४४]प्रौढकिसन्दला । गुल्मगु[२४५]च्छा व्यक्तसस्या सितान्या तादृशी-तनुः । शेफालिके’ति । प्रयोगश्च कथमितरथा शेफालीषु स्खलत्कुसुमासु चे’ति **शृङ्गारहार** इति । वृन्दारण्यादिषु प्रसिध्दा । नीलिनी—नीली । ‘नीली नीला नीलिनी नीलपत्री । तुत्था राजी नीलिका कालपुष्पे’ति **निघण्टुः** । ‘अस्नावली कालपुष्पा मसूरसदृश-[२४६]च्छदे’ति ।

२२६. ममो ? २२७. शुषिरा. २२८. शिखा. २२९. मंजर्य्य० २३०. अयताउजं. २३१. अर्ज्जः २३२. नर्त्तकी० २३३. केयद्देवः २३४. नर्त्तको. २३५. नर्त्त. २३६. °कीर्त्तिते० २३७. ब. for व. २३८. र्लक्षणं. २३९. श्लक्षण. २४०. शुषिरा. २४१. नैलिकेति. २४२. ? २४३. द्वंद्वैद्यवल्लमाः २४४. कटू आडकि. २४५. गुच्छा. २४६. च्छ for छ.

३३. पालङ्क इति । शल्लकी—गजभक्ष्या । 'शल्लकी सल्लकी ल्हादा सुरभिः सुखवारसे'ति दन्त्यादिश्च । 'सुगन्धिद्रवका नित्या पङ्क्तिपत्रा तु शल्लकी । शाखाग्रे पद्मरागाभा बिन्दवं[२४७]' इति । अत्र शाकभेदः । "पालक" इति लोके ख्यातः । 'पालङ्क्या वास्तुकाकारा [२४८]किञ्चिच्चीरितपत्रिके'ति **गुणरत्नमाला** । 'पालङ्कः शाकभेदे स्याच्छल्लक्यां याजिपक्षिणी'ति **हैमः** । 'पालङ्कः शल्लकीशाकभेदयोः याजिपक्षिणी'ति **विश्वः** । [*14 b*]. अथ पावक इति । भल्लातकोऽरुष्करः । 'भल्लातः पादपः प्लक्षदल्लोल्पारुणपुष्पकः । तनुक्षीरी च तत्सस्यवृन्तो बिम्बफलं[२४९] मधु । यवोदरं त्रिपुटकं तदग्रेऽस्थिसमं पृथक् । कृष्णं परिणते तस्मिन्नस्थ्येवारुष्करं तत' इति । विडङ्गः—कृमिशत्रुः । वन्हिमन्थोऽरणिका । चित्रकोऽग्निकः । 'पावकोऽग्नौ सदाचारे वन्हिमन्थे च चित्रके । भल्लातके विडङ्गे चे'ति **विश्वः** ।

३४. प्राणक इति । जीवकः—प्राणदः[२५०] । बोलो—गन्धरसः । 'श्रीवासः सरलो बोलः[२५१] कुन्दुरुश्चेति पादपाः । पृथक् पत्रनदेशस्थाः क्रमात्तेषामथाकृतिः[२५२] । करवीरोपमः[२५३] पूर्वः सरलः शाल्मलीसमः । कुमारीछदनो बोलः कुन्दुरुः शल्लकीसमः । एषां द्रवाः स्रुता वृक्षादाव्हियन्ते च ते शकै'रिति । 'प्राणकः सत्त्वजातीये जीवकद्रुमबोलयो'रिति **विश्वः** । 'प्राणको जीवके गन्धरसे च परिकीर्त्यते[२५४]' इति **लोचनः** । [ *15 a* ]. प्रियक इति । असनो—जीवकः । 'प्रियको जीवकोऽसन' इति **रत्नकोषः** । 'आसनोऽपि पीठेभस्कन्धयोः क्लीबे[२५५]ऽसनं ना तु जीवक' इति **रुद्ररभसौ** । 'प्रियकेऽप्यासनोऽसन'इति **द्विरूपकोषः**[२५६] । "विजयसार" इति लोके प्रसिद्धः । नीपः[२५७]—कदम्बः । 'वृन्तपुष्पो बहुफलो[२५८] हारिद्रश्च हलिप्रियः । धाराकदम्बो[२५८]ऽसौ धूलीकदम्बो[२५९]ऽसौ' । 'धूलीकदम्बः स्याद्वसन्त' इति **सिंहः** । कुङ्कुमं[२६०]—बाल्हीकं । 'कुसुम्भ[२६१]सदृशैर्गुच्छैस्तृ[२६२]णकैः कुङ्कुमं समं । भोटकाश्मीरविषये[२६३] तनुवाटतया द्विधा । उत्तरं शुभमद्रौ चे'ति । महिलो[२६४]—प्रियङ्गुः[२६५] । 'श्यामा तु महिलाह्वया । लता गोविन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली 'त्यमरः । 'परमहिलामहिलालामित्र परिहरन्ति 'ति **बाणभट्टः** । 'महेलाप्यमरमहेलारतोऽप्यपारदारिक ' इति **दमयन्तीकाव्यम्** । पिण्याक इति ।

---

२४७. ब for व. २४८. चीरीत. २४९. मावको. २५०. प्राणचद:? २५१. बोले. २५२. ०मयाकृत्मि. २५३. करवीशे०. २५४. परिकीर्च्यत. २५५. ब substituted for व. २५६ ०कोव. २५७. नामः २५८. ब for व. २५९. कदंवीसौ. २६०. कुंकुमं. २६१. कुंसुंभ. २६२. च्छ for छ. २६३. विश्रय. २६४. महेला. २६५. प्रियंग:.

३५. तिलानां कल्कस्तिलकल्कः । 'कल्को दृषदि पेषितः' । बाल्हीकं[266]–कुङ्कुमं । 'बाल्हीकंबाल्हिकं धीरहिङ्गुनो'रिति **त्रिकाण्डशेषः** । सूपधूपनं–हिङ्गु । सिल्हः–पिण्डितः । 'तुरुष्कपादपः सेलुदलवत्फलबीजकं[267] शैलेयस्तद्रसः सिल्हमि'ति गान्धिकद्रव्यं । "शिलारस" इति लोके[268] [*15 b*]. पीतकमिति । गृञ्जनः–गज्जरं । 'नारङ्गकण्टं गजरं पीतकं गृञ्जनस्तथे'ति **केयदेवः** । 'गृञ्जनोऽरुणकन्दस्तु [269]प्रसिद्धो नीचवल्लभ' इति । "गाजर" इति लोके । तालं–हरितालं । 'हरितालं द्विधा प्रोक्तं पत्राख्यं पिण्डसंज्ञकं[270] । तयोराद्यं[271] गुणे श्रेष्ठं[272] ततो हीनगुणं परं । स्वर्णवर्णं गुरु स्निग्धं सपत्रं चाभ्रपत्रवत् । पत्राढ्यं[273] तालकं विद्याद्गुणाढ्यं[274] तद्रसायनं । निःपत्रं पिण्डसदृशं स्वल्पसत्त्वं तथा गुरु । स्त्रीपुष्पहारकं स्वल्पगुणं तत्पिण्डतालकमि'ति । चम्पको–हेमपुष्पकः । कुङ्कुमं–रक्तं । 'अभ्रकं गिरिजामले' इत्यमरः ।

३६. कुसुम्भो–लट्वा । जीरकमजाजी । स्त्रियां तु पीतका । प्रत्ययस्थानात्कादितीत्वं । कोशातकीमिदत्र स्वादुकोशातकी । 'कोशातकी क्ष्वेडवेधधामार्गवपटोलिष्वि'ति[275] **हृदयदीपकः** । निशा–हरिद्रा । 'निशार्द्रकदलः कन्दः प्राच्यां क्षेत्रेषु सिद्धकमि'ति । कूष्माण्डः–पुष्पफलं । यूथी–गणकारिका । किङ्किरातः–पीतपुष्पः सहचरः । 'पान्थान् विकम्पयति केशवकिङ्किरात' इत्यमरचन्द्रः[276] ।

३७. पुलक इति । गन्धको–लेलीतकः । 'श्वेतद्वीपे पुरा [*16a*] देव्याः क्रीडन्त्या रजसा प्लुतं । दुकुलं तेन वस्त्रेण स्नातायाः क्षीरनीरधौ । प्रसृतं यद्रजस्तस्माद्गन्धकः समजायत । चतुर्धा[277] गन्धकः[278] प्रोक्तो रक्तः पीतः सितोऽसितः[279] । रक्तो हेमक्रियासूक्तः[280] पीतश्चैव रसायने । व्रणादिलेपने[281] श्वेतः कृष्णः श्रेष्ठः[282] स [283]दुर्लभ'इति **भावमिश्रः** । तालं–हरितालं । कालवालुकं–कङ्कुष्ठं । 'हिमवत्पादशिखरे कङ्कुष्ठमुपजायते । तत्रैकं नालिकाख्यं हि तदन्यद्रेणुकं मतं । पीतप्रभं गुरु स्निग्धं श्रेष्ठं[284] कङ्कुष्ठमादिमं । श्यामपीतं लघु त्यक्तसत्त्वं[285] नेष्टं हि रेणुकं' । 'केचिद्वदन्ति कङ्कुष्ठं सद्योजातस्य दन्तिनः । वर्चश्च श्यामपीताभं रेचनं परिकथ्यते । कतिचित्ताजिवाहानां नालं कङ्कुष्ठसंज्ञितं[286][287] । वदन्ति

२६६. वाल्हीकं. २६७. फवीजकं. २६८. After लोके ॥ गोविंदो जयति नमः श्रीरस्तुः ॥ २६९. प्रासेद्धो. २७०. ०संज्ञकंः. २७१. गुर्णे. २७२. श्रेष्टं. २७३. पत्राद्यं. २७४. गुणाद्यं. २७५. पटोलिषिति. २७६. ०चन्द्र. २७७. चतुर्द्धा. २७८. गंधक. २७९. ०सिजः. २८०. ०सूता. २८१. ०लेपर्न. २८२. श्रेष्ठः. २८३. दुर्ल्लभ. २८४. श्रेष्टं. २८५. सत्वं. २८६. कंकुष्टं. २८७. संज्ञेतं.

श्वेतपीताभं तदतीवविरेचनमि'ति **रसरत्नसमुच्चये वाग्भटाचार्यः** । 'अथ यद्धिमशैलजं विषं वृषसमं पत्रेण जेर्को[288]सदृशं रसे । तत्कङ्कुष्टं काककुष्टं रेचनं रङ्गनायकं । शोधनं पुलकं ऱ्हासं वराङ्गं कालवालुक' मिति **सिंहः** । 'कङ्कुष्टो धातुश्चान्ये महीरुहः । वटाग्रच्छदनः कृष्णाणुपुष्पो विफलासित ' इत्यन्ये[289] [*16 b*]. पृथ्वीकेति । पृथुला[290] –हिङ्गुपत्री । 'हिङ्गुपत्री वेणुपत्री कारवी बाष्पिका पृथुः । पृथ्वीका पृथुला भिण्डी रामठी चारुपत्रिके 'ति **केयदेवः** । पार्था–आदित्यभक्ता । 'अर्कपुष्पी च पृथ्वीका पार्था ब्रह्म[291]सुवर्चला । अर्ककान्ता दिव्यतेजा लोके " रु ल हु ले "ति से'ति **निघण्टुः** । 'सादित्या हस्तपत्रा च सुगन्धा शम्भिनी मृदुः । पुनर्नवासमा बोध्या विटा ब्रह्म-सुवर्चले 'ति । कारवी–कालिका[292] । 'कालिका[293] कारवी पृथ्वी पृथ्वीका सोपकुञ्चि-के'ति । बहुला–बृहदेला[294] । 'पृथ्वीका चन्द्रवालैला निष्कुटिर्बहुला च से'त्यमरः । 'सूक्ष्मारिदालिनी क्षेत्रेऽल्पगुच्छा[295] वल्लिका त्रुटिर्बृहती[296] 'ति ।

३८. पृथुकेति । चिपिटः–सतुषार्द्रस्विन्नभृष्टकण्डितशालिः । चारुपत्रिका–हिङ्गु-पत्री । 'हिङ्गुपत्री तु केवरी[297] पृथ्वीका पृथुला[298] पृथु 'रिति **धन्वन्तरिः** । बन्धूक[299] इति । 'बन्धूकं बन्धुकं प्राहु 'रिति **द्विरूपकोषः** । 'बन्धुजीवः–शरत्पुष्पः ' रक्तपुष्पः सितपुष्प[300]श्च । 'बन्धुजीवः शरत्पुष्पो बन्धुबन्धुकरक्तका ' इति **केयदेवः** । 'अर्घ्यङ्गुलिच्छदो[295] रक्तकुसुमो बन्धुजीवकः । विटो गन्धः स्थिरो मुद्गरिपुबीजः सितोऽपि चे ' ति । पीतसालकः–सर्जः । [301] 'पीतसालस्तु[402] सर्जक ' इति **सिंहः** । 'बन्धूको[303] बन्धुजीवे स्याद्बन्धुकः पीतसालक ' इति **लोचनः** ।

३९. वालुक इति । मूत्रफलं[304]–'वालुकं मूत्रलं मूत्रफल' मिति **निघण्टुः** । हरिवालुकं–एलवालुकं । 'एलवालुकमैलेयं सुगन्धि हरिवालुकं[305]' मित्यमरः । " शी त ला ची नी "ति लोके प्रसिद्धं कुष्टसदृशं सुगन्धिद्रव्य 'मिति **भावमिश्रः** । [*17 a*]. भूतीकं[306]मिति । दीप्यो–यवानी । 'यवानी दीप्यको दीप्यो भूतीकं भूकदम्बक[299]' इति **निघण्टुः** । कर्पूरो–हिमवालुका । 'कर्पूरो हिमचन्द्राख्यो भूतीकं

---

२८८. ? २८९. ॥ रामः ॥ after इत्यन्ये । २९०. पृथला. २९१. ब substituted for व. २९२. कातीका. २९३. कालीका. २९४. ब्रहदेळा. २९५ च्छ substituted for छ. २९६. हृगु. २९७. करवी-the original reading in धन्वंतरिः is कबरी–p. 77. २९८. पृथुका-for पृथुला; see धन्वंतरिः p. 77. २९९. व substituted for व. ३००. च. ३०१. सर्ज्जः. ३०२. सर्ज्जक. ३०३. वंधुक. ३०४. मूत्रफल. ३०५. ०वालुकं मित्य०. ३०६. भूतिक (?)-is a reading in धन्वंतरि but भूतीक has been retained here.

हिमवालुके 'ति [307]धर्मिष्ठः। 'अथ रम्भासमो द्रुमः। वि[308]काष्ठगर्भः कर्पूर उच्चैरपि च तत्र तु। एकैकभू[309]र्जेन्तरितचन्द्रवृत्तानि सर्वशः। आमध्यं सारवत्तत्र स्थूलखण्डनमुत्तम' मिति। 'ईशावासा भृशं श्वेतो हिमसंज्ञस्तु पाण्डुरः। श्वेतः पोताश्रयः सर्वे रसवीर्य-वि[310]पाकितः। प्र[311]भावेणापि ते प्रोक्ताः पूर्वं [312]पूर्वं गुणाधिकाः। तत्रापि यश्च क्षुद्रः स्यात् स्फटिकाभः स उत्तम' इति **निघण्टुः**। सिल्हं—पिण्याकः। 'मालातृणं भूस्तृणद्वेशत-पुष्पोग्रगन्धिनी 'ति **सिंहः**। 'भूस्तृणं—रोहिषो भूतिं भूतीकं च कुरे[313]म्बकः। मालातृणं च पालिन्दी बधिरेध्वेनिबोधेके' इति **धन्वन्तरिः**। 'तृणं सुगन्धि भूतीकंमैनूपेऽद्रौ चे 'ति। कत्तृणं—रामकर्पूराढ्यं। 'अथ गन्धतृणे रामकर्पूराढ्ये हि कत्तृण 'मिति **सिंहः**। 'कत्तृणं सकलं भूतिर्भूतीकं[314] रोहिषं तृणं। व्यामकं श्यामकं पौरं मुद्गलं देवगन्धक 'मिति **धन्वन्तरिः**। 'अथ भूतीकं तृणं रोहिषवत्तन्वि 'ति।

४०. भूमिम्बो[315]—रामसेनः। 'अथ भूनिम्बो भृङ्गपत्री गिरौ समः। सुवर्ण-पुष्पस्तृणकं[316]' इति। वस्तमोदाऽजमोदा। चिरबिल्वः—करञ्जभेदः। अथ करञ्जकः—'सिद्धोग्रगन्धो भूर्जे[317]र्वर्कं लक्षपत्रोऽल्पशम्बकं[318]ः। चिरबिल्वस्तदुपमस्तद्गन्धोऽल्पभिवा (?) न्वित' इति। कद्फलः—कटुफलः। 'कटशुलः सधवः शैले[319] पादप' इति। [ *17 b* ]. म[320]धुकंमिति। क्लीतकं—यष्टी। 'मधुयष्टी यष्टिमधु क्लीतकं क्षौद्रसाह्वयं। यष्ट्याह्वं मधुकं यष्टी'ति **हृदयदीपकः**। यष्टीमधुकमिति च। 'मधुयष्टी च यष्टी च यष्टीमधुकमेव चे'ति **वाचस्पतिः**। 'अथ स्यान्मधुकं गुल्मः स्वल्पभि[321]च्छेरपुङ्खवत्। किञ्चिन्महान् दीर्घपत्रोऽल्पकृष्णा समिदस्य त्वि'ति। कृष्णकङ्गुः—प्रसि[322]द्धा। कङ्गुस्तु 'कङ्गुः प्रियङ्गुः पीततण्डुला सा कृष्णा मधुके 'ति **हैमः**। काश्मर्यः—श्रीपर्णी। 'श्रीपर्णी सर्वतोभद्रकाश्मीरीकाश्मरी मुदा। गम्भारी कट्फला हीरा काश्मर्यो म[323]धुपर्णि-के'ति **केयदेवः**। 'मधुका—मधुपर्ण्यां स्त्री मधुकं क्लीतके पुन 'रिति **मेदिनी**। 'श्रीपर्णी च प्रसिद्धका। मृद्वा[324]म्रपत्रा तत्तुल्याल्पफला मोहिनीद्रुमे' इति।

४१. मधूकमिति। क्षौद्रसाह्वा—मधुयष्टी। मधुद्रुमो—गुडपुष्पकः। 'एलाफल-स्तीक्ष्णसीरो मधूको गुडपुष्पक' इति **केयदेवः**। मधूको द्रुस्ततः प्रसिद्धमिति।

---

३०७. धार्म्मिष्ठः. ३०८. विकाष्ट०. ३०९. भूर्ज्जो०. ३१०. वीर्या वै०. ३११. प्रभावणा०. ३१२. The second पूर्वं added for metrical purposes and it is very likely that it must have been there originally. ३१३. भूतीकं. ३१४. भूतीक. ३१५. व substituted for ब. ३१६. पुष्पातृण०. ३१७. भूर्ज्जे०. ३१८. शंबकुः ? ३१९. शैले ?–Is it शैलपादपः ? ३२०. मधुकं इति. ३२१. च्छ substituted for छ. ३२२. प्रासेद्धा. ३२३. मधुपर्णि०. ३२४. मद्वा०.

"महुवा" इति लोके। मण्डूकेति। सूर्यभक्ता—'सुवर्चलादित्यकान्ता सूर्यभक्ता सुखोद्भवा। मण्डूकपर्णी[३२५] मण्डूकी बदरा[३२६]दित्यपर्ण्यपी' ति **धन्वन्तरिः**। कुटन्नटश्छिण्टुः। 'मण्डूको बन्धु[३२७]मेदेऽपि दर्दुरे शोणके विदुः'। 'मण्डूपर्ण्यां मण्डूकी मण्डूको शोणके विदु'रिति **विश्वः** [ *18 a* ].

४२. माक्षिकमिति। सिक्थकं—मयणं। 'मयणं सिक्थं मधूच्छिष्ट[३२८]'मिति **हृदयदीपकः**। 'क्षौद्रं मधु मधुक्षौद्रं पुष्परसो मक्षिकाविच्च माक्षिक'मिति **हृदयदीपकः**। धातुमाक्षिकं। सुवर्णमाक्षिकं। 'स्वर्णमाक्षिकमाख्यातं तापीजं मधुमाक्षिकं। ताप्यं माक्षिकधातुश्च मधुधातुश्च स स्मृत 'इति **निघण्टुः**। 'सुवर्णशैलप्रभवो विष्णुना काञ्चनो रसः। तापीकैराते[३२९]चीनेषु यवनेषु च निर्मितः। ताप्यः सूर्यांशु[३३०]संतप्तो माधवे मासि दृश्यते। मधुरः काञ्चनाभासः साम्लो रजतसन्निभः। तत्सेवनात्[३३१] जराव्याधिविषैर्न[३३२] परिभूयते। माक्षिको द्विविधो हेममाक्षिकस्तारमाक्षिकः। तत्राद्यं माक्षिकं कान्यकुब्जे[३३३]ऽथ स्वर्णमाक्षिकं। तपतीतीरसम्भूतं पञ्चवर्णं सुवर्णवत्। पाषाणबहलः प्रोक्तस्तारा[३३४]ख्योऽसौ गुणाल्पक' इति **वाग्भटः**। मार्षक इति। रक्तवास्तूको—गौडवास्तूकः। 'सतीनजं वास्तुकौ च कासघ्नश्वणकाभिधं। कौसुम्भमथ वेत्राग्रं कुन्तली चेति सिद्धका' इति। 'वास्तूकं च स्यात् क्षारपत्रं च शाकराट्। तदेव तु बृहत्पत्रं रक्तं स्याद्गौडवास्तुकं'। जीवशाको—मार्षः। 'मारिषो मारुषो मार्षो जीवशाकस्तथैव चे'ति **गुणरत्न[३३५]माला**। 'मार्षको जीवशाके स्यात्तथा स्याद्गौडवास्तुक' इति **सिंहः**। [ *18 b* ]. मूषिकेति।

४३. देवदाली—गरागरी। 'जीमूतको देवताडो वृन्तकोषो[३३६] गरागरी। मूषिकातिखुराकश्च तर्कारी[३३७] सैव कीर्तिते[३३८] 'ति **धन्वन्तरिः**। 'सितपीतारुणैः पुष्पैर्देवदालीत्रयं मतं[३३९]। वल्ल्यः[३४०]स्तिक्ताः स्थिरा एताः कर्कोटाभदले परे। आद्याः फलं दीर्घकण्टं लघुवृन्तं[३४१] च ता इती 'ति। द्रवन्ती—दन्तीभेदः। 'द्रवन्ती शम्बरी फञ्जी न्यग्रोधी मूषिकाह्वया। प्रत्यक्श्रेणी सुतश्रेणी वृषैरण्डाखुकर्णिके'ति **कैयदेवः**। दन्ती-गुल्मकः द्रवन्ती वल्ली। 'अरिवृत्तैर्दलैर्दन्ती एरण्डतनुसम्फला। स्थिरा गुल्मानूपदेशे छिन्न स्वच्छ[३४२]पयः स्रुति 'रिति। 'वल्ल्याखुकर्णी प्रतनुः कृष्णभावृन्तपत्रके 'ति। मोचक

---

३२५. ०पर्णी. ३२६. वदरा०. ३२७. वंधु०. ३२८. च्छ substituted for छ. ३२९. ०कैरात. ३३०. सूर्यांशु. ३३१. सेननात्. ३३२. र्नृ. ३३३. कुब्जो०. ३३४. प्रोत्क. ३३५. गुणगुण. ३३६. पृत्तकाषो. ३३७. तर्कारी. ३३८. कीर्तिते०. ३३९. मतं०. ३४०. बल्ल०. ३४१. लघुवृत्तं. ३४२. स्वच्छ०.

इति। शिग्रुः—शोभाञ्जनः[353]। 'घनच्छदस्तीक्ष्णगन्धो[354] मोचको बहलच्छद[355]' इति धर्मिष्ठः[356]। पिच्छा[357]—शाल्मलिवेष्टकः। 'पिच्छामोचकनिर्यासे[358]-मोचकाविति केयदेवः। रम्भा—कदली। 'पीतवर्णफलायां[359] च सा चम्पककदल्यपि। कृष्णवर्णा[360] तु सा चम्पा रम्भा तु सितवर्णिका। बृहत्फला तु माहेन्द्री मोचा त्वल्पफला हि या। या तु कर्पूरगन्धाढ्यफला[351] राजकदल्यसौ। कर्पासवद्बीजफला काष्ठीला जायते वन' इति सिंहः। 'शोभाञ्जने[352] शाल्मलिवेष्टके[353] च स्यान्मोचकश्चापि भवेत्कदल्या' मिति धर्मिष्ठः[354]। [ *19 a* ]. यवक इति। 'ह्रस्वयवः कुत्सितो यवो यवकः' निन्दायां कन्। 'यवकान्न च शीलये'दिति **वाग्भटः**। अत्र शालिप्रभेदो—यवाकारतन्दुलः। 'यवका हायनाः पांशुबाष्पनैषधकादय' इति **वाग्भटः**।

४४. याज्ञिक—इति। कुशो—दर्भः[354]। पालाशो—ब्रह्मवृक्षः[355]। खदिरो—बालपत्रः[355]। 'शमीदलतरुः[356] शैलेऽफलसस्यः कषायकः। खदिरोऽस्यैव सारोऽधःसंस्थः सारस्तदाह्वयः। युज्यते तत्र रागार्थे तदलाभे तु साधितः। तद्वृक्षवल्कनिर्यासो घनः शुष्को गुणोत्तरः। सारादपि स योज्यो वा सारः खदिरजोऽपि स' इति। यावक इति। निद्-पीतदारु। 'दार्वी कुटजवत्पत्रैरङ्कोटसदृशैर्गणैः[357]। क्षीरिणी चे'ति। अलक्तक'—'यावोऽलक्तो द्रुमामय' इत्यमरः। सिल्हकः—पिण्याकः। यूथिकेति। अम्लानो—झिण्टीप्रभेदः। 'अम्लानस्त्वमले झिण्टीप्रभेद'[358] इति **हैमः**। 'अम्लानो म्लाटनः प्रोक्तस्तथाम्लातक' इत्यपि। 'कुरण्टको वर्णपुष्पः स एवोक्तो महासह' इति **भावमिश्रः**। 'यूथिका तु गता यूथ्यामम्लानकुसुमे क्वचिदि'ति **विश्वलोचनः**। ''वाणपुष्प' इति गौडादौ प्रसिद्ध' इति **भावमिश्रः**। बाला—प्रहसन्ती। 'प्रहसन्ती तु यूथी स्यादि'ति **त्रिकाण्डशेषः**। "जूही" ति लोके [ *19 b* ].

४५. रक्तकमिति। शुल्बं—ताम्रं। 'ताम्रं म्लेच्छमुखं शुल्बं रक्तक'मिति **धन्वन्तरिः**। 'ताम्रं म्लेच्छमुखं रक्तमरविन्ददलप्रभं शुल्ब'मिति **निघण्टुः**। 'ताम्रं द्वेधा शुभाशुभं। नेपालसम्भवं शुद्धमकिट्टं मृदु शोणितं। पाश्चात्यं भङ्गुरं कृष्णमयोमिश्रं च दारुण'मिति। बाल्हीकं—कुङ्कुमं। प्राचीनामलकं—जलामलकं। 'प्राचीनामलकं प्राची नागरी चापि रक्तक'मिति **निघण्टुः**। 'प्राचीनामलकं लोके पानीयामलकं[359] मत'

---

३४३. शाभांजनैः. ३४४. च्छ substituted for छ. ३४५. ब for व.
३४६. धर्म्मि०. ३४७. मिछा. ३४८. निर्ग्गास. ३४९. ०फलाया. ३५०. वृष्ण.
३५१ गंधाद्य०. ३५२. सौभांजने. ३५३. शाल्पलि. ३५४. दर्भैः. ३५५. वेल०.
३५६. शमीदं०. ३५७. गिणैः. ३५८. प्रमेदशति. ३५९. पानीयामकं.

मिति **भावमिश्रः**। लोहितं–हिङ्गुलं। 'रक्तकं हिङ्गुले ताम्रे जलामलकधीरयो' रिति **हैमः**। [360]रागी–विचित्रकः। 'विचित्रो रक्तको रागी विशोकस्ताम्रपल्लव' इति **केयदेवः**। 'जपापुष्पं जवापुष्पं मण्डपुष्पं जपा[361] जवा। पिण्डपुष्पं हेमपुष्पं त्रिसन्ध्या त्वरुणासिते 'ति[362] **केयदेवः**। गुञ्जा–काकणन्ती। राजिका–आसुरी। 'रक्तकश्चित्रकजपाराजिकाकृष्णलासु चे 'ति **शाश्वतः**। [ 20 *a* ].

४६. रम्यक इति। पटोलं–राजफलं। तस्य मूलं। 'पटोलं स्याद्राजफलं तस्य मूले तु रम्यक' इति **त्रिकाण्डशेषः**। विषमुष्टिको–द्रेष्का। 'अपरस्तु महानिम्बो गिरिकः शुकशालकः। रोमको रम्यको[363] द्रेष्को[364] जीवको विषमुष्टिक' इति **केयदेवः**। रुचकमिति। स्वर्जिकाक्षारः–सर्जिक्षारः[366]। '[367]स्वर्जिका लोणिकातुल्या दाहिता क्षारतां गते ' ति। रोचना–गोरोचना। 'सद्गोः शिरसि पीता तु रोचना ह्रियते शनै ' रिति। हृद्यगन्धं–सौवर्चलं[368] शुद्धसैन्धवं। 'स्फटिकाभं च विध्माप्य त्रिस्त्रिर्निर्कपयेतरां[369]। जम्बीराम्बुनि[370] लुङ्गाम्बुन्यथ शङ्ख इवाम्बुनि। त्रिस्त्रिभिर्वापि[371] तं भूयस्तेष्वेवाचूर्णितेषु च। त्र्यब्धिपिप्पलीचूर्णैः प्रत्येकं तत्पुनस्त्रिधा। संमृज्य साधितं बुन्धं[372] तद्धि सौवर्चलं[368] शुभं[373] 'मिति।

४७. रुबुः[374]–उरुबूकः। 'रुबुकोरुबुकौ प्रोक्तौ[375] वुरुबूकोऽपि[375] तादृशः। रुबूकश्च 'रुबूकतैलेन[376] [ 20 *b* ] समन्वितोऽयं मेत्तौ[377] भवेदामसमीरणाना 'मिति **लोलिम्बराजः**। लुङ्गो–बीजपूरः। 'रुचको बीजपूरे चानेष्के दन्तकपोतयो 'रिति **मेदिनी**। 'मातुलिङ्गो बीजपूरो लुङ्गो मध्याम्लकेसर' इति **केयदेवः**। 'लुङ्गं द्रवं च जंबीरं [378]नारङ्गं लकुचं तथा। वृत्तवृन्तोपपत्राश्च दीर्घकण्टक पादपाः। अल्पान्तरा मिथः[379] संज्ञा कृतैत्रा कण्टकेसराः। लुङ्गं प्रस्थो द्रवोर्धं[380] च जम्बीरं च तदर्धकं[381]। ततो द्वे पलमात्रे तु मानं पक्वेषु पीतता। भृशारुणं तु नारङ्गं सर्वकेसरकोषकैः। क्रमवृत्तः फलं पूर्णं कण्टकेसरसम्भवम्। [382]द्विगुणैर्मृदुकैर्बीजैर्युक्तानि क्रमशस्तथा। कण्टकेसरकोषाश्च पृथक्नारङ्गबीजयोः। कोषस्पर्शाद्रसं मुञ्चेज्जम्बीरं मृदुकेसरं। कण्टकेसरवर्गे[383] तु लकुचं भृशादोपलमिति। [ 21 *a* ]. रेणुक इति। शीतवल्लभः–

३६०. रागा. ३६१. जपाजवा. ३६२. 'ति ' dropped. ३६३. रंपको.
३६४. द्रेष्कांजिवको. ३६५. मुष्टिव. ३६६. सार्जि०. ३६७. स्वार्जि०. ३६८. सौवर्च्चे०.
३६९. ? ३७०. ब for व. ३७१. त्रिर्भिवापि. ३७२. वुर्ध्य. ३७३. शुभामेत्ति०.
३७४. रुबुरुरु०. ३७५. ०वुकोमि. ३७६. रुबूकैतलेन. ३७७. मेःश. ३७८. नारंग.
३७९. मिथो. ३८०. द्रवोर्द्धं. ३८१. तदर्द्ध०. ३८२. मृदुकैर्बीजयुक्ता०. ३८३. वर्गे,

पर्पटः[३८४] । 'पर्पटो[३८४] वरतिक्तश्च पित्तहा शीतवल्लभः । वर्मोद्भयो[३८५] रजोरेणु 'रिति केयदेवः[३८६] । कौन्ती—हरेणुः[३८७] । 'हरेणू रेणुका कौन्ती 'ति हृदयदीपकः । कौन्त्यास्तु[३८८] पादपो वृत्तपत्रो पुष्पफलस्य[३८९] च । बीजं तु कौन्तिकासंज्ञं तिक्त 'मिति । रेचकमिति । काकवालुकं—कङ्कुष्ठं । मूकूलकं—दन्तीबीजं । 'दन्तीबीजे च कङ्कुष्टे रेचक 'मिति हलायुधः ।

४८. लोणीकेति[३९०] । लोणीकाशाकः "लो णि जा" इति ख्यातः । ह्रस्व-बृहद्भेदेन द्विविधः[३९१] । 'लोणा लोणी च कथिता बृहल्लोणी तु घोटिके'ति भावमिश्रः । चाङ्गेरीशाकः—अम्ललोणिका । 'चाङ्गेरीचुक्रिका दन्तराठाम्बष्ठा[३९२]ऽम्ललोणिका । अश्मन्तकस्तु शफरी कुरारी (?) चाम्लपत्रक ' इति भावमिश्रः[३९३] । [21 b]. वसुक इति । शिवमल्ली—पाशुपतः[३९४] । रौमकं—शाकम्भरीलवणं 'रुमा लवणखानिः स्यात् रौमकं तु रुमाभव 'मिति हैमः ।

४९. बाल्हीकेति । धान्यं—धेन्यकं[३९५] । 'धान्याकं धेन्यकं[३९६] धान्यं कुस्तुम्बुरुधनीयक 'मिति रभसः । हिङ्गु—सूपधूपनं[३९७] । 'गृहिणी मधुरा हिङ्गु शूलद्विट् सूपधूपन 'मिति त्रिकाण्डशेषः । कुङ्कुमं—रक्तं । [३९८]वार्ताकमिति । वार्ताकुर्वातिङ्गणः । 'वातिङ्गणस्तुवार्ताकुर्वार्ताकः शाकबिल्वकः[३९९] । क्लीबे वङ्गं च वार्ताकी स्यान्महाबृहतीत्यपी 'ति स्त्रियाम् त्रिकाण्डशेषः । 'वातिङ्गणस्तु वार्ताङ्को वार्ताकः शाकबिल्वक ' इति रभसः । 'वार्ताकं कटु तिक्तोष्णं मधुरं कफवातजि[४००] ' दिति वाग्भटः । 'वार्ता वातिङ्गणे वृत्तावि'ति[४०१] विश्वः । बृहती—सिंहका । 'बृहती सिंहकाक्रान्ता वार्ताकी राष्ट्रिका कुली'ति धन्वन्तरिः । क्षुद्रा—क्षुद्रकण्टकी[४०२] । 'वार्ताकी धावना व्याघ्री कण्टाली क्षुद्रकण्टकी 'ति धर्मदासः[४०३] । [22 a].

५०. वार्षिकमिति । त्रायमाणा—त्रायन्ती । 'तृणका त्रायमाणा दुःस्थिरा[४०४]-मार्कवसन्दले 'ति । अत्र मल्लिकाभित् । '[४०५]वार्षिकी त्रिपुटा त्र्यस्रा सुरूपा सुभगा प्रिये 'ति धन्वन्तरिः[४०६] । [४०७]बाष्पिकेति । कारवी[४०८]—पृथ्वीका । 'कालीका कारवी पृथ्वी

---

३८४. पर्प्प०. ३८५. वम्र्मा०. ३८६. यदेवः. ३८७. हरेणुः. ३८८. कौल्या०. ३८९. पुष्पः. ३९०. लोणीकोते. ३९१. द्विविषः. ३९२. राठावंष्ठा. ३९३. For 'कुरारी', जगदीश्वर Press edition of भावमिश्र has 'पिसर्ला.' At the end : ॥ राधा धा गोपालो जयति नमः ॥ नमः ॥. ३९४. पासु०. ३९५. धत्वकं. ३९६. धन्यंक. ३९७. धूपन. ३९८. वार्त्ता. ३९९. ब for व. ४००. बात. ४०१. विति. ४०२. ०कंटकां. ४०३. धर्म्म०. ४०४. कुस्थिरा. ४०५. वार्ष्यिकी. ४०६. धन्वंतरि. ४०७. बाष्पिकोते. ४०८. कारवा.

सुलवी बाष्पिका पृथु ' रिति धर्मदासः[४०८]। " क लो जी " ति लोके। हिङ्गु[४०९]पत्री–हिङ्गुप्रकृतिः। अथ बीजकं[४१०] इति।

५१. बीजपूरो–मातुलुङ्गः। पीतसारः–पीतसालः। " वि जे सा[४११] र " इति लोके। ' पीतसालस्तु सर्जकं[४१२] ' इति[४१३] सिंहः[४१४]। वृक्षक इति। कुटज–इन्द्रवृक्षः। धवो–धुरन्धरः। कन्दरोहिणी–गुडूची। वृषक इति। अटरूषको–वासो[४१५]। ' वृषो[४१६] वासाटरूषक ' इति माधवः। ' वैद्यमाताटरुषकः सिंहास्यो वाजिदन्तक ' इति रभसात् ह्रस्वतृतीयोऽपि। ' वासो गृहे व्यवस्थाने वासा स्यादाटरूषक ' इति रुद्रश्च। ' दीर्घादिश्च वासो वृष आटरूषसिंहास्या 'विति हृदयदीपकः।

५२. ऊषरः–क्षारमृत्तिका। दृषद्भेदः[४१७]–पाषाणभेदः। ' अश्मभिद् दृषद्भिन्ध्ये रक्तपुष्पः सुगन्धिक ' इति। [ 22 b ]. शालूक इति। खदिरो–दन्तधावनः। अरलुष्टिण्टुकः। [४१८]पिण्डीतको–मदनफलं। ' राठकोऽङ्कुलिबिल्वैकपत्रपत्रो सनूपजः। विटपो मदनं तस्य फलमेवो[४१९]पयुज्यत ' इति। फल–जातीफलं। पद्मादिकन्दः–पद्मादिमूलं। ' शालूकं करहाटः कुरण्टक ' इति केयदेवः। ' सौगन्धिकं तु कल्हार ' मित्याद्युपक्रम्य ' शालू[४२०]कमेषां कन्दःस्या ' दित्यमरश्च। [४२१]पुंलिङ्गोऽपि ' शालूको जलकन्द ' इति हृदयदीपकः। ' पद्मादिकन्दे शालूकं जातिकोशेऽपि च क्वचि 'दिति सिंहः। ' जातीफलं जातिसस्यं शालूकं मालतीसुत 'मिति केयदेवः।

५३. [४२२]सर्जिकेति। स्वर्जिका–क्षारः। सुवर्चिका[४२३]। सर्जक इति। ' असनो बीजकः शालः सर्जः प्राहुः[४२४] शालं सर्जं च सूरय ' इति हलायुधः। ' शालः सर्जः सर्जरसःकान्तो मरिचपत्रक ' इति केयदेवः। अजकर्णः[४२५]–शालप्रभेदः। ' सर्जकोऽ[४२६]न्योऽजकर्णः[४२७]स्याच्छालो[४२८] मरिचपत्रक ' इति भावमिश्रः। सिंहिकेति[४२९]। चन्द्रपुष्पा। ' सितपुष्पा कण्टकारी सितसिंही चन्द्रपुष्पा क्षुद्रमाता प्रियंकरी 'ति केयदेवः। ' सिंही बृहत्यां श्वेतायां प्रभावाभ्यधिका च से 'ति कश्चित्। आटरूषो–वासः[४३०]। [ 23 a ].

---

४०९. हिगु०. ४१०. व for व. ४११. Written in the margin. ४१२. सज्जेक. ४१३. इ double. ४१४. सिहः. ४१५. वासा. ४१६ घृषो. ४१७. ०द्भदः. ४१८. पिंडि०. ४१९. फलंमेवो०. ४२०. शलूक०. ४२१. पुलिंगोपिं. ४२२. ०र्जिज०. ४२३. सुवर्चिच०. ४२४. प्राहु. ४२५. अजकर्णाः. ४२६. ऽन्या. ४२७. ०कर्णस्या०. ४२८. छालो. ४२९. सिंहेके०. ४३०. वासा.

५४. अश्मन्तक इति । अम्ललोणिका—चाङ्गेरी । युग्मपत्र —पापहरः । 'अश्मन्तको युग्मपत्रः कुशली चाम्लपत्रकः । अश्मयोनि पापहरः श्लक्ष्णत्वक् मालुकाछद ' इति केयदेवः । 'स्यादश्मन्तकमुद्धाने मालुकाछदनेऽपि चे 'ति मेदिनी । उद्धानं[४३१]—चुल्ली । अङ्गारिकेति । दीर्घपत्रेकाण्डः[४३२]—इक्षुकाण्डः । किंशुकैकोरकः[४३३]—किंशुककलिका ।

५५. कुरण्टकः—पीतपुष्पः सहचरः । 'सैर्यकत्रितयं तुल्यं शमीकण्टकपत्रकैः[४३४] । भेदः पुष्पेषु ते पीतरक्तश्वेताः सगुल्मका ' इति । एकैषिका इति । पाठा—पापचेली । 'पाठातु स्यात्पापचेली व्यस्थिरैव प्रतानिनी । त्रिष्णुक्रान्तोपमापीलुफला मधुरपिच्छिले 'ति । सुषेणा—त्रिवृत् । 'सुषेणा तु त्रिवृद् वेधा कृष्णा रक्ता च वर्णतः । श्यामा तितीक्ष्णमा[४३५] । तन्मूले छिन्ने द्रवविमोचनां । मूलेषु प्रतिमूलानि रोकिण्यन्तर्भवन्ति चे 'ति । 'अङ्गारिका त्विक्षुदण्डे स्यात्पलाशस्य कोरके । अङ्गारकः सहचरप्रभेदे ' इति शाश्वतः । 'इक्षुकाण्डेऽङ्गारिका[४३६] स्यात्पलाशस्य च कोरके ' इति नाममाला । 'अङ्गारकः सैर्यकश्चे 'ति वोपालितः । 'एकैषिका सुषेणायां पापचेल्यामपि[४३७] क्वचिदि'ति हैमः । [ 23 b ]. कठिल्लक इति । पर्णासः—कुठिञ्जरः । 'क्षुद्रपत्रोऽर्जकः[४३८] कण्ठो वैकुण्ठस्तु कुठेरकः । पर्णासोऽन्यो बिल्वगन्धः श्वेतपर्णः कुठिञ्जरः[४३९] । वटपत्रो गन्धपत्रः कपित्थोऽर्जक इत्यपी ' ति केयदेवः । "ववरी" ति लोके ख्यातः । 'कुठेरस्तु मुखो[४४०] तुल्यौ तृणकौ मञ्जरीयुतौ । स्थिरौ सुगन्धीतीक्ष्णौ च तयोर्भेदः सितासितात् । उभावक्ष्यौ तादृशौ तु सुगन्धावल्पभित्समा ' इति । अत्र वर्षाभूः[४४१] क्षुद्रवर्षाभूः । 'अपरा क्षुद्रवर्षाभू[४४२] रक्तपुष्पा शितारका । कठिल्लको वर्षकेतुः क्रूरको रक्तवृन्तक ' इति केयदेवः । 'पुनर्नवाः[४४३]प्रसिद्धास्तु पूर्वा भूस्थाप्यधोरुणा । अन्या वाटदलो[४४४] भूस्था विषकर्पूरसंज्ञिता । पुनर्नवः पृथुदलो वृक्षमारुह्य चोर्ध्वगः[४४५] । पूर्वाभूस्थारुणसुमा श्वेताख्या सा महागुणे 'ति वाग्भटाचार्यः । 'लवपत्रा भवेद्वृभ्री वृत्तपत्रस्तु खर्परः । सरी विस्तीर्णवल्लस्या[४४६]न्मितपुष्पा पुनर्नवे'ति केचित् । कारवेल्लं—काण्डकटुकं[४४७] । 'कारवेल्लं[४४८] कठिल्लं च तत्काण्डकटकं तथे 'ति नाममाला । 'कारवेल्ल्यौ समे वल्ल्यौ किञ्चिच्छ्वेतफलापरा[४४९] । निर्गुणा वातला द्वे हि स्थिरेऽरण्यगते शुभे ' इति । "क रे ला " इति लोके ख्याता । [ 24 a ].

४३१. उद्वानं. ४३२. दीर्घ०. ४३३. किंशुक०. ४३४. समि०. ४३५. ?. ४३६. कांडेगां०. ४३७. चेल्यांमपि०. ४३८. पत्रोऽर्जक०. ४३९. कठिंजरः. ४४०. Perhaps a kind of bread-fruit-tree = लकुच. ४४१. वार्षाभूः. ४४२. बर्षाभू. ४४३. पुर्ननवा. ४४४. वाटदला. ४४५. चोर्ध्वगः. ४४६. ०वस्यामित०. ४४७. ०कटुक. ४४८. ०वल्लं. ४४९. किंचिच्छ्वेत.

५६. कर्कोटिकेति । मनोज्ञा—'विषकण्टकौ[४५०] वन्ध्या चे'ति **केयदेवः** । कर्कोटी[४५१] द्विविधा—अवन्ध्या वन्ध्या च । 'कर्कोटी कन्दिनीवल्ली प्रसिद्धान्याफलासुमा । प्रतिपत्रं[४५२] वन्ध्यकोषा वन्ध्यायां सा विषापहे[४५३]'ति । 'कर्कोटिका कन्दरजः कुलत्थे[४५४]'ति **विद्वद्वैद्यवल्लभा** । **केचि**त्कर्कोटकीत्याहुः । [४५५]बिल्वः—शाण्डिल्यः । 'त्रिपत्रः कण्टकी बिल्वः प्रसिद्धः[४५६] श्रीफलद्रुम' इति । 'कर्कोटकः—काद्रवेयप्रभेदे श्रीफलेऽपि चे'ति **लोचनः** । कालीयकमिति । कठिनी—दारुनिशा । '[४५७]प्रनिर्दिष्टा वै कठिनी स च कालेयकः स्मृतः' । 'कालीयको दारुनिशे'ति **रुद्रः** । हरिचन्दनं—पीतसारं । 'कालीयकं च पीतं स्यात्तथा नारायणप्रियं[४५८] । कालेयकं पीतसारं पीताभं हरिचन्दन'मिति **धन्वन्तरिः** ।

५७. काष्ठीलिकेति । वनजा—मुद्गपर्णी । 'मृगगन्धा शिम्बिपर्णी वनजा शिम्बिरिङ्गिणी'ति **केयदेवः** । 'मुद्गपर्णी यथार्थैव शरपुङ्खाभगुल्मकः । शम्बी क्षीरी च तत्पुष्पे'ति । वनजे[४५९]रम्भा—अरण्यकदली । कर्पासवद्बीजफला[४६०] काष्ठीका[४६१] जायते वन' इति **सिंहः** । [24 b]. मतः कुरबक इति । अम्लानभित् । अम्लानस्तु महासहा । 'तत्र शोणे कुरबक' **इत्यमरः** । तत्र अम्लानशोणे रक्तवर्णे कुत्सितः ईषद्द्रो[४६२]ऽलीनामल्पमकरन्द[४६३]त्वाद् द्रवोऽल्पक[४६४]मिति कुरबकः । 'तथा कुरबके रेफो निरुकारोऽपि युज्यते' इति **द्विरूपकोषः** । 'कुरवकारवकारणतां ययु' रिति **रघुः** । 'ईषद्रौति भङ्गे संज्ञायां कुन् । उवङउकारद्वयवानि'ति **मुकुटः**[४६५] । 'किरातिके कुरु कुरवकचिन्तां चिता'मिति **बाणभट्टः**[४६६] । झिण्टीभित्[४६७] । 'सैरेयकस्तु झिण्टी स्या'दित्य**मरः** । 'तस्मिन्कुरुबकोऽरुण' इति च । तस्मिन्सैरेयके—'सेरेयकः सहचरः सैरेयश्च[४६८] सहाचरः । पीतो[४६९] रक्तोऽथ नीलश्च कुसुमैस्तं विभावयेत् । पीतः कुरण्टको ज्ञेयो रक्तः कुरबकः[४७०] स्मृतः । नील आर्तगलो दासीबाणओदनपाक्यपी'ति । षष्ठिकभित् । 'गौरो महान्कुरबकः प्रमोदोऽशन[४७१]पुष्पकः । मुकुन्दः कालकः पीतः केदारस्तूर्णकाञ्चुकी' इत्याद्याः षष्ठिका इति **केशवः** । तत्र कुरुबकः 'कुरवकुसुमाकारशूक' इति **सिद्धमन्त्रप्रकाशः** ।

५८. कुरण्टक इति । कुरशब्दे बाहुलका[४७२]न्दटः स्वार्थे कन् इत्येकोकारवान् । 'कुन्दो माध्यः कुरण्टक' इति **रत्नकोषः** । 'कुन्दस्तु शीतेऽधोरुणकं सुम'मिति ।

---

४५०. ०कंटकाः. ४५१. ककर्की०. ४५२. अति०. ४५३. विषापहति. ४५४. कुलथे०. ४५५ ब for व. ४५६. प्रसिद्ध. ४५७. प्रनिर्द्दि०. ४५८. नाराथसाप्रियां. ४५९. वनत्त. ४६०. कदाला. ४६१. काष्टाला. ४६२. ईषंद्दा. ४६३. करंद०. ४६४. द्रवोत्रक०. ४६५. मुकटः. ४६६. वाणमदः. ४६७. झिटी. ४६८. सेरेयश्र च. ४६९. पातः. ४७०. कुरवः. ४७१. शन०. ४७२. ?.

पीताम्लानः—पीतमहासहा । ‘ तत्र पीते कुरण्टक ’ **इत्यमरः**[४७३] । तत्राम्लाने पीते पीतपुष्पे सामान्येनाम्लानमात्रेऽपि कुरण्टकः । ‘ स्यादम्लानः कुरण्टक ’ इति[४७४] **त्रिकाण्डशेषः** । [ *25 a* ]. ‘ किङ्किरातमुदितं कुरण्ट ’ इति **हलायुधः**[४७५] । पीताक्षिण्टी—पीता कुरण्टकभित् । ‘ तस्मिन्सहचरीद्वयो ’ **रित्यमरः** । कपीतनो—गर्दभाण्डः[४७६] परसाह्वयः पिप्पलभेदः । कोशातकीति[४७७] । पटोला—पटोलवल्ली । घोषकः—स्वादुकोशातकी । क्ष्वेडवेधः—कटुकोशातकी ।

५९. गवेधुकमिति[४७८] । गैरिकं—धातुः । तृणधान्यं—गोजिह्वाख्यं । गोधूमः—सुमनः । बला—महाबला । ‘ बला मरुगु . दीर्घाग्राङ्गुलिपत्रा सकण्टका । विटपः पिच्छिलो वाटौ[४७९] ( ? ) बला मुख्या तु सा मता ’ । ‘ महाबला—“ सहदेई ” इति च लोके । अत्र बलाभिद् वाट्यालकः । “ खिरहटी ” ति लोके । तदभावे क्षुद्र-बलारिपत्रा तृणका बहु ’रिति । तदभावे महाबलाभावे ।

६०. गाङ्गेरुकीति । काला—नागबला । ‘गाङ्गेरुकी विश्वदेवा काला नागबले-’ति **केयदेवः** । ‘ गाङ्गेरुकी नागबलाङ्गुलपत्रा[४८०] गिरौ दृढे ’ति । ‘ मृगलिण्डकं—गाङ्गेरुकीफल ’मिति **नान्यदेवः** । गोमेदकमिति । पीतरत्नं—पीतमणिः गोमूत्रवर्णं[४८१] पीतं चारुणिमायुक्तं गोमेद इति । काकोलो—विषं । पत्रकं—तमालपत्रम्[४८२] । [ *25 b* ].

६१. तिक्तशाक[४८३] इति । वरुणः—सेतुः । ‘ वरुणो वरुणः सेतुस्तिक्तशाकः कुमारक ’ **इत्यमरः** । वरुणः पादपस्तिक्तस्त्रिपर्णो भ्रमरप्रियः । बृहज्जम्बूदलो वृत्त-पत्रतुल्यफलः[४८४] सुमे[४८५] । कषायः श्वेतश्चे ’ ति । “ वरुणो ” इति लोके । खदिरो—बालपत्रः[४८६] । पत्रसुन्दरः—शाकभेदः । त्रिवस्तुकमिति । गोक्षुरस्त्रिकण्टः[४८७] । त्रिफला—उत्तमा । कटुत्रिकं—शुण्ठीमरिचपिप्पल्यः ।

६२. त्रिगन्धं—त्वक्पत्रैलं । तिन्तिडीकमिति । वृक्षाम्लं—रक्तपूरकं । ‘ वृक्षाम्लं तिन्तिडीकं च साम्लकं रक्तपूरक ’मिति **धर्मदासः**[४८८] । चिञ्चा—वक्रफला । ‘ तिन्तिडी चिञ्चाम्लिके ’ **त्यमरः** । दलाटक इति । स्वयञ्जाततिलो—वन्यतिलः । जर्तिला[४८९]—पर्यायः[४९०] । करिकेसरो—नागकेसरः ।

---

४७३. इत्यमेरः. ४७४. इतिक इति. ४७५. हाला०. ४७६. गर्द०. ४७७. कोशत०. ४७८. गवधुक०. ४७९. वौटा. ४८०. ०बलांगुला०. ४८१. ०मूल०. ४८२. जमाल०. ४८३. तिक्तगक. ४८४. ०पक्क०. ४८५. प्सुमे. ४८६. वाल०. ४८७. त्रिकटः. ४८८. धर्म्म०. ४८९. जर्त्ति०. ४९०. पर्य्या०.

६३. शिरीषो—भण्डी। गैरिकं—धातुः। कुन्दो—माघ्यः। फणिज्जको मरूकः। 'फणिज्जकस्तीक्ष्णगन्धो[४९१] मञ्जरीको दलाटक' इति **केयदेवः**। 'मरूकस्तृणकस्तत्त्वि'ति। 'दलाटकस्तु कुन्दे स्यात्करिकर्णशिरीषयोः। स्वयञ्जाततिले फेने स्नातके नागकेसरे। गैरिके चे'ति **विश्वः**। [26 *a*]. पिण्डीतक इति। मरुबकः[४९३]—फणिज्जकः। 'पिण्डीतकः फणिज्जके तगरे मदनद्रौ चे'ति **हैमः**। 'पिण्डीतको मरुबको मरूकश्च फणिज्जक' इति **धर्मदासः**[४९४]। तगरं—वक्रं शकावनौ। उत्तरे चारिदलकं सुगन्धि सलिलान्तिकं तृणकं चे'ति। मदनो—राठः।

६४. पुण्डरीकमिति। सिताम्भोजं—श्वेतपद्मं। वालुकाख्यविषं—विषभेदः। 'अहिच्छत्रो मेषशृङ्गः कुष्ठवालुकनन्दनाः। मुस्तकोद्दालवाख्याश्च स्थावरा विषजातय' इति **हैमः**। सहकारफलमतिमुरसाम्रफलं। 'वसन्तदूतमाकन्दसाहारपिकबन्धवः[४९५]। सहकारेऽस्य तु फलं पुण्डरीकमितीरित'मिति **सिंहः**। दमनः—पुष्पचामरः। दोनाः "मरुवा" इति लोके। 'सर्वाङ्गसुरभिः[४९६] पुष्पादिवर्जितश्च[४९७] साहजिकरूपवत्या वपुषि भवत्याविभूषणं भारः सर्वाङ्गे सौरभिण्या दमनकवन्याः किमालिकुसुमेने'ति **कश्चित्**। अत्र शालिभित्—पुण्डरीककुसुमाकारशूकः शालिः। 'पुण्ड्रः पाण्डुः पुण्डरीकः प्रमोदो गौरशालिक' इति **वाग्भटाचार्यः**। [26 *b*].

६५. *भण्डीरिकेति। लोहिता—मञ्जिष्ठा। तण्डुलीयकाभिद्[४९८]—मेघनादः। "चौलाई" इति लोके। भिरिण्टिकेति। पयस्याभित्—स्वल्पदुग्धिका[४९९]। काकणन्ती—गुञ्जा। 'गुञ्जाचूडामणिस्ताम्रा रक्तिका काकणन्तिका। अन्या श्वेता श्वेतपाकी चक्रशल्या [५००]भिरिण्टिके'ति **केयदेवः**।

६६. मरुबकं[५०१] इति। पुष्पभेदः[५०२] मरुबकनाम्नैव विख्यातः। करघाटो—राजफलं[५०३]। 'करघाटो मरुबकः पिण्डी[५०४] पिण्डीतकः फल'मिति **केयदेवः**। फणिज्जो—मरूकः। 'मदनद्रौ मरुबकः[५०५] पुष्पभेदे फणिज्जके' इति **लोचनः**। मयूरक इति। शैखरिकः—किणिही। 'अपामार्गस्तु शिखरी प्रत्यक्पुष्पा मयूरकः। अधःशल्योऽथ किणही दुर्ग्रहा खरमञ्जरी'ति **धन्वन्तरिः**। अपामार्गस्तृणवत् सिद्धो द्रुमञ्जरिः स्थिरः। दिग्रक्तदलकश्चेति। शिखिग्रीवं—'तुत्थं वितुन्नकं चापि शिखिग्रीवं मयूरक'मिति

---

४९१. तीक्ष्णांघो. ४९२. दलाटका. ४९३. ब for व. ४९४. धर्म्म० ४९५. वंधवः. ४९६. सर्वांग. ४९७. ०वर्जितत०. * भण्डारिका in the text. ४९८. तंडुलीक०. ४९९. ०दुग्धिका. ५००. भेरि०. ५०१. मरुक०. ५०२. पुष्पभेदेः. ५०३. राज०. ५०४. पीडि०. ५०५. मरुबच.

**धर्मदासः** । 'ताम्रकिट्टं तु कृतकं तुत्थमि'ति । दीप्यकोऽजमोदा । 'अजमोदाप्युग्र[५०६]गन्धा मोदा हस्तिर्मयूरक 'इति **मदनविनोदः** । 'अजमोदा वस्तमोदा मोदा हस्तिर्मयूरक' इति **धन्वन्तरिः** । 'मयूरकोऽप्यपामार्गे तुत्थके तु मयूरक 'मिति **विश्वः** । [27 *a*].

६७. मधूलक[५०७] इति । अजोर्तमद्यं[५०८]—अपरिणतं मद्यं । 'सर्वं मद्यमसञ्जातं मधूलकं इति स्मृत 'मिति **केयदेवः** । दीर्घपत्रो—गिरिमधूकः । 'जलजेऽत्र मधूलक' इत्यमरः । 'गिरिज 'इत्येत्र पाठः साधीयानिति **सुभूत्यादयः** । 'गौरशाकौ मधूकोऽन्यो गिरिजः सोऽल्पपत्रक' इति **माधवः** । **स्वामी** तु 'जलज' इत्याह । 'मधूकोऽन्यो मधूलस्तु जलजो दीर्घपत्रक' इति । 'निःशूकदीर्घगोधूमः सूक्ष्मो नन्दीमुखी तथा । मधूलिका चे 'ति **केयदेवः** । अंभोजा[५०९]—जलयष्टीमधु । 'यष्टयाह्वं मधुकं यष्टी चान्याम्भोजा मधूलिके'ति **हृदयदीपकः** । मधुरसा—मूर्वा । 'मूर्वा मधुरसा देवी मधुपर्णी मधूलिके[५१०] 'ति **धन्वन्तरिः** । 'मूर्वा सपीलुर्वीरुच स्वाद्वहिंस्रासुमा ध्रुवे 'ति ।

६८. मुरङ्गिकेति । काकनासा—जीवनीया । 'काकनासा तु काकास्या जीवनीया मुरङ्गिके 'ति **केयदेवः** । देवश्रेणी—मूर्वा । 'मूर्वा मुरङ्गिका देवी देवश्रेणी पृथक्त्वचे'ति **केयदेवः** । सुभञ्जनः—शोभाञ्जनः[५११] । [27 *b*]. मृणालकमिति । वीरतरं—वीरणमूलिका । 'बहुमूलं वीरतरममृणालं मृणालक'मिति **धर्मदासः** । 'उशीरं वीरणीजटा[५१२] काशवत्सा तृणानूपे स्थिरे 'ति । पद्मनालं—पद्मदण्डः । वितुन्नकमिति ।

६९. कुस्तुम्बरी—धनिका । 'कुस्तुम्बरी[५१३] वेषणाभा कटुःसार्द्राद्रिकाऽलका । धनिका धानिका धानी धान्यं धाना वितुन्नक ' मिति **केयदेवः**[५१४] । भद्रमुस्तं—नागरमुस्ता । विश्वक्पर्णी[५१५]—भूधात्री । 'वितुन्नका[५१६] जटामाला विष्वक्पर्णी—शुभाङ्गिनी 'ति **केयदेवः** । 'पाण्डु सिद्धा[५१७]ऽटी धात्री भूपूर्वा दलसस्यिनी'ति । 'वितुन्नकं च धान्याके जटामाला मयूरके ' इति **विश्वः** । मयूरकं—तुत्थं । 'तुत्थं मयूरकं चापि शिखिग्रीवं मयूरक ' मिति **धर्मदासः**[५१८] । विषाणिकेति । मेषशृङ्गी—चर्मरङ्गा । 'श्रीवृक्षो मेषशृङ्गी च वस्तशृङ्गी च शृङ्गिका । वृश्चिकाली मेढ्रशृङ्गी कूर्चपर्णी विषाणिके'ति **केयदेवः** । "मे टि आ ड लि" इति [५१९]**गुर्जराः** । "स न्ना इ मक्क ई" इति **पाश्चात्याः** । 'आवर्त्ती गुलमका पीतपुष्पा शम्बा त्रिधा च ।

५०६. न्युग्र०. ५०७. मधूक. ५०८. अजामद्यं. ५०९. अंमौजा. ५१०. मधुलि०. ५११. शोभाजनः. ५१२. वीरारणी. ५१३. कुस्तुवरी. ५१४ केदेवः. ५१५. विष्व०. ५१६. वितुभ्रका. ५१७. रटी०. ५१८. धर्म०. ५१९. गूज्जराः.

पङ्क्तिपत्राः प्रसिद्धास्ता मेढ्रा वल्ल्यादयोऽत्र त्वि 'ति । काकोली—मेदुरा । काकोली मधुरा शुक्ला क्षीरा मत्स्यण्डिका मता । मेदुरा जीवनीया च वीरा धीरा च सा मते 'ति **धन्वन्तरिः** । कर्कटाह्वयं । 'शृङ्गी कर्कटशृङ्गी च कुलिङ्गी कर्कटाह्वये 'ति **धन्वन्तरिः** । अथ शृङ्गिकां[५२०] कर्कटाख्यारिपत्राग्राः पादपाः समिदाश्रयाः प्रन्ययः कर्कटास्तस्य शृङ्गाणी 'ति ।

७०. वृषो—वासा । [ 28 a ]. शीतपाकीति । बला— वाट्यालकः । रक्तिका—गुञ्जा । सोमवल्क इति । कटुफलं—कट्फलं । कदरः—सितखदिरः । 'कदरः—खदिरे सिते सोमवल्कोऽपी 'त्यमरः । घृतपूरकः—करञ्जः ।

७१. सौगन्धिक इति । रुचकं सौवर्चलं । सौवर्चलं हृद्यगन्धं सुगन्धं रुचकं स्मृतं । 'सौगन्धिकं च जरणमक्ष'मिति **केयदेवः** । कल्हारं—सन्ध्याविकासि पद्मिनीपुष्पं । सूपधूपनं—हिङ्गु । देवजग्धं—रौहिषं । 'कतृणं रौहिषं देवजग्धं सौगन्धिकं तथे 'ति **भावमिश्रः** । पद्मरागः—शोणमणिः । लेलीतको—गन्धपाषाणः । 'गन्धकलेलीतकौ गन्धः वैगन्धिकसौगन्धिकगन्धोपलगन्धपाषाणा ' इति **हृदयदीपके[५२२]ः** ।

७२. कपं । अथेक्षुवालिकेति । काशः—इक्षुकाण्डो । 'वायसेक्षुः सुकाण्डश्चेक्षुवालिके 'ति **केयदेवः** । "का श" इति लोके । क्षुरकः—कोकिलाक्षो । 'भिक्षुरिक्षुवालिका तिलकण्टक ' इति **केयदेवः** । इक्षुभित्—पौण्ड्रकः । कान्तारेक्षुवालिकेक्षुगन्धनेपालशैत[५२३]पर्वकह्रस्वपर्वकवांशिकनीलयष्टिकाद्या इक्षुजातयः । शरेक्षुकुशकाशालयश्च प्रसिद्धकाः । 'वंशो दूर्वा च दोला च विषवर्ग[५२४]स्य पञ्चकमि 'ति । [ 28 b ]. स्यात्क्रे[५२५]मिकण्टकमिति । चित्रा—दन्ती । विडङ्गः कृमिशत्रुः । उदुम्बरो[५२६]—जन्तुमत्फलः । 'विष्वक्[५२७]प्रसिद्धौ[५२८] न्यग्रोधोदुम्बरप्लक्षपिप्पलाः क्षीरितरैव[५२९] ' इति ।

७३. भवेज्जलकरङ्क इति । पुटोदकं[५३०]फलं—नालिकेरफलं । 'स्त्री लाङ्गली लाङ्गलं च त्रिनेत्रो मात्कुणो जटी । हली पुटोदकः[५३१] कूर्चकेसरश्च कलिङ्गकः । फलं जलकरङ्कस्ये 'ति **सिंहः** । अम्बुदो—मुस्ता । कम्बुः—शङ्खः । 'शुक्तिशङ्खनिका शङ्खो वराटाश्चाप्यनेकधा । सिन्धुजाश्च सरोजाश्च चक्षुस्यत्वादिहोदिता ' इति । जललता[५३२]—जलनाली । अथ प्रतिविष्णुक इति ।

---

५२०. शृंगीका. ५२१. विकाशि. ५२२. दपकः. ५२३. शैत. ५२४. विश०. ५२५. क्रिमि०. ५२६. रुदुंव ो. ५२७. विषक्? ५२८. प्रासि०. ५२९. तर इति. ५३० पुरो०. ५३१. ०पुग्रदकः. ५३२. जलता.

७४. [५३३]क्षीरिणी–क्षीरी। राजादनतरुः। अल्प[५३४]क्षीरी [५३५]क्षीरिणी। 'राजाह्वः क्षीरभृत्क्षीरी 'ति [५४१]केयदेवः। 'क्लीबपुंसोरपि[५३६] क्षीत्वं काप्यल्प[५३७]त्वविवक्षये 'ति **मेदिनी**। 'मु[५३८]चुकुन्दो–म[५३९]दनको राजन्यः क्षत्रपा[५४०]दपः। इक्ष्वाकुः श्रीक्षीरफलश्चिबुकः प्रतिविष्णुक ' इति **केयदेवः**। 'मुचुकुन्दः क्षत्रवृक्षश्चिबुकः प्रतिविष्णुक ' इति [५४२]**मदनपालः भावमिश्रश्च**। 'प्रलेपादिना शि[५४३]रोऽर्तिहारी दीर्घवाट[५४४]दलः पीतसुमः पुष्पमात्रोपयोगी मु[५४५]चुकुन्दनाम्नैव[५४६] प्रसिद्धः।' [ *29 a* ]. अथ व्रीहिराजक इति। कङ्गुधान्य चीनाकधान्ये तृणधान्य[५४७]वर्गे प्रसिद्धे। "कां गु नी ची ना" इति लोके। शतपर्वक इति।

७५. वेणुर्वंशः। इक्षुभित्–शतपर्वकनाम्नैव ख्यातः। 'शतपर्वककातार-नेपालाद्यास्ततः क्रमा 'दिति **वाग्भटाचार्यः**। षड्ग्रन्था–वचा। अथ 'वचानूपेम्बुगा कटुः। तन्विक्षुपत्रा भूवाल्लुमध्यरथा पर्विणी पृथुः। अपुष्पफलिका चे 'ति। नीलदूर्वा–शा[५४८]द्वलं। 'नीलदूर्वा स्मृता शष्पः शाद्वलं हरितस्तथा। शतपर्वा शीतवीर्या शीत-वल्लासिता लते 'ति [५४९]**धन्वन्तरिः**। स्वादुकण्टक इति। क्षुरो–गोक्षुरः। 'गोक्षुरः स्याद्गोक्षुरको प्र[५५०]क्षुरः स्वादुकण्टक ' इति **धन्वन्तरिः**। 'क्षुरः कोकिलाक्षे च गोक्षुर ' इति **विश्वः**। कोली–बदरी। 'कोली कण्टकिनी सिद्धा बदरं तत्फलं च तत्। द्वयं प्रसिद्धं च तयोर्ल[५५१]घुशुष्कं च सद्गुणं। कर्कन्धुर्महता तत्रे 'ति। 'बदरं कोलकंकालं सौवीरः फेनिलं कुन्दं। '[५५२]कर्कन्धुः कन्दुकः स्वादुकण्टः सिञ्चितिको गुडे 'ति **धन्व-न्तरिः**। विकङ्कतो–यज्ञपादपः। 'व्याघ्रपादःस्रुवतरुः स्वादुकण्टो विकङ्कत ' इति **केयदेवः**। 'अथ स्यात्स्वादुकण्टकः। विकङ्कतः स्रुवावृक्षो ग्रन्थिलो व्याघ्रपादप ' इत्य[५५३]**मरः**। वृक्षकण्टकारिके[५५४] इति **डल्लणः**। "उ ह्र कं ट क" इति लोके। [ *29 b* ].

७६. स्याद्धेमपुष्पिकेति। यूथी–बालपुष्पा। सा चात्र पीता बोध्या[५५५] स्वर्ण-वर्णपुष्पत्वात्। चम्पको–गन्धफली। कषट्। प्रावृषायणिकेति। यूथी–बाणपुष्पा।

---

५३३. क्षीरिणीः. ५३४. क्षीरि. ५३५. क्षीरेणीः. ५३६. रमि०. ५३७. वेवक्षये०. ५३८. मुचिलिंदो. ५३९. मदनको. ५४०. क्षत्रपादयः. ५४१. केयसुमः. ५४२. मदपालः. ५४३. शिरो आर्ति०. ५४४. दल. ५४५. मुचु०. ५४६. नाम्लैव. ५४७. वेर्गे. ५४८. शोद्वलं. ५४९. The reading in धन्वंतरि is : 'नीलदूर्वा स्मृता शष्पं शाद्वलं हरितं तथा। शतपर्वा शीतवीर्या शतवल्ल्यपि शीतला.' ५५०. For प्रक्षरः धन्वंतरि has मक्षकः. ५५१. र्घु. ५५२. कर्कंधुः. ५५३. पादपात्यमरः. ५५४. ०कारिकोत्ति०. ५५५. म substituted for व.

कण्डूरा—कपिकच्छू[५५६]: । जटिला—मांसी । ‘ मांसी माता भूतकेशी[५५७] नलदं जटिला जटा । सुलोमशा मखी हिंस्रा क्रव्यादी पिशिनी शिखे’ति [५५८]केयदेवः । ‘ अथ विच्छिन्नदलः[५५९] श्वेतः[५६०] सुलोमशः मृदुः सुगन्धिस्तृणको दलतो गुच्छको[५६१]ऽपि च ’ ।

७७. मुखशोधनकमिति । भव्यं—कर्मरङ्गफलं । ‘ भवं भव्यं भविष्यं च भावनं[५६२] मुखशोधनमि ’ति केयदेवः । ‘ ग्रन्थिलं प्रोक्तं[५६३]चम्पकाभदलोऽम्लमधुरो विटः । पलपात्रं सितं पक्व’मिति । “ क म र ख ” इति लोके । नागवल्लीदलं—ताम्बूलीदलं । लवं—लवङ्गं । ‘ लवङ्गं देवकुसुमं भृङ्गारं शिखरं लव ’मिति केयदेवः । ‘ वल्ली लवङ्गका नागवल्ली वक्षितपुष्पिका । गन्धिनी चे ’ति । मुखमण्डनकमिति । धूम्रवर्णस्तुरुष्कः । ‘ तुरुष्कः सिल्हको धूम्रो धूम्रवर्णश्चलः कपि ’रिति केयदेवः । गान्धिकद्रव्यं शिलारस इति प्रसिद्धं । ‘ तुरुष्कः सिल्हको धूम्रो मुखमण्डनकस्तथे ’ति नाममाला । तिलकद्रुमः—श्रीमान् । ‘ तिलकः क्षुरकः श्रीमान् चित्रको मुखमण्डन ’ इति धन्वन्तरिः[५६४] । [ *30 a* ].

७८. हिङ्गुनिर्यासक इति । पारिभद्रो—निम्बः । ‘ अरिष्टः सर्वतोभद्रः सुभद्रः पारिभद्रकः । छर्दिघ्नो हिङ्गुनिर्यासः प्रियशालो रविप्रिये[५६५] ’ इति धन्वन्तरिः । हिङ्गु—सूपधूपनं । कान्ताः । [५६६]खद्गिः । शङ्ख इति । नखः—शुक्तिः । ‘ शङ्खः शफः खुरः शुक्तिः शिल्पी नागहनुर्हनु ’रिति केयदेवः । ‘ नखद्वयं समुत्था जेतवो नेहताः ( ? ) शकैः । बृहन्तोलयवो ( ? ) द्वेधा यन्नखाभा नखा इती ’ति । कम्बुर्[५६७]वारिचरः । ‘ शङ्खो वारिचरः कम्बुर्जलजो दीर्घनिस्वन ’ इति धर्मदासः[५६८] । शिखेति । मांसी—भूतकेशी । ‘ मांसी माता भूतकेशी क्रव्यादी पिशिनी शिखे ’ति धर्मिष्ठः । विशल्या—लाङ्गली[५६९] । ‘ कलिकारी वह्निमुखी प्रदीप्ताग्निशिखा शिखे ’ति केयदेवः । ‘ लाङ्गली तृणकान्दिन्यरुणोरुसुमा सिता । आर्द्रकानुदला चे ’ति । “ क लि हा री ”ति लोके ।

७९. सुखमिति । ‘ ऋद्धिर्वृद्धिर्युगं तुष्टिराशीः सर्वजनप्रिया । ‘ ऋषिसृष्टा[५७०] सुखं चाथ वृद्धेरप्यह्वया अमा ’ इति केयदेवः । ‘ ऋद्धिवृद्धी प्रतानिन्यो निम्बजीवन्तिका दले । स्वादू साधारणे वृद्धिः । क्षीरिण्यथापि [५७१]पिच्छिले ’ति । ‘ऋद्धिर्दक्षिणावर्ती[५७२]

---

५५६. ०कच्छूः. ५५७. ०कशी. ५५८. केयदव. ५५९. विछिन्न०. ५६०. श्वेताः. ५६१. गुछकोपि. ५६२. भावं न. ५६३. प्राक्तंपकाभ०. ५६४. धन्वंतरि ॥ श्रीरस्तुः ॥. ५६५. रबि०. ५६६. खद्वि. ५६७. ब for व. ५६८. धर्म्म०. ५६९. लांगला. ५७०. ऋष्यि. ५७१. पिछि०. ५७२. ०वर्त्ता.

वृद्धिर्वर्मावर्ता' इति कश्चित्। 'वालकं वारिसिद्धा चाम्बुदवालका'विति।[५७३] [30 b]. खच। अग्निशिखेति। कलिकारी–लाङ्गली। कुङ्कुमं–बाल्हीकं। कुसुम्भं[५७४]–वस्त्ररञ्जनं। 'अथाग्निशिखमुद्दिष्टं[५७५] कुसुम्भे कुङ्कुमेऽपि चे'ति मेदिनी।

८०. अग्निमुखीति। भल्लातोऽरुष्करः। गर्भपातिनी–कलिहारी। इन्दुलेखेति। सोमलता–सोमवल्ली। 'सोमवल्ली धन्वतरुर्यज्ञनेता द्विजप्रिया[५७६]। पक्षपत्रो महार्घोऽन्यो महागुल्मो मखप्रभुः। श्येनाहृतस्तस्यभेदा विंशतिश्चतुरुत्तरा' इति केयदेवः। गुडूची–वत्सादनी। वाकुची–मलिना।

८१. नन्दीमुखीति। कर्मास्या–छादनफला। स्वल्पगोधूमभित्–स्पष्टं। खान्ताः। [५७७]गद्विः। तुङ्गीति[५७८]। निशा–हरिद्रा। [५७९]बर्बरा–कबरी। पद्मकेसरः–पद्मकिञ्जल्कः। 'पद्मं शरदि दृश्यते' इति।

८२. पवित्रपत्रा–शमी। 'प्रसिद्धैव शमीतरु' रिति। [५८०]चोचं–लाङ्गली। 'नालिकेरो तालवृक्षो[५८१] दृढबीजो महाफलः। तुङ्गः स्कन्धफलश्चोचस्तृणराजः सुतुङ्गकः। दृढवृक्षो दृढफलो लाङ्गली कूर्चकेसर' इति केयदेवः। "ना र्य र" इति लोके। केसरः–करिकेसरः। [31 a]. नाग इति। [५८२]तालेति–ध्वजद्रुमः। भद्रमुस्तं–नागरमुस्ता। पुन्नागः–काष्टचम्पकः। नागकेसरः–करिकेसरः।

८३. पुत्रजननी–'लक्ष्मणा[५८३] तु जलाम्यर्णा वल्ली नाडी दलादले। शोणा नाकृतिधृक् स्वादुः क्षीरिणी मृदुशोषिरे'ति। भावमिश्रस्तु–'पुत्रकाकाररक्तालपबिन्दुभिर्लाञ्छिता सदा। लक्ष्मणा[५८४] पुत्रजननी वस्तगन्धाकृतिर्भवेदि'ति। सीसकं–'द्रुतद्राव-महाभारं छेदे कृष्णसमुज्ज्वलं[५८५]। पूतिगन्धं बहिः कृष्णं शुद्धं सीसमतोऽन्यथा अशुद्ध' मिति। रङ्गं–वङ्गं। 'खुरकं मिश्रकं चेति द्विविधं वङ्गमुच्यते। [५८६]खुरं तत्र गुणैः पूतिगन्धं श्रेष्ठं मिश्रकं[५८७] न हितं मत'मिति। पिङ्गमिति। वालकं–ह्रीवेरं। शमी–पवित्रपत्रा। रामठं–हिङ्गु।

८४. रोचना–गोरोचना। हरिद्रा–निशा। पूग इति। क्रमुकः–घोण्टा। तूदं–ब्रह्मनिष्ठं। भृङ्गमिति। नखः–व्याघ्रनखः। त्वचा–त्वक्। भृङ्गारको–भृङ्गः।

५७३. ॥ श्रीरस्तुः ॥. ५७४. कुसुंभ. ५७५. ०मुदिष्टं. ५७६. द्विजलिया. ५७७. गद्वि. ५७८. तुङ्गीति. ५७९. ब for व. ५८०. On the word चोचं there is the sign = and what is given in quotation marks after लांगली upto लोके is written in the open space below. ५८१. लता०. ५८२. तालेतो. ५८३. लक्ष्मणांभु. ५८४. लक्ष्मण. ५८५. समुज्वलं. ५८६. खुरं. ५८७. मिश्रकं.

'भृङ्गारको भृङ्गराजो भृङ्गारो भृङ्ग एव चे'ति **धर्मिष्ठः**। 'ये मासमेकं प्रपिबन्ति चूर्णं दिने दिने भृङ्गरजः सैमुत्थ[५८८] 'मिति। 'सान्तोऽपि कृष्णस्वरतकः पादाङ्गुलिपत्रा बटुस्तृणः भृङ्गः प्रसिद्धो गन्धाऽग्रतिक्तः कर्कराकः स्थिरः तन्वङ्गुलिदल' इति।[*31 b*]. मार्ग इति।

८५. आघाटः। 'किणीहि मार्ग' इति **केयदेवः**। 'मृगनाभिर्मृगमदो मृगः कस्तूरिकापि चे'ति **माधवः**। 'मृगाः शृंगालैर्[५८९]वेद्रोटे[५९०] निर्विषाणां[५९१]हिसन्धयः। तेषां नाभिस्तु कस्तूरी सिद्धे'ति। युगेमिति[५९२]। ऋद्धिवृद्धी—ऋषिसृष्टे। वङ्गमिति। सीसकं—भुजगं। रङ्गं—त्रपुः[५९३]। वयनीफलं—कर्पासः। वार्ताकः[५९४]—वातिङ्गणः।

८६. अथ वेग इति। महाकालफलं—शम्पाकः। मेघनादः। "चौ ला ई" इति लोके ख्यातः। अथ शृङ्गीति। आम्रातो—मन्मथोद्भावनः। वटो—रक्तफलः। पिप्पलश्चलदलः।

८७. पर्कटी—पाकलिः। 'पर्कटीप्लक्षपाकल्यो'रिति **विश्वलोचनः**। अथ शृङ्ग इति। भूस्तृणं—मालातृणं। 'मालातृणं भूस्तृणं द्वे शतपुष्पोग्रगन्धिनी'ति **सिंहः**। जीवकः—ह्रस्वाङ्गः। 'शृङ्ग-ह्रस्वाङ्गजीवका' **इत्यमरः**। विषा—अतिविषा[५९५]। 'सितासितारुणैः कन्दैस्[५९६]त्रिविषं[५९७] तृणिकं गिरावि'ति। ऋषभो—दुर्धरः। 'ऋषभो वृषपर्णस्तु काष्ठी क्षीरी विटो स्थिर'इति। 'ऋषभेऽतिविषायां[५९८] च शृङ्गी'—**मद्गुरुवल्लभेत्युभयत्र रुद्राजयौ**। शिवा—हरीतकी[६००]। 'वासादलो द्रुमोऽद्रिस्थः फलं तस्य हरीतकी'। मेषशृङ्गी—वत्सशृङ्गी। "स न्ना रम की"ति लोके। कर्कटी—कर्कटशृङ्गी।

८८. गत्रिः।[*32 a*]. कलिङ्ग इति। लाङ्गलं—त्रिनेत्रः। 'श्री लाङ्गली लाङ्गलं च त्रिनेत्रो मत्कुणो जटी। 'हली पुटोदकः कूर्चकेसरश्च कलिङ्गक' इति **सिंहः**। गौरः—करञ्जः। 'करञ्जः करजो गौरो नक्तमालश्च स स्मृत' इति **नाममाला**। कुटजो—वत्सकः। तद्यवः—इन्द्रयवः। 'कलिङ्गेन्द्रयवः पुमानि'त्यमरमाला। कालिङ्गीति। राजकर्कटी—कर्कारू। 'कर्कारू राजकर्कटी'ति **केयदेवः**। "ख र बू जा" इति लोके। भूमिककारुः—कलिन्दकं। 'कलिङ्गो भूमिककारी दन्ताबैलभुजङ्गयोः[६०२]। कौलिङ्गी[६०३] राजकर्कट्या'मिति **मेदिनी**। 'दीर्घा तु कर्कटी गाङ्गी खर्बूजं वर्तुलं[६०४] हि यत्। रक्तबीजं तत्कलिङ्गं कलिन्दं फलैर्वर्तुल[६०५]'मिति **सिंहः**।

---

५८८. समुत्थ०. ५८९. शृगाल०. ५९० च ? द्रोटे. ५९१. निनिर्विषाणां. ५९२. युगमिति. ५९३. त्रनु. ५९४. वार्ताकः. ५९५. अतिविषा. ५९६. कदै. ५९७. विषं. ५९८. विषायां. ५९९. मद्गुरु०. ६००. हरातकी. ६०१. बल. ६०२. भुजंगयो. ६०३. कालींगी. ६०४. वर्तुलं. ६०५. वर्त्तल.

८९. कुरङ्गीति । मुद्गपर्णी—मृगगन्धिका । मदनद्रुमो—राठः । चक्राङ्गीति । कटुरोहिणी—कट्वी । मञ्जिष्ठा—समङ्गा ।

९०. त्रिवर्ग इति । त्रिजातं—त्वक्पत्रैलं । त्रिफला—विभीतकामलकहरीतक्यः । त्रिकटु—शुण्ठीमरिचपिप्पल्यः । द्विजाङ्गीति[606] । कटुका—मत्स्यपित्ता । तुम्बी—अलाबूः[607] । 'द्विजाङ्गी स्यान्मत्स्यपित्ताऽलाबो'रिति **वोपालितः** । [ *32 b* ]. नारङ्ग इति । पिप्पलीरसः—प्रसिद्धः ।

९१. नागरङ्गस्तक्रवासनः । 'नागरङ्गश्च नारङ्गो नार्यङ्गस्तक्रवासनः । ऐरावतश्च सैव स्यान्नादेयी भूमिजम्बुके'ति **सिंहः** । पत्राङ्गमिति । पद्मकं—पद्मकाष्ठं । 'पद्मकं सूक्ष्मविच्छिन्नपत्रोऽदौ पादपोफलः कषाय' इति । रक्तचन्दनं—पट्टरञ्जनं । 'रक्तद्रव्ये गन्धहीने रक्ते चन्दनसंनिभे । रक्तचन्दनपत्राङ्गषडङ्गानि नपुंसक'इति **सिंहः** । 'पत्राङ्गं न द्वयोर्भूर्जे[608] पद्मके रक्तचन्दने'इति **मेदिनी** । 'पतङ्गे रक्तसंज्ञश्च द्वयं रोहितकच्छद'[609] इति । भूर्जो[610]—लेख्यपत्रः । 'तरुर्भूर्जो[611] लेख्यपत्रोऽसुमोऽल्पकफलत्वचः । भूर्जो[612]ऽन्यः स्यात्सारदारुरेकः शालस्तयोः सित' इति । पराग इति । सुमनोरेणुः—कुसुमरजः । 'मज्जासारो ग्रन्थपरुः परागः कुसुमरेणु'रिति पुंस्काण्डे **रत्नकोषः** । पर्पटो—रजः । चन्दनं—श्वेतचन्दनं ।

९२. पतङ्ग इति । शालिभेदः—पतङ्गनाम्नैव ख्यातः । 'पतङ्गास्तपनीयाश्च ये चान्ये शाल्यः शुभा' इति **वाग्भटः** । 'कुङ्कुमापरपर्याय' इति **सिद्धमन्त्रप्रकाशः**[613] । 'पतङ्गः शलभे शालिप्रभेदे विहगे रवौ । पतङ्गं पारदे क्वापी'ति **विश्वः** । 'पतङ्गं रक्तचन्दनं कुचन्दनं चे'ति **सिंहः** । 'पतङ्गं पद्मरागं स्याद्रक्तकाष्ठं कुचन्दनं । सुरङ्गकं[614] जगत्यांहुः[615] पत्तूरं पट्टरञ्जन'मिति **मदनविनोदः** । पत्तूरं—पट्टरञ्जनं । 'कुचन्दनं रक्तकाष्ठं पत्तूरं पट्टरञ्जन'मिति **केयदेवः** । सूतः—पादपः ॥ [ *33 a* ]. प्रियङ्गुरिति । पिप्पली—मगधा । कङ्गुस्तृणधान्यं[616] । राजिका—आसुरी । फलिनी—महेला ।

९३. पुन्नाग[617] इति । पाटलापुष्पो—देववल्लभः । 'पुन्नागः पाटलापुष्पः केसरो देववल्लभ' इति **धर्मिष्ठकेयदेवौ**[618] । जातीफलं—जातिसस्यं[619] । सितोत्पलं—सितपङ्कजं । वराङ्गमिति । त्वक्—चोचं । कङ्कुष्ठं—काककुष्ठं । मूषिकाभिद्—द्रवन्ती ।

---

६०६. द्विजाङ्गा–Text. ६०७. तुंबी-अलावू:. ६०८. भूर्ज्जे.
६०९. रोहितकछद. ६१०. भूर्ज्जो. ६११. भूर्ज्जो. ६१२ भूर्ज्जोन्यः.
६१३. सिद्धत्रप्रकाशः–मं–omitted. ६१४. सुरंगकं. ६१५. जगत्याहुं. ६१६. ०धान्यां.
६१७. पुन्नाग. ६१८. धर्म्मिष्ट०. ६१९. ०सस्यं:.

९४. मुरङ्गीति । उपोदकी[६२०]–पोतकी । 'उपोदकोर्ध्वगा[६२१] वल्ली पिच्छिलच्छेदना[६२२] स्थिरा । वृत्तपत्रा रक्तदण्डा रक्तबीजरसा च से 'ति । काका–चोरस्नायुः । मूर्वा–मधुरसा । शोभाञ्जनः–सुभञ्जनः । 'तरुणीजन इवाधिगतशोभाञ्जनो वसन्तसमयः प्रादुरासीदि' त्याश्चर्यमञ्जरी । 'त्रयोदशैस्त्राद्यं[६२३] च शोभाञ्जन उदाहृत'इति **द्विरूपकोषः** । यज्ञाङ्ग इति । किंशुकः–पलाशः । दर्भः–कुशः । तिलस्तैलफलः । उदुम्बरो[६२४]–जन्तुमत्फलः । पिप्पलः–चलदलः ।

९५. यवः–शूकधान्यं । सक्तुफला–शमी । बालपत्रः[६२५] खदिरः । सर्पिर्घृतं । रक्ताङ्ग इति । रञ्जनः–कम्पिल्लः । चित्रश्चित्रकः । 'चित्रको लोहिताङ्गश्च हुतभुक्पावकोऽनल ' इति [६२६]**धर्मिष्ठः** । विद्रुमो–प्रावबल्लरी । असृक्[६२७]–कुङ्कुमं ।

९६. जीवनी–जीवती । जिङ्गी–मञ्जिष्ठा । रथाङ्गमिति । नेमिस्तिनिशः । 'पुल्लिङ्गस्तिनिशे नेमिश्चक्रप्रान्ते स्त्रियाम्[६२८] 'मिति **रुद्रः** । योग्यं–ऋद्धिः । 'तिनिशे योग्यसंज्ञेऽपि रथाङ्ग 'मिति **मेदिनी**[६२९] । [33 b]. समङ्गेति । रक्तपादी[६३०]–नमस्कारी[६३१] । बला–वाट्यालकः । मञ्जिष्ठा–जिङ्गी ।

९७. गच । अजशृङ्गीति । कर्कटकी–वक्रा । मेषशृङ्गी–चर्मरङ्गा । गान्ता[६३२]ः । घद्धिः[६३३] । लघ्विति । लोहमगुरु[६३४]ः । 'अगुरुप्रवरं लोहं कृमिजग्धमनार्यकं[६३५] । राजार्हं[६३६] तच्च मलिनं कालेयं शीर्षकं लघ्वि 'ति [६३७]**केयदेवः** । 'अगुरुद्रुस्तु ध्वजुलिच्छदनः, सुमं अल्पं, न च फलं, काष्ठं जन्तुजग्धात्रशिष्टकं सारः सोऽगुरुरस्मात्तु प्राग्जः कृष्णो [६३८]विशिष्यते ' । लामज्जमुशीरं । 'वीरणमूलं लामज्जकमुशीरवत्पीतच्छवितृणविशेष ' इति **केचित्** । स्पृक्का–माल्यवती ।

९८. [६३९]घत्रिः । अमोघेति । विजया–पथ्या । 'अमोघः सफलेऽमोघा ख्याता पथ्याविडङ्गयो 'रिति **विश्वलोचनः** । कालवृन्तिका–पाटलिः । 'अलिप्रिया विशालाग्राऽप्यमोघा पाटलिर्द्वयो 'रिति **वाचस्पतिः** । 'मोघापि मोघा स्त्री पाटलावृत्ते मोघं त्रिषु निरर्थक ' इति **रुद्रः** । 'पाटलापादपः सारिशेलुपत्रः प्रसिद्धकः ' इतिः ।

---

६२०. रूपोदका. ६२१. उपोदकोर्द्धगा. ६२२. च्छ substituted for छ. ६२३. त्रयोदस. ६२४. उदुंबरो—In the text it is उडुंबर. ६२५. वाल० ६२६. धर्म्मिष्टः. ६२७. अम्रकुंकुमं. ६२८. स्त्रियामयाति. ६२९. मेदिनः. ६३०. In the text the reading is रक्तपादा. ६३१. नमस्कार. The corrected reading is supported by धन्वंतरि—p. 155. ६३२. गांता. ६३३. घद्धि. ६३४. ०मगरु. ६३५. नार्ग्यकं. ६३६. राजार्ह. ६३७. केयदेव. ६३८. बिशिष्यते. ६३९. घत्रि.

चित्रतण्डुलं—विडङ्गं। चित्रतण्डुलेऽपि मोघा[६४०]। '[६४१]कृमिघ्नं तण्डुलं मोघे'ति **वाचस्पतिः**। घान्ताः। 'अमोघः सफलेऽमोघा विडङ्गाभययोः स्मृते'ति **विश्वः**। 'अमोघा चित्रतण्डुला। तण्डुलश्च कृमिघ्नश्च विडङ्गमि'त्यमरः। [34 a]. [६४२]चद्विः। कचमिति। उदीच्यमम्बुसिद्धौ चाम्बुदवालकाविति। 'वालकं वारि ह्रीवेरं पिङ्गमाचमनं कच'मिति **मदनविनोदः**। कर्पास—स्थूलफलः। चुञ्चुरिरिति[६४३]। सितिवारकः—सुनिषण्णः। 'तृणकोङ्गुलि रक्ताकं साग्रपत्रोणुबीजकः। श्वेतमञ्जरिकः क्षेत्रे पुरःस्यात्सितिवारक' इति।

९९. चञ्चुशाको—गोनाडीच्यः। 'चञ्चुः[६४४]स्त्रियां पुंसि गोनाडीच्ये व्यडम्बके[६४५]' इत्युभयत्रापि **मेदिनी**। वर्धमाने[६४६]—एरण्डः। चोचमिति। त्वक्—पत्रकं। 'त्वक्चोचत्वच शब्दास्युर्बल्के चर्मणि पत्रके' इति **धरणिः**। 'गुडत्वगुत्कटं हृद्यं तनुकं स्वर्णभूमिक'मिति [६४७]**धर्मिष्ठः**। 'त्वक् स्त्रियां वल्कलेऽपि स्यां[६४८]चर्ममात्रे गुडत्वची'ति **विश्वलोचनः**। दाक्षिणात्यो—नालिकेरः। तालत[६४९]रुस्तृणध्वजः। नवनीतकं—कदलं। 'रीभं तु कदलं चोचं जालकं नवनीतकं लोचकश्चे'ति **सिंहः**। "भू छ त्र क" इति लोके।

१००. माणवकं—पालेवतं। तद्द्विविधं स्याद्वम्लं च। यथा **सिद्धमन्त्रप्रकाशे बोपदेवः**। 'पारेवतं मधुरमम्ल'मिति। 'द्विधा स्यात्तिन्दुकाकृ[६५०]तिफलं लघुपाण्डुपुष्पं नीलच्छदांघ्रिगदितं तु [६५१]पारेवताख्यं तत्पुष्कराश्रमसमीपवने प्रसिद्ध'मिति। [34 b]. मोच इति। पिच्छा[६५२]—मोचरसः। वनच्छदः—शिग्रुः। शल्लकी—गजभक्ष्या। रम्भा—कदली। नीलपुष्पी—नीली। चिरायुः—शाल्मली। 'षष्टि [६५३]वर्षसहस्राणि वने जीवति शाल्मलि'रिति।

१०१. चर्त्रिः। कवच इति। पर्पटः—शीतवल्लभः। नन्दिपादपः—'प्ररोही [६५४]रक्तूर्जनतरुर्नन्दीवृक्षो वनस्पति'रिति **कयदेवः**। पिप्पलभेदः। "पा र स पी प ल" इति लोके। गूढपत्रः—करीरः। क्रकच इति[६५५]। हलीमकः[६५६]—केतकी। 'करपत्रवद् दलैः पीतसितैर्वृते[६५७] कण्टकैरद्भुतं फलं। कचित्कदाचित्तस्यास्तरुणं कलशोपम'मिति।

---

६४०. मेघा. ६४१. क्रिमिघ्नं. ६४२. चद्वि. ६४३. In the text चंचु०. ६४४. चंचुस्त्रीया०. ६४५. व्यडंवक. ६४६. वर्द्धे०. ६४७. धर्मिष्ठः. ६४८. स्वाचर्म. ६४९. तालद्द. ६५०. स्यात्तिंदुकां. ६५१. परेवता०. ६५२. च्छ substituted for छ. ६५३. वंष. ६५४. रक्रुर्ज्जन०. ६५५. 'गूढपत्रः करीरः' is again repeated here which seems to be a mistake. ६५६. हलामक. ६५७. र्वृंते (?)

**१०२.** निकोच इति। [६५८]अङ्कोटोऽङ्कोलः। 'अङ्कोटे तु निकोचक'। इत्यमरः। 'द्वे अङ्कोटस्य "टे रा" इति ख्यातस्ये'ति **रामः**। अथोऽङ्कोटोऽङ्गुलिपत्रकः। 'पादपः कण्टकी साश्मदढभूमौ प्रसिद्धक' इति। मुस्तमम्बुधरः। मरिचमिति। ऊषणं–तीक्ष्णं। 'मरिचं तीक्ष्णमूषण'मिति [६५९]**धर्मदासः**। 'दीर्घमध्यमपि शीतज्वरं हरेत्सद्यो मरीचसुरसारसै'रिति **विद्वद्वैद्यवल्लभा**। '[६६०]मरीचं कोलकं कृष्णमूषणं [६६१]धर्मपत्तनं'मित्यमरः। जम्बीर[६६२]शाकं–जम्भलाख्यं। तल्लक्षणं तु 'जम्बीरगन्धि हरितं यदम्लकटुकं रते। शाकं जम्बीरमित्युक्तं जम्भलं चोत्त[६६३]रापथे' इति। मारीच इति। तीक्ष्णमूषणं। कोलं–कङ्कोलं। 'कङ्कोलं कटुकं कोलं मारीचं माधवोचित'मिति [६६४]**धर्मिष्ठः**। [ *35 a* ].

**१०३.** चच। उप[६६५]कुञ्चीति। राजिका–आसुरी। क्षुद्रैला–द्राविडी। 'सूक्ष्मासुमा त्रिकोणफलबीजकं सूक्ष्मं त्रुटिः सुगन्धे'ति। कृष्णजीरः–कृष्णाजाजी। तनुत्वगिति। अरणिर्ज्वलनमन्थः। रोध्रो–अक्षिभैषज्यं। रलयोरैक्यात् लोध्रोऽपि। बृह[६६६]त्वगिति। [६६७]भूर्जो–लेख्यपत्रः। 'यस्य त्वचः कुञ्जरबि[६६८]न्दुशोणाः'। पर्णः–सप्तपर्णः। 'सप्तपर्णो गु[६६९]च्छपुष्पो बहुत्वक् शाल्मलिच्छ[६७०]द' इति। गजमदगन्धिः। 'नयत्ययुग्मच्छदगन्धिरार्द्रतां भृशं नृपोपायनदन्तिनां मद' इति **भारविः**।

**१०४.** हिलमोचीति। जलब्रह्मी–महौषधी। अथ महौषधी–'[६७१]मध्या विषघ्ना चक्राङ्गी मत्स्याक्षी हिलमोचिका। जल[६७२]ब्रह्मी च से'ति **त्रिकाण्डशेषः**। 'हिलमोची शङ्खधरा जलब्रह्मी च सा मते'ति **केयदेवः**। मूलकं–म[६७३]हाकन्दं। 'मूलकं तु महाकन्दं स्वस्तिको हस्तिदन्तक' इति **केयदेवः**। अशोको–वीतशोकः। वास्तुको–वारशाकः। चान्ताः। [६७४]छर्द्दिः। [६७५]कच्छेति। [६७६]शबरकन्दो–वाराहीकन्दः। 'कच्छा तु चीरिकायां स्याद्वाराह्यामपि दृश्यते' इति **विश्वलोचनः**। 'वाराही सूकरी कच्छा मागधी गृष्टिका वरा। तस्याः कन्दस्तु [६७७]चक्रालुर्वन्यः शबरकन्दक' इति [६७८]**केयदेवः**। 'क्षीरान्विता मूलकतुल्यकन्दा उमाष्टरक्ता सितरक्तकाण्डा बिभर्ति या पल्लवमब्दशब्दात्सा [६७९]कञ्चुकी श्वेत[६८०]त्रपुर्त्ररेण्ये'ति **अष्टाङ्गसङ्ग्रहः**। 'श्यावकर्कशवाराहवृषणाकारकन्दका

---

६५८. ०कोल०. ६५९. धर्म्म. ६६०. मरांचं. ६६१. धर्म्म-. ६६२. जंवीर. ६६३. चौत्तरा०. ६६४. धम्मिष्टः. ६६५. उम०—in the text. ६६६. वृहत्व०. ६६७. भूर्ज्जो. ६६८. विंदु. ६६९. गुछ०. ६७०. छद. ६७१. मधी. For the reading adopted see धन्वन्तरि p. 154. ६७२. ब्रह्मी. ६७३. ०कंदां. ६७४. छर्द्दि. ६७५. च्छ for छ. ६७६. ब for व. ६७७. चंक्रा०. ६७८. केदेवः. ६७९. कुंचुकी. ६८०. वेरोपत्यष्टांग०.

ताम्बूलवल्लीछदवद्वाराही "[६८१]गृष्टिरुच्यते' इत्यन्ये। तस्याः कन्दः। कान्तालकद्रुमस्तुणिः। 'नन्दिस्तुणिर्नन्दिवृक्षः कच्छः कान्तालकस्तथेति' [६८२]धर्मदासः। 'तुणिः कच्छः कान्तलको नन्दिवृक्ष' इत्यमरः। [35 b].

१०५. पिच्छेति। भक्तमण्डः—ओदननिर्यूहः। मोचा—शाल्मली। शाल्मलिवेष्टो—मोचरसः। 'मोचास्रावो मोचरसः शाल्मलो वेष्टकस्तथे'ति केयदेवः। छान्ताः। [६८३]जेद्रिः। अब्जमिति। शङ्खः—कम्बुः। निचुलो—हिज्जलः। अथ हिज्जलः। 'इज्जलोऽप्यम्बुजो रक्तमञ्जरो निचुलोऽपि चे'ति सिंहः। अम्बुजं—पङ्कजं। 'सरोजाम्बु पङ्कजं कैरवं चाब्जमम्भोज'मिति केयदेवः।

१०६. कुब्ज इति। कुब्जो-बृहत्पुष्पः शतपत्रिकाभेदः। 'कुब्जको भद्रतरणी बृहत्पुष्पोऽतिकेसर' इति धन्वन्तरिः। आघाटो—वासकः। 'वासा विटपकस्तिक्ता कुटजाभदलाऽफलाऽप्रसिद्धे'ति। द्विजेति। कौन्ती—रेणुका। बर्बरः—भार्गी। 'द्विजा भार्गीरेणुकयो'रिति हेमचन्द्रः। 'भार्गी भृगुभवा पद्मा फञ्जी ब्राह्मणयष्टिका। अङ्गारवल्ली फञ्जी च वचा बर्बरकस्तथे'ति धन्वन्तरिः। 'भार्गी महीरुहः शैलेऽङ्गुल्यरिच्छदना सिना व्यस्तधात्रीसमे'ति। पिञ्जेति। तूलः—[६८४]कर्पासः। हरिद्रा—वरवर्णिनी। 'पिञ्जा तूलहरिद्रयो'रिति लोचनः। 'पिञ्जा तूले हरिद्रायां पिञ्जस्तु व्याकुलेऽन्यवदि'ति विश्वः। फञ्जीति। पद्माऽङ्गारवल्ली। 'फञ्जी पद्माङ्गारवल्ली मह[६८५]गर्द[६८६]भगन्धिके'ति [६८७]धर्मदासः। "भाडंगी"ति लोके। विशल्योऽदुम्बर[६८८]छदा। 'द्रवन्ती [६८९]शम्बरी [६९०]फञ्जी न्यग्रोधा मूषिकाह्वये'ति केयदेवः। [36 a].

१०७. रज इति। परागः—सुमनोरजः। रेणुः—पर्पटः[६९१]। 'रजेनापि रजस्सम'मिति द्विरूपकोषः। लाज इति। आर्द्रत[६९२]ण्डुलः—अशुष्कतण्डुलः। उशीरं—वीरणमूलं। स्त्रियां पुंसि बहुत्वे च अक्षतेषु।

१०८. [६९३]सर्ज इति। अश्वकर्णः—शालः। यस्य निर्यासो राला। कण्डुरा—कपिकच्छूः। हस्तिपिप्पलिका—गजपिप्पली। 'चविकावल्लिका त्र्युस्तारुणा पिप्पलिका समा। स्थिरातिकटुका तस्याः फलं तु गजपिप्पली'ति। असनो—बीजकः। [६९४]जंत्रिः। अम्बुज इति। निचुलो—हिज्जलः। कमलमम्बुजः। अद्रिजमिति।

---

६८१. पृष्टि०. ६८२. धर्म्मं०. ६८३. जद्रि. ६८४. कर्प्पासः. ६८५. गर्द्दभ. ६८६. गान्धिके०. ६८७. धर्म्म०. ६८८. छदा. ६८९. शंबरी. ६९०. फजी. ६९१. पर्प्पट. ६९२. आर्द्रतंडुलः. ६९३. सर्ज्ज. ६९४. जन्त्रि.

१०९. पलितं—सिद्धकं । ' तुरुष्कपा[६९५]दप: सेलुदलवत् फलबीजकं शैलेयस्तद्रस ' इति । शैलनिर्यास:—शिलाजतु । अद्रिशिलाद्रव: । 'शिलाजत्वसितं मृत्स्नं शिलाधातु:' । 'ग्रीष्मे तीव्रार्कतप्तेभ्य: पादेभ्यो हिमभूभृत: । स्वर्णरूप्यार्कगर्भेभ्य: शिलाधातु-[६९६]र्विनि:सरेदि 'ति **वाग्भट:** । करञ्जमिति । घृतपूरक:—करञ्ज: । [६९७]नखो—व्याघ्रनख: । कारुज इति । धातु:—स्वर्णादि: । केसर:—करिकेसर: । तिलभिदत्र वन्यस्तिल: ।

११०. [६९८]काम्बोज इति । श्वेतखदिर:—गायत्री । ' पुन्नागश्चम्पकभेद ' इति **डल्हण:** । सोमवल्कल:—कटुफल: । पाण्डुरा—माषपर्णी । हिङ्गुपर्णी—हिङ्गुपत्री । चूडामणिर्गुञ्जा । [ *36 b* ].

१११. गिरिजमिति । अमलमभ्रकं । ' अभ्रकं गिरिजामले ' इत्यमर: । लोहं—मलिनं । शिलाजतु—शिलाह्वं । गैरिकं—गिरिमृत् । मातुलुङ्गी—बीजपू[६९५]रक: कण्टकेसरेषु पठित: परिपाके प्रस्थफल: । जलजमिति । शङ्ख:—क[६९८]म्बु: । पद्मं—श्वेतकमलं ।

११२. नीरजमिति । कम[६९८]लमब्जं । कुष्टं—गदाह्वयं । वनजमिति । अन्धकस्तुम्बु[६९८]रु: । ' तुम्बुरु: सौरस: सौरो वनज: सानुजोऽन्धक ' इति **भावमिश्र:** । मुस्ताम्बु[६९९]धर: । गद:—पारिभव्य: । अम्बुजमब्जं । मुद्गपर्णी—मृगगन्धा । ' मृगगन्धा [६९८]शिबिपर्णी वनजा शिम्बिरिङ्गिणी 'ति **केयदेव:** । अश्वगन्धा—तुरगी ।

११३. शिलाजमिति । इन्द्रजतु:—शिलाह्वं । ' शिलाजत्विन्[७००]द्रजत्वश्मजं शिलाह्वं च । गिरिजं गिरिजाह्वय'मिति **हृदयदीप[७०१]क:** । शैलेयं—शिलापुष्पं । ' शैलेयं च शिलाजं च शिलापुष्पं शिलोद्भव 'मिति **शब्दार्णव:** । शिलात्वक्—पाषाण-भेद: । ' पाषाणभेदकोऽश्मघ्न: शिलाजा च दृषत्त्वचे 'ति **नाममाला** । जच । [७०२]क्षीराब्धिजमिति । सामुद्रलवणमब्धि[७०३]लवणं । मौक्तिकं—मुक्ताफलं ।

११४. काश्मीरजेति । विषा—अतिविषा । कुष्टमामय: । [७०४]पौष्करं—पुष्करमूलं । धीरं—कुङ्कुमं । ' काश्मीरजाख्यातिवि[७०५]षाकुष्टकुङ्कुमपौष्कर 'इति **विश्व:** । [ *37 a* ]. तृणराज इति । गुडवृक्ष इक्षु: । मोचा—शाल्मली । कत्तृणं—रामकर्पूराख्यं । तालो—लेख्यपत्र: । ' तृणराजो दीर्घत[७०६]रुर्लेख्यपत्रो द्रुमेश्वर 'इति **नाममाला** ।

---

६९५. मादप:. ६९६. विनि:सरे०. ६९७. In the text : ऽनेखे. There seems to be a mistake; according to the Comm. the correct reading would be 'नखे'. ६९८. ब for व. ६९९. ०धर. ७००. After त्विद्रजतु we have अमिजत्तु added in between before अश्मजं. ७०१. हृदयदीपक. ७०२. क्षीराध्विज०. ७०३. ०मध्वि. ७०४. In the text the word is पुष्करं or not पौष्करं. ७०५. ०विवा. ७०६. र्लेल्य.

११५. रसराज इति। स्वादुरसो—मधुररसः। पारदः—सूतः। रसाञ्जनं—तार्क्ष्यशैलं[७०७]। जपं। अक्षिभेषजमिति। पुष्पकासीसं—मलीमसं। 'कासीसं धातुकासीसं शोधनं खेचरं तथा। द्वितीयं पुष्पकासीसं लेखनं च मलीमस'मिति **केयदेवः**। रोध्रः—पट्टिकाख्यः। 'अक्षिभेषजं[७०८]मुद्दिष्टं[७०९] पुष्पकासीसतिल्वयो'रिति **विश्वलोचनः**।

११६. मुनिभेषजमिति। अगस्त्यो[७१०]—वङ्गसेनः। हरीतकी—पथ्या। लङ्घनमुपवासः। तस्येहाभिघातं परमौषधत्वात्। जान्ताः। [७११]टेट्टिः। कद्रु[७१२]रिति। लता[७१३]—कस्तूरिका। 'कस्तूरी लतिका चापि तद्गन्धा दक्षिणेल्पका। अन्या प्रतानिनी[७१४] काष्ठा वटपत्राल्पपुष्पिका। सुगन्धितसुबिम्बाभगोस्तनी फलिका[७१५] स्थिरे'ति। आसुरी—राजिका। कटूवी—मत्स्यपित्ता। प्रियङ्गुर्वनिताह्वा। विजयावहः—सर्षपः।

११७. [७१६]ज्योतिष्मती—कङ्गुणिका। काकमाची—काका। त्रिकटुकं—शुण्ठीमरिचपिप्पल्यः। [ *37 b* ]. कुट इति। हुतभुग्—वह्निः। गन्धकुटी—मुरा। 'मुरा गन्धकुटी दैत्या ह्यगन्धा कुटी कुटि'रिति **केयदेवः**। 'मुरा हिमाद्रिदेशेषु तृणं मुस्तोपमं मृदु। सुगन्धिश्चे'ति।

११८. घृष्टिरिति। मूलकमूलाभः—किरिः। 'घृष्टिः स्त्री घर्षणस्पर्धा[७१७] विष्णुक्रान्ता सुनाकिरा'विति **मेदिनी**। विषोदरः—शङ्खपुष्पीभेदः। 'शङ्खपुष्प्यै सितारुणे। बह्लिके तृणके विष्वक् लोमशेऽल्पकपत्रके' इति। घोण्टेति। मदनं—राठः। पूगवृक्षः[७१८]—केम्बुकं। बदरीभिदत्रारण्यबदरी सूक्ष्मफला। 'बदरीसदृशाकारो वृक्षः सूक्ष्मफलो भवेत्। अटव्यामेव सा घोण्टा गोपघोण्टा च सोच्यते' इति **सुभूतिः**। 'अरण्यबदरी गृध्रनखी घोण्टा' इति **सिंहः**।

११९. जटीति। प्लक्षः—[७१९]पर्कटी। 'प्लक्षमांसीकयोर्जटी'ति **विश्वः**। "पा क रि"रिति लोके। गर्दभाण्डः[७२०]—पिप्पलभेदः। 'अधोमुखपत्रशाखः जटझटसङ्घाते सर्वधातुभ्य' इतीन्। जटिः—दीप्ति[७२१] जटीति सर्वधरः। '[७२२]गर्दभाण्डे जटीप्लक्षा'विति **रुद्रः**[७२३]। जटायोगान्नामः पुल्लिङ्गश्च[७२४]। मूलं—वृक्षादीनां। नलदं—जटामांसी। 'मांसी माता भूतकेशी नलदं जटिलं जटे'ति [ *38 a* ] **केयदेवः**। झिण्टीति।

---

७०७. शैलं—omitted-Vide धन्वंतरि p. 126. ७०८ अक्षिभेषज. ७०९. उद्दिष्टः. ७१०. आगसयो. ७११. त्तद्वि. ७१२. कद०. ७१३. लतालता. ७१४. प्रतानिनो. ७१५. स्थिरति. ७१६. In the text itself it is ज्योतिष्मात्यां. ७१७. स्पर्द्धा. ७१८. पूरा. ७१९. पर्कटी. ७२०. गर्द्दभांड. ७२१. ? ७२२. गद्द०. ७२३. रुद्राः। ७२४. पुल्लिगश्चां.

‘ सैरेयकैस्तु[७२५] झिण्टी स्या ’दित्यमरः । बाणी[७२६]–दासी । ‘ बाणा[७२६] दासीभुजिष्ययो ’रिति **मेदिनी** । ‘ नीलाझिण्टीद्वयोर्बाणा[७२६] दासी [७२७]वार्तगलश्च से ’त्यमरः । ‘ सा महासहा नीला नीलपुष्पा झिण्ट्यादिशब्दवाच्ये ’त्यर्थः । बदरी–गोपघोण्टा । मोदकी–गुडमञ्जरी । ‘ जिङ्गिणी झिङ्गिणी झिण्टी मोदकी गुडमञ्जरी । जिङ्गिणीप[६८५]स्तीक्ष्णः[७२८] समिद्दाडिमपत्रकः । अपुष्पः कोलफलकश्चे ’ति । “ जी ग णि ” रिति [७२९]पश्चिमे ख्यातो वृक्षः ।

१२०. त्रुटिरिति । एला–सूक्ष्मैला । कट्फलं[७३०]–कटुफलं । नट इति । नटमण्डनं–हरितालः । नडः–पोटगलः[७३१] । अशोको–वीतशोकः । वन्यं–‘ कुटन्नटं प्लवं वन्यं वितुन्नं परिपेलव ’मिति **निघण्टुः** । मुस्ताभेदः । नली–कपोताङ्घ्रिः । ‘ नटी नली ’त्यमरः । नीलिका–नीला ।

१२१. पटुरिति । ‘ पटोलस्तिक्तकः पटु ’रित्यमरः । छत्रा–मिसिः । लवणं–सैन्धवादि । पट्टिरिति । कृष्णवृन्ता–पाटला । ‘ पाटला पादपः सारिसेलुपत्रः प्रसिद्धकः । काष्ठपाटलिका तद्वत्कदंबे[७३२]बहलिनी[७३३] सिते ’ति । लाक्षाप्रसादनो–रोध्रः ।

१२२. वट इति । वराटः–कपर्दकः[७३४] । न्यग्रोधो–बहुपाद्[७३५] । यष्टीति । [७३६]क्लीतकं–यष्टीमधु । ‘ यष्टी च मधुयष्टी च यष्टीमधुकमेव चे ’ति **वाचस्पतिः**[७३७] । ‘ मधुकं क्लीतकं यष्टीमधुकं मधुयष्टिके ’त्यमरः । पद्मा–भार्गी । ‘ भार्गी महीरुहः शैलेन्द्रुल्यच्छिदना- सिता व्यस्तधात्रीसमे ’ति । [ 38 b ]. रिष्ट इति । कुष्टं–त्राप्यं । ‘ कुष्टं गदाह्वयं मूलं त्वस्य पुष्करमूलक ’मिति **त्रिकाण्डशेषः** । ‘ रुक् पुष्करात्रभिन्नौ तु विटपौ तुरगीदलौ । सितासितसमित्कौ च गिरौ मूलककन्दिना ’विति । तुरगी–अश्वगन्धा । [७३८]फेनिलोऽरिष्टः । विट इति । अब्जं–कमलं । लवणं–पटुः । रिमोऽरिमः ।

१२३. शटीति । शटी शटितं शलाटुरित्यूष्मविवेकात् तालव्यादिः । अत्र पुनर्नवाभेदः । ‘ शटी विस्तीर्णवल्ली स्या ’दिति । गन्धमूला–सुव्रता । ‘ शटी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिका ’ । गन्धद्रव्यं काश्मरे प्रसिद्धं । ‘ शटी सटी च कर्चूर ’ इति **हृदयदीपकः** । मयूरकोऽपामार्गः । टत्रिः । अरिष्ट इति । लसुनं–म्लेच्छकन्दः[७३९] । [७४०]निम्बः–पिचुमन्दः । रिष्टो–रक्षाबीजः । गोरसः–कालसेयं । ‘ दण्डाहतं कालसेयमरिष्टमपि गोरस ’ इति **हृदयदीपकः** ।

---

७२५. ‘स्तु’ omitted. ७२६. वाणा. ७२७. वार्त्त०. ७२८. स्तीक्ष्ण. ७२९. पाश्चेमे. ७३०. कट्फल. ७३१. पोरगलः. ७३२. कदंब. ७३३. हर्लिनी. ७३४. कपर्द्दकः. ७३५. बहुपात्. ७३६. In the text the word is क्लीत—probably क has been omitted. ७३७. वाचस्पति. ७३८. फेलिनो. ७३९. म्लेच्छं. ७४०. निंबः.

१२४. नागबला—गाङ्गेरुकी । कट्वी—कटुकी । कथितौषधयुक्तैर्मधकरैः कृतं मद्यमरिष्टः । उच्चटेति । श्वेतगुञ्जा—काकमण्डिका । भूधात्री—भूम्यामलकी । छत्रमुस्तं —चूडाला । 'य[७४१]च्छत्रमुस्तकं तत्र चूडाला चक्रलोच्चटे'ति[७४२] सिंहः । 'उच्चटा ताम्रिका गुञ्जे'ति **धन्वन्तरिः** । [ *39 a* ].

१२५. करटीति । कुसुम्भो—लट्वा । बिल्वः—श्रीफलः । करीरो—गूढपत्रः । कच्चटमिति । तोयपिप्पली—गजपिप्पली । 'गण्डपदी तोयवल्ली लाङ्गली कच्चटं च त'दिति [७४३]**केयदेवः** । "दु कु ञ प नि स गा चे"ति लोके । तण्डुलीयो—मार्षः । तद्भेदो—जलतण्डुलीयः । 'पानीयं तण्डुलीयो यस्तत्कच्चटमुदाहृत'मिति **भावमिश्रः** ।

१२६. [७४४]कर्कोटीति । देवताडो—देवताली । कर्कशच्छ[७४५]दा—कटुकोशातकी । 'कोशातकी तु कर्कोटी जालिनी कर्कश[७४६]च्छदे'ति **केयदेवः** । कर्कटीति । बीजपेशी—कमलादिकर्णिका बीजाधारभूता । इर्वारुः—कर्कटिः । 'उन्मत्तो धुस्तुरिर्वारुः कर्कटिः स्या'दिति पुंस्काण्डे **रत्नकोषः** । 'दीर्घादिरपि तुर्य[७४७]स्वरादिरीर्वारुः कर्कट्यां कथ्यते बुधै'रिति । 'स्मृता वालुकिरीर्वारु'रिति **हारावली** । आङि एर्वारुरपि । शाल्मलीफलं —तूलिनीफलं ।

१२७. कर्कटेति । कुलीरा—कुलीरशृङ्गी । कर्कटाख्या—कर्कटकीशृङ्गी कर्कटशृङ्ग्यपि । 'कुलीरशृङ्गी कुलीरे'ति **हृदयदीपकः** । [७४८]मृगलिण्डकं—गाङ्गेरुकीफलं । करहाटः—शिफाकन्दः । कु[७४९]क्कुट इति । [७५०]शितिवारः—शितिवरः । '[७५१]स्वस्तिकः सुनिषण्णकः श्रीवारकः सूचिपत्रः पर्णासः कु[७५२]क्कुटः शिखा' [७५३]इति **निघण्टुः** ।

१२८. गूढपत्रः—करीरः । काकणन्ती—गुञ्जा । रसोनोऽरिष्टः । कन्दभेदोऽत्रुः । '[७५४]कुक्कुटी—स्फटिकरचितकुक्कुटाण्डस[७५५]दृशकन्दा कुक्कुटीशरीरवत् कुसुमविचित्रा वल्ली'ति उत्तरे पूतनाप्रतिषेधे **डल्हणः** । 'कुक्कु[७५६]टाण्डनिभैः[७५७] क[७५८]न्दैः किञ्चित् कटुकैः पिच्छलैः स्निग्धैर्मरकतच्छा[७५९]यैः खर्जूरसदृशैश्छदै'रि**त्यष्टाङ्गसङ्ग्रहः** । लट्वा—कुसुम्भः । मोचा—शाल्मली । [७६०]अश्मभित्—पाषाणभेदः । [ *39 b* ].

---

७४१. य छत्र०. ७४२. ति dropped. ७४३. केयदेव. ७४४. कर्कोटीति. ७४५. छदा. ७४६. कर्कश०. ७४७. तुर्य्य. ७४८. मृगलिंडक. ७४९. कुक्कुटः. ७५०. सिति०—in the original text. ७५१. स्कस्तिकः. ७५२. कक्कुटः. ७५३. 'इ' dropped. ७५४. कुक्कुटी. ७५५. सदृशं. ७५६. कुक्कुटांड ७५७. निभैः. ७५८. कदैः. ७५९. च्छ for छ. ७६०. अश्मभित्.

१२९. कुरण्टीति। शीर्षमञ्जरी–[७६१]शितिवारिकः। किङ्किरातः[७६२]–पीतवासकः। कुनटीति। मनःशिला–दिव्यौषधिः। 'नेपाली कुनटी गोला शिला [७६३]दिव्यौषधी स्मृते'ति [७६४]धर्मिष्ठः। 'तालकस्यैव भेदोऽस्ति मनोगुप्ता तदन्तरं। तालकं [७६५]त्वेतिपीतं स्याद्भवेद्रक्ता मनःशिले'ति **भावमिश्रः**। 'धातुर्नेपाली रक्ताऽलं पीतवर्णक'-मित्यन्यत्रापि। 'मनःशिला त्रिधा[७६६] प्रोक्ता श्यामाङ्गी करवीरका[७६७]। खण्डाख्या चे'ति। तद्रूपं विविच्य परिकथ्यते। 'श्यामा रक्ता सगौरा च भाराद्या श्यामिका मता। तेजस्विनी च निर्गौरा ताम्राभा करवीरका। चूर्णीकृतातिरक्ताङ्गी सा[७६८] भारा खण्डपूर्विके'ति **वाग्भटः**। नेपाली–मनोज्ञा। 'मनोज्ञा शिश्नुगन्धिका नेपाली चे'ति **केयदेवः**। "नि वा री" त्याख्यया ख्यातो मल्लिकाभेदः। वितुन्नकं–धनिका। 'कुनटी धनिका छत्रा कुस्तुम्बुरु वितुन्नक'मिति **भावमिश्रः**।

१३०. [७६९]चर्पट इति। [७७०]पर्पटः–निस्तुषमाषादिचूर्णस्य हिङ्गुसैन्धवस्वर्जिका[७७१]-मरिचजीरकदधिकटुतैलादियुक्तस्य कुट्टितमर्दितस्य[७७२] कृतो मण्डकः। पिष्टभेदोऽत्र पोली। 'अथ पोली पूपली चर्पटी च से'ति **त्रिकाण्डशेषः**। त्रिकण्ट–इति शब्दद्वयं। शृङ्गाटः–जलवल्लीफलं। गोक्षुरः–'त्रिकण्टस्त्रिकटस्त्रिक' इति **केयदेवः**।

१३१. त्रिपुटेति। एला–सूक्ष्मैला। **वाचस्पतिस्तु** 'त्रिपुटी'त्यपि पठति। मल्लिका–तृणशूल्यं। त्रिवृता–सरणा। 'सर्वानुभूतिः सरणा त्रिपुटा[७७३] रेचना सरे'ति **केयदेवः**। बृहदेला–भद्रैला। सतीनकस्त्रिविधः। 'सतीनको [७७४]वर्तुलको हरेणुः स्वल्पवर्तुलः। कलायस्त्रिपुट' इति [७७५]**धर्मिष्ठः**। चणको–हरिजीवनः। [ *40 a* ]. अथ पर्कटीति।

१३२. पूगादिनूतनफलं–नव्योद्वेगादि। प्लक्षः–पर्कटी। 'प्लक्षे पिप्पलपादप' इति **शाश्वतः**। पिप्पल[७७६]भेदः–'फलीशः क्षीरपादप' इत्यपरपर्यायः। पर्पटीति। जतुकृष्णा–'पर्पटी रञ्जनी कृष्णा जतुका जननी जनी। जतुकृष्णा च संस्पर्शा जतु-कृच्चक्रवर्तिनी[७७७]'। "पा प री"ति प्रसिद्धं[७७८]। 'पद्मावती इति प्रसिद्धं सुगन्धिद्रव्य'मिति **भावमिश्रः**। रजः–कवचः। 'पर्पटो मञ्जरीदृढः विटप' इति। पिष्टभिदत्र[७७९] पर्पटः।

---

७६१. सिति०. ७६२. किर्करातः. ७६३. दिव्यौषधीः. ७६४. धार्मिष्टः. ७६५. त्वाते. ७६६. त्रिधः. ७६७. र–omitted. ७६८. स. ७६९. चर्प्पट. ७७०. पर्प्पटः. ७७१. स्वार्ज्जिका०. ७७२. मर्द्दित०. ७७३. त्रिंपुटा. ७७४. वर्त्तुलको. ७७५. धर्म्मिष्टः. ७७६. पिप्पद. ७७७. वर्त्तिनी. ७७८. प्रसिद्धाः. ७७९. In the text it is मिष्ट in Bh.

१३३. [780]मर्कटीति। शूकशिम्बा—'ज्ञेया जाङ्गलिका सैव साऽजहा प्रावृषायणी 'ति इन्दुः। 'शूकशिम्बिस्तु मर्कटी शूकशिम्बा चे 'ति वाचस्पतिः। 'ह्रस्वादिश्च माषबलो शुकशिम्बा [781]कर्तृणरास्नोरुवूकाश्वगन्धाना 'मिति चक्रः। 'शाश्वच्छशाङ्कशिशिराणि च। शूकशिम्बि 'रित्यूष्मविवेकाद्द्वितालव्यः। चक्राङ्गी—कटुकी। करजः करञ्जः। [782]अपामार्गः—शिखरी। मर्कटस्तृणधान्यं। "म क डा" इति लोके।

१३४. मार्कट इति। राजकर्कटी—खर्वारुः। प्राचीनामलकं—वारिबदरं। 'प्राचीनामलकं वारिबदरे द्वे' इति त्रिकाण्डशेषः। 'प्राचीनामलकं रक्तं बदरामलकं च तत्। प्राचीना[783]मलकमप्येत 'दिति सिंहः। तयोर्बीजं[784][785]उतियोग्योऽवयवैः। गवेधुका—तृणधान्यं। [ 40 b ].[786] अथ मोरटमिति।

१३५. समरात्रात्परं क्षीरं—'समाहीं[787]मोरणं(टं) मलिन 'मिति टवर्गपञ्चमं पठति हृदयदीपकः। अङ्कोटपुष्पोऽङ्कोलः। इक्षुमूलं—दीर्घपत्रजटा। पीलुपर्णी—मूर्वा। मोवाट इति। कृष्णजीरकं—कालजीरकं।

१३६. चन्दनं—गन्धसारं। 'खादने कटुकं शीतमीषत्पीतं च घर्षणे। छेदने रक्तवर्णं यच्चन्दनं तद्वरं पर 'मिति [788]धर्मिष्ठः। कदलीगर्भः—रम्भामध्यात्त्रयत्रः। शलाटुरिति। शिवं—धात्रीफलं। 'भिन्नत्वकाण्डलो वाटारुणकाष्ठोऽणुपङ्क्तिकैः दलैर्द्रुमः फलं धात्रीफ[789]लेमस्ये 'ति। बिल्वं—श्रीफलं। शार्ङ्गेष्टेति। काकणन्ती—रक्तगुञ्जा। काकमाची—काका। करञ्जः—करजः।

१३७. टच। करहाट इति। पद्मकन्दः—शालूकं। पिण्डितो—मदनफलं। 'करहाटो मरुबकः शल्यको विषपुष्पक' इति [788]धर्मिष्ठः। अथ कुटन्नटमिति। कैवर्ती[790]मुस्तकं—परिपेलवं। 'परिपेलवं प्लवं वन्यं तत्कुटन्नटसंज्ञकं। जायते मण्डुकाकारं शैवालदलसञ्चय' इत्यजयः। जिह्मं—तगरं। शालूकाऽरलुः। 'शालूको त्रिजनो भल्लः पृथुशिम्बः कुटन्नट' इति केयदेवः। कुटन्नटं—'जिह्मे [791]कैवर्तकीमुस्तेऽरलुके तु कुटन्नट' इति विश्वलोचनः। [ 41 a ].

---

७८०. मकटी०. ७८१. कर्तृण. ७८२. अपार्गः. ७८३. प्राचानागर-Selected reading is supported by धन्वन्तरिः, p. 52. ७८४. वीजं. ७८५. योग्योऽवघवः. ७८६. ॥ श्री ॥-at the end of the folio. ७८७. The readings here are not quite clear. Probably, मोरण is a variant fot मोरट. ७८८. धर्म्मिष्ठ०. ७८९. सस्यति. ७९०. कैवर्त्ता. ७९१. कैवर्त्तकी.

१३८. गोपघोण्टे[७९२] इति । पूगफलमुद्वेगः । विकङ्कतमहीरुहः—स्रुवतरुः । 'वृक्षकण्टकारिकेति प्रसिद्ध' इति डल्लणस्तिक्तवर्गे[७९३] । यवनेष्ट इति । पारिभद्रो—निम्बः । लशुनमरिष्टं । 'कोशात्क्लेशविनाशलेशलशुनप्रश्नांशुशीतांशव' इति विवेकात्तालव्यमध्यः । वृत्तमूलकं[७९४]—रक्तमूलकं ।

१३९. खर्जूरी—दुरारोहा । मरिचमूषणं । सीसकं—त्रपु । विषमुष्टिरिति । महानिम्बो—द्रेष्का । क्षुद्रमुष्टिः—केशमुष्टिः । 'विषमुष्टिः केशमुष्टिः क्षुद्रमुष्टिः सुमुष्टिके'ति [७९५]**केयदेवः** । ''डोडी''ख्यातः फलशाकः । कुपीलुः—काकपीलुकः । ''कुचिला'' इति लोके ।

१४०. सिंहच्छटेति । पुन्नागकेसरः[७९६]—देववल्लभः । नागकेसरः—करिकेसरः । 'अथ सुवर्णाभो[७९७] नागाख्यो नागकेसरःस्यात्पुष्परोचनश्चापी'ति **पुरुषोत्तमः** । टान्ताः । ठद्विः । [७९८]काष्ठेति । दारुहरिद्रा—पचंपचा । सामान्यदारु—इन्धनं । 'काष्ठं दार्विन्धनं त्वेव' इत्य**मरः** ।

१४१. कुष्ठमिति । पारिभाव्यं—'कौबेरं भास्वरं कुष्ठं पारिभाव्यं गदाह्वय'-मिति **रभसः** । रामतृणं—कत्तृणं । शठ इति । उन्मत्तो—धत्तूरः । तगरं—वक्रं । शङ्खाह्वा—शङ्खपुष्पी । कुङ्कुमं—बाल्हीकं । ठत्रिः ।

१४२. अम्बष्ठेति । माचिका—अम्बालिका । 'अम्बष्ठाम्बष्ठकं दन्तशठा चाम्बा-लिकाम्बिका । बहुमूला सूचिमुखा सहस्री माचिका [७९९]शठे'ति [८००]**केयदेवः** । पश्चिमदेशे ''मोप्पा'' इति ख्यातो वृक्षविशेषः । पाठा—पापचेली । चाङ्गेरी—अम्लवाटिका अम्लपत्रिकेति समानार्थाः । यूथिका—बालपुष्पा । [*41 b*]. रामठमिति । हिङ्गु—बाल्हीकं । 'बाल्हीकं हिङ्गुरामठ'मित्य**मरः** । **सिद्धमन्त्रा**त्पुंस्त्वं च । 'मरिचैलादीप्यगन्धासुरीसर्षपरामठा' इति । पिण्डा—हिङ्गुपत्री । 'पृथ्वीका पृथुला पिण्डा रामठी चारुपत्रिके'ति [८००]**केयदेवः** । समष्ठिलस्तोयापामार्गः ।

१४३. ठच । दन्तशठ इति । करमर्दः[८०१] सुषेणः । 'गुच्छः क्षीरी बहुदलः कण्टकी करमर्दकः[८०२] । फलं साम्लं कोलमात्रं कृष्णं पक्व'मिति । जम्भीलो—जम्भलः । नागरङ्गः—नारङ्गः । भव्यं—कर्मरङ्गफलं । ग्राही—कपित्थः । 'तरुः कपित्थोऽल्पदलः

७९२. धन्वन्तरि has गोपघोटः or गोपघोटा as the name—p. 177. The text has गोपघोंटाः. ७९३. वर्गं. ७९४. मूलके. ७९५. कय०. ७९६. ०केशरो. ७९७. सुवर्णभ. ७९८. काष्टे०. ७९९. शेबेति. ८००. कय०. ८०१. करमर्द्दः. ८०२. कर्म्म०.

कषायासितकः फलं । सितमाम्रं कषायाम्लं पक्वं स्वादु सुगन्धि च । सकपालं द्वयं तच्च महदल्पे फले भिदे 'ति । चिञ्चा—चक्रफला । [८०३]अम्लवाटिका—चाङ्गेरी ।

१४४. पूतिकाष्ठमिति । सरलश्चीठा । देवदारु—देवकाष्ठं । शाकश्रेष्ठेति । जीवन्ती—जीवनी । वास्तुकं—वास्तूकं । ठान्ताः ।

१४५. डद्विः । क्ष्वेडेति । वंशशलाका—वंशघटिता शलाका । हालाहालः—विषं । ' हालाहलं हालहलं वदन्त्यपि हलाहल 'मिति **द्वि[८०४]रूपकोषः** । लोहितार्कपर्णफलं—रक्तरविफलं । [८०५]कृतवेधनं—कोषवती । ' क्ष्वेडः कृतवेधनं च कोषवती 'ति **हृदयदीपकः** । " क टु तो र " इति लोके । ' क्ष्वेडस्तु रक्तार्कफले घोषपुष्पे दुरासदे ' इति **लोचनः** । [ *42 a* ].

१४६. खण्ड इति । इक्षुविकृतिः—' अंहिमलेक्षुरसपाकविकारः इक्षो रसस्य समल [८०६]अंशार्धोहिमलामलाः विकाराः फाणितगुडमत्स्यण्डी [८०७]खण्डशर्करा ' इति [८०८]**बोपदेवः** । विश्वदेवी—गाङ्गेरुकी । " गु ल स र्क री "ति लोके ख्याता । ' अन्ये सितकुसुमां बलामाहु 'रिति **डल्लणः** । गुड इति । फाणिः—क्षारः । ' फाणिः स्त्रियां गुडक्षारे [८०९]श्रुतेत्र्यंशमलैक्षवे ' इति [८१०]**धर्मिष्ठः** । ' गण्डोलं स्याद्गुडः स्वादु 'रिति **त्रिकाण्डशेषः** । हारहूरा—द्राक्षा । ' द्राक्षा [८११]तु गोस्तनी मृद्वीका हारहूरा चे 'ति **हैमः** । वज्रकण्टकः—स्नुही । गण्डीरश्चासिपत्रश्च गुडा गुड्यपि च स्नुही 'ति **सिंहः** । ' गुडो गोलेक्षुविकृती स्नुही गुडिकयोर्गुडे 'ति **सिंहः** ।

१४७. चण्डेति । घोषा—' शताह्वा कारवी घोषा सितछत्रातिछत्रिके 'ति [८१२]**केयदेवः** । ' शताह्वा छिन्नसूक्ष्माणुच्छदा नीलोग्रगन्धका । तृणकौघसजीराणुसस्याकृत्याऽपि तादृशी । [८१३]बीजकोषो विशेषोऽत्रे 'ति । " सो वा " इति लोके । चोरपुष्पी—शङ्खा । रात्रिविकासित्वात् । द्रवन्ती—[८१४]शम्बरी । ' माता भूमिचरी खण्डा शम्बरी [८१५]बहुपादिका । द्रवन्ती चे '**त्यभिधानचूडामणिः** । क्रोधमूर्च्छितः ' कुलीना धनहरीविरोकः क्रोधमूर्च्छित ' इति **वाचस्पतिः** । ' चण्डा धनहरी क्षेमदुः पुत्रगणहासका ' इ**त्यमरः** । ' चण्डा स्वनामख्याता ईषत्कृष्णचोरकभेदोऽजमोदाकार ' इत्येलादिगणे **डल्लणः** । यवानी—यवसाह्वा । ' यवानी स्याद्गमध्यैत्रे 'ति **द्विरूपकोषः** । गन्धमांसी—

---

८०३. Text—अल्प०. ८०४. द्विरूप०. ८०५. वेधने—Text. ८०६. अंशार्द्धो०. ८०७. शर्क्करा. ८०८. बोप०. ८०९. शृत. ८१०. धर्म्मि०. ८११. स्तु. ८१२. कय०. ८१३. वीज०. ८१४. शंवरी. ८१५. वहु०.

पूतना। तिन्तिणी—चक्रफला। 'चण्डो ना तिन्तिणीवृक्षे यमकिङ्करदैत्ययो'रिति मेदिनी। 'सुभक्ता चण्डी[816] चक्रिके'ति[817] केयदेवः। [ 42 b ].

१४८. पिण्डमिति। लोहमयः। बलं—वोळं। जपापुष्पं—जवाकुसुमं। सिल्हकः—कपिः। अलाबूस्तुम्बी। तगरं—नतं। खर्जूः[818]—खर्जूरी। वरा—वत्सादनी। 'वरा वत्सादनी पिण्डे'ति कोषान्तरं। निद्रू—हरिद्रा।

१४९. पृथ्वी—हिङ्गुपत्री। भण्डीति। जिह्नगी—मञ्जिष्ठा। 'मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका। मण्डूकपर्णी भण्डीरी भण्डी[819] योजनवल्ल्यपी'त्यमरः। कूष्माण्डः—कुसुमफलं। कर्कटीभिद्—गाङ्गी। मण्ड इति। रुबुः—एरण्डः। असिक्थान्नरसः—'मण्डोऽसिक्थः[820] ससिक्थापेया परिसिक्या यवागूश्च घनसिक्था तु विलेपी परिस्रुतस्तोदनो भक्त' इति हृदयदीपकः। मस्तु—दधिजलं।

१५०. आमलकी—धात्री। शौण्डीति। पिप्पली—मगधा। चविकं—चव्यं। इत्रिः। एरण्डेति। मूषिकाह्वा—द्रवन्ती। 'आखुकर्णी वृषैरण्डा द्रवन्ती'ति मदनविनोदः। उत्तानपत्रक—एरण्डः।

१५१. द्राविडमिति। बिडलवणमासुरं। 'द्राविडं बिडमासुरमि'ति धर्मिष्ठः[821]। त्रुटिः—'क्षुद्रैला। 'सूक्ष्मैला द्राविडी बाला क्षुद्रैला निःकुटिस्त्रुटि'रिति धर्मदासः[822]। कर्चूरो—वेधमुख्यः। 'कर्चूरो गन्धमूलस्तु द्राविडो वेधमुख्यक'इति माधवः। 'कर्चूरकन्दो रम्भावच्छदनस्तृणवत्तनु'रिति [ 43 a ]. निर्गुण्डीति। इन्द्रसुरा—सुरवारुणी। 'ऐन्द्री त्विन्द्रसुरा चित्रा गवाक्षी सुरवारुणी'ति हृदयदीपकः। 'निर्गुण्डीन्द्राणिका[823] नीलशेफाल्योः करहाटका' इति लोचनः। करहाटः—शिफाकन्दः। सिन्दुकः—सिन्दुवारः। 'श्वेतपुष्पसिन्दुकः सिन्दुवारकः। शीतपुष्पकः शीतसह' इति। 'निर्गुण्डी कटूग्राढकिसन्दला गुल्मगुच्छा[824] व्यक्तसस्या सिते'ति। "मे डं डी"ति लोके ख्यातः। शेफाली—पुष्पवर्षिणी। 'शेफालिकान्या निर्गुण्डी वैतंको[825] नीलमञ्जरी'ति माला। 'अन्या तादृशीतनुः शेफालिके'ति शृङ्गारहारः। इति वृन्दावनावनौ प्रसिद्धा—'कथमितरथा शेफालीषु स्खलत्कुसुमासु चे'ति।

१५२. मत्स्यण्डीति। गण्डदूर्वा—गण्डिनी। 'गण्डीरिका रक्तदण्डा वेतसाकारपत्रात्यन्ततीक्ष्णा कुल्यादिसमीपे जायत' इति रूपनारायणः। संशृतैर्धर्म[826]लैक्षवः—

---

८१६. One more च-added. ८१७. कय०. ८१८. खर्जूं०. ८१९. भन्री has been changed into भण्डी. ८२०. मंडो. ८२१ धर्मिम०. ८२२. धर्म०. ८२३. निर्गुंडीद्रा. ८२४. ०गुछा. ८२५. ? ८२६. र्धं०.

मृत्कपालादौ सम्यक् पंक्तौ[626]र्धमलेक्षुरसः । डच । दीर्घदण्डे[627] इति । गन्धर्वहस्तक–एरण्डः[628] । द्रुमोत्पलो–दीर्घफलः । 'आरग्वधो दीर्घफलो दण्डपातो द्रुमोत्पल' इति **धर्मिष्ठः** । डान्ताः ।

१५३. णद्विः । कण इति । सूक्ष्मधान्यांशः–क्षुद्रतन्दुलादिः । 'कणःस्यात्क्षुद्रतन्दुले[629]' इति **हलायुधः** । पिप्पली–मगधा । 'पिप्पली मगधा शौण्डी वैदेही चपला कणे'ति **धर्मिष्ठः** । 'कणलवणवचैलासर्षपार्छर्द[630]नानी'ति **वाग्भटः** । जीरोऽजाजी । 'जीरको जरणोऽजाजी कणःस्याद्दीर्घजीरक' इति **भावमिश्रः** । 'पिप्पलीजीरकुम्भारमक्षिकासु कणा स्मृते'ति **विश्वलोचनः** । कृष्णमिति । मरीचं[631]मूषणं । लोहमयः । नीली–नीलिनी । द्राक्षा–गोस्तनी । कणा–पिप्पली ।

१५४. तीक्ष्णमिति । मरिचमूषणं । मूलकं–हिलमोचिका । क्षारो–यवक्षारः । मुष्कको–मोक्षकः । समुद्रलवणं–सामुद्रं । क्षवे[632]काभिधश्चिक्काजिका च । [ *43 b* ].

१५५. पर्णमिति । पलाशं–छदनं । 'पत्रं पलाशं छदनं दलं पर्णं छदः पुमा'नित्यमरः । सप्तपर्णः–विशालत्वक् । समिद्वरः–किंशुकः । 'पर्णः स्यो[633]त्पुंसि किंशुक' इति **लोचनः** । 'क्षीरश्रेष्ठः[634] पलाशश्च बीजस्नेहः समिद्वर' इति **धन्वन्तरिः** । पर्णीति । उग्रगन्धाजमोदा । 'खराह्वा कारवा पर्णी मोदा हस्तिमयूरक' इति **धन्वन्तरिः** । शम्पाकश्चतुरङ्गुलः । महा[635]क्रीतनिका–स्थिरा । 'त्रिपर्णी पर्णिनी पर्णी महाक्रीतनिका स्थिरे'ति [636]**कैयदेवः** ।

१५६. बाणेति[637] । नीलझिण्टी–नीलपुष्पसहचरः । इत्कटो–मुञ्जः । वेणुरिति । इक्षुर्दीर्घपत्रः । वंशास्त्वक्सारः । शोण इति । टिण्टुः–श्योनाकः । हविर्भुक्–चित्रकः ।

१५७. णत्रिः । अरुणेति । अतिविषा–शुक्लकन्दा । हेमा–मञ्जिष्ठा[638] । 'पद्मेन्द्रगोपहेमाविशशलोहितलोहित'मिति **वाग्भटः** । त्रिवृताभिधः–त्रिवृतो द्विविधं शोणितं श्याममेव च । 'अरुणं त्रिवृताख्यं तु श्यामं श्यामाह्वयं मत'मिति । 'त्रिवृत् कुम्भः कुटरणा त्रिभण्डी त्रिवृतापरा । श्यामा मसूरविदला पाणिन्दी सरला तथे'ति **हृदयदीपकः** । अलम्बुषा–मुण्डी । 'विष्वक् मुण्डी सुगन्धश्च कन्दं भवफला स्थिरा ।

---

६२७. ०दंड. ६२८. एरंड. ६२९. तंदुला. ६३०. छर्द०. ६३१. मरिच. ६३२. क्षकका. ६३३. स्यात्. ६३४. ०श्रेष्ठ. ६३५. मेहा. ६३६. कय०. ६३७. बाणेति. ६३८. मंजिष्ठा.

[८३९]तृणैकाङ्गुलिसम्पत्रे 'ति। रक्तपादी—लज्जालुः। षड्ग्रन्था—वचा। 'वचोग्रगन्धा गोलोमी [८४०]षड्ग्रन्था चारुणा च से'ति **निघण्टुः**। 'वचोग्रगन्धा [८४०]षड्ग्रन्थे '[८४१]त्यमरः। [ *44 a* ].

१५८. उषणमिति। कणा—पिप्पली। मारीचं—शिरोवृत्तं। अथ कतृणमिति। हलीमः—केतकी। हठः—वारिपर्णी। 'वारिपर्णी तोयवृक्षो हठः पानीयपृष्ठजे 'ति **केयदेवः**। किरातः—किराततिक्तः। रामकर्पूरः—ध्यामकं। 'अथ गन्धतृणे रामकर्पूराख्ये हि कत्तृण'मिति **सिंहः**। '[८४२]मालातृणं भूस्तृणं द्वे शतपुष्पोग्रगन्धिनी'ति च **सिंहः**। 'तत्र कर्पूराख्यं बहुपत्रकाण्डं कर्पूरगन्धसुगन्धि'। भूस्तृणं तु 'शतपुष्पिकावदुत्कटगन्धं भूलग्नमिति भेद' इति **मुकुटः**।

१५९. जरण इति। रुचकं—[८४३]हृद्यगन्धं। कृष्णं-कृष्णलवणं। जीरमजाजी। हिङ्गु—रामठं। तरुणमिति। [८४४]कुब्जपुष्पं—जलकुब्जकः। पञ्चाङ्गुल—एरण्डः। 'तरुणो यूनि[८४५] नवके कुब्जपुष्पोरुवूकयो'रिति **लोचनः**।

१६०. पूरणमिति। पिष्टभेदः स्पष्टम्। शाल्मली—रक्तपुष्पा। वारुणीति। गण्डदूर्वा—गण्डिनी। विशाला—इन्द्रवारुणी। श्वेता—सुराभेदः। 'पुनर्नवा[८४६]शालिपिष्टैः कृता श्वेता च वारुणी 'ति [८४७]**केयदेवः**। 'गण्डदूर्वामगैर्वारुसुराभेदेषु वारुणी 'ति **विश्वलोचनः**।

१६१. [८४८]ब्राह्मणीति। ब्रह्मचारिणी—[८४९]ब्राह्मी। 'ब्राह्मणी स्मारिणी ब्राह्मी मण्डूकी ब्रह्मचारिणी 'ति **धर्मिष्ठः**। 'ब्राह्मी पिच्छिला[८५०] पीतपुष्पिका भूसक्ता [८५१]बहुधःशम्बी द्वितीया तिक्तका मृदुः। तृगवत्तृणका चे 'ति। [८५२]फञ्जी—[८५३]भार्गी। मोहना—स्पृक्का[८५४]। [ *44 b* ]. रिङ्गिणीति। मृगगन्धा—वनजा। 'मृगगन्धा मुद्गपर्णी वनजा [८५५]शिम्बि-[८५६]रिङ्गिणी 'ति [८५७]**केयदेवः**। कण्टकारी—बृहती।

१६२. रोहण इति। चन्दनं—श्रीखण्डः। 'रोहणश्चन्दनद्रुम' इति **हारावली**। 'मलयस्तु [८५८]स्याच्छ्रीखण्डो रोहणश्च स' इति **पुरुषोत्तमः**। कूटशाल्मलिः—प्लीहघ्नः। 'रोहितो लोहितो रक्तो रक्तघ्नः कूटशाल्मलिः। प्लीहघ्नो दाडिमीपुष्पो रोहणः पारिजातक' इति **धर्मिष्ठः**। गोमयप्रियः—'भूस्तृणो गोछलः शूघ्नो रोहिणी गोमयप्रियः'। "गं घे ल" इति ख्यातः। विषाणीति। मेदुरा—क्षीरकाकोली।

---

८३९. त्रिणका. ८४० षट्०. ८४१. ग्रंथे इत्य०. ८४२. मालास्तृणं. ८४३. ०गधं. ८४४. कुज्व. ८४५. य्रूनि. ८४६. पिष्टैः. ८४७. कय०. ८४८ ब्राह्म०. ८४९. ब्राह्मा. ८५०, पिछि०, ८५१. बहुधः. ८५२. फिञ्जी. ८५३. भार्गी. ८५४. स्पृका. ८५५. शिंबि. ८५६. रिंणी. ८५७. बृहती. ८५८. स्यात् श्री.

कूर्चपर्णी—मेषशृङ्गी। 'वृश्चिकाली मेषशृङ्गी कूर्चपर्णी विषाणिके 'ति [८५९] **केयदेवः**। कुष्ठं—पारिभाव्यं।

१६३. श्रावणीश्रवणे इति। 'श्रावणी श्रवणा मुण्डी 'ति **हृदयदीपकः**। 'श्राविणी श्राविता पूर्वं गालवेन महात्मना। आत्रेयस्यैव चैकस्य तेन सा श्रावणी मते 'ति **धान्वन्तरीयाः**। जटामांसी—भूतजटा। 'मांसी माता भूतजटा जटामांसी तपस्विनी 'ति **धर्मिष्ठः**। 'सुदर्शना—मुण्डतिका मांसीषु श्रावणीं विदु 'रिति **विश्वः**। 'सुदर्शना—दध्याली '। 'सुदर्शना सोमवल्ली चक्राङ्गा मधुपर्णिका। वत्सादनी च दध्याली मेचका मेयका तथे 'ति **केयदेवः**। [ *45 a* ]. श्रीपर्णीति। हठो—वारिवारणं। मुदी—गम्भारी। सप्तपर्णो—विशालत्वक्। कट्फलः—कटुफलः।

१६४. कुम्भी—पाटला। शाल्मली स्थिरायुः। पुण्डरीकं—सिताम्भोजं। अग्निमन्थोऽरणिः। सरणीति। कुन्दो—माध्यः। सारणी—प्रसारणी। 'प्रसारणी सुप्रसरा सारणी सरणी च से 'ति **केयदेवः**। सुषेणेति। त्रिवृतामिद्—'मसूरविदला काला कालमेषी सुषेणिके 'ति [८६०] **केयदेवः**।

१६५. आविघ्नः—पाककृष्णफलः। वानीरो[८६१]—वेतसः। 'लसनो मञ्जरी नम्रः सुषेणो गन्धपुष्पक ' इति **धर्मिष्ठः**। सुपर्ण[८६२] इति। कृतमालकः—शम्पाकः। 'सुष्ठुपर्णान्यस्य शोभनो वर्णोऽस्येति वे 'ति **रामाश्रमाः**। कमलिनी—नलिनी। पर्णः—सप्तपर्णः। सौम्या—शालिपर्णी।

१६६. सुवर्णेति। जोङ्गकं—अगुरु। काञ्चनं—हेम। हरिचन्दनं—क्षुद्रचन्दनं। [८६३]हरेणुरिति। रेणुका—कौन्ती। सतीनकं—कलापः। 'प्रज्ञाघणिसातीनोऽपी 'ति **माधवी**। 'त्रिपुटः खण्डिकः सात्या वज्रबीजा कलापिका। श्यामोऽतिवर्तुलः सस्यादङ्कटः स हरेणुक ' इति **सिंहः**। 'कलापेऽपि हरेणुर्ना रेणुकायां स्त्रियां भवेदि 'ति **रुद्रः**। 'कलापस्त्रिकटः प्रोक्तः सतीनो वर्तुलो[८६४] मतः। हरेणुरङ्कटो ज्ञेय ' इति **व्याडिः**।

१६७. पाच। चारुपर्णीति। भद्रपर्णी—प्रसारिणी। 'प्रसारणी सुप्रसरा सारणी सरणी च सा। चारुपर्णी राजबलो[८६५] भद्रपर्णी प्रतानिके 'ति [८६६]**केयदेवः**।

---

८५९. सुदर्शन. ८६०. कय०. ८६१. Text—वानेर. ८६२. सुपर्णा in the text. ८६३. हरिणुः—in the text. ८६४. वर्तु०. ८६५. राजबला. ८६६. कय०.

मुनिप्रियः—पलाशः । [ 45 b ]. जीर्णपर्ण इति । [८६७]खर्जूरी—दृढस्कन्धा । पिचुमर्दः[८६८]—पिचुमन्दः ।

१६८. तिलपर्णीति । कुन्तली—कुलिञ्जकः । ' कुलिञ्जकः[८६९] कुन्तलिका बदरस्तिलपर्णिके[८७०] 'ति [८७१]केयदेवः । तिलपर्णी—खरच्छदा[८७२] । ' सादित्या पूतिगन्धा च शम्बिनी 'ति शाकभेदः । " हु ल हु ल " इति डल्लणः । ' " चि र पो टी " 'त्येके । कुन्तली—' चञ्चुसदृशा दीर्घपत्रे 'ति हेमाद्रिः । [८७३]बर्बरः—' तिलपर्णी बदरको बर्बरश्च प्रकीर्तित ' इति केयदेवः । शाकभेदः । चन्दनं—हरिप्रियं । तैलपर्णीति । मलयजं—चन्दनं । सिल्हः—पिण्याकः[८७४]। श्रीवासः—चीडाश्रावः ।

१६९. पीलुपर्णीति । बिम्बा—रक्तफला । मूर्वा—मधुरसा । क्षीरमोरटो—मूर्वाभेदः। पृथक्पर्णीति । स्निग्धपर्णी—मूर्वा । पृष्टिपर्णी—कलशी । यवासको—यासः ।

१७० मधुपर्णीति । अमृता—गुडूची[८७५] । अम्भोजा—मधूलिका । काश्मरी—गम्भारी । [८७६]नीलिनी—नीली । रक्तरेणुरिति । सिन्दूरं—नागरक्तं । ' नागरक्तं रक्तरेणुर्नागजं रक्तवालुक 'मिति सिंहः । पलाशः—किंशुकः । ' नवपलाशपलाशनं पुर ' इति तालव्योपान्त्यः । तस्य कोरकः—कलिका । ' कलिका कोरकः पुमानि ' त्यमरः । क्लीबमपि । ' समुपहरन् विचकार कोरकाणी 'ति माघः । [ 46 a ].

१७१. शतपर्ण इति । सुपर्णो—युग्मच्छदः[८७७] । शाल्मलीसदृशपर्णो गजमदगन्धिपुष्पः [८७८]शरदि विकसनशीलः उच्चैर्वृक्षः । ' " छ त व नि " इति लोके ' इति डल्लणः । मत्स्यपित्ता—कटुकी । शुकपर्णमिति । स्थौणेयं—शुकच्छदं[८७९] । ' स्थौणेयकं बर्हिचूडं शुकवर्णं शुकच्छदं[८८०] 'मिति गुणरत्नमाला । ' ग्रन्थिपर्णस्यैव भेद ईषत्सुगन्धिः स्थौणेय 'मिति भावमिश्रः । मोचा—कदली । ग्रन्थिपर्णी—नीलपर्णं चारटी तैलपर्णकं । कुक्कुरं शुकपर्णं च तद्धि कर्चूरभिन्नमत 'मिति धर्मिष्ठः ।

१७२. स्निग्धपर्णीति । सिंहपुच्छी[८८१]—पृष्टिपर्णी । मूर्वा—मधुरसा । ' मूर्वा वचा तुल्यपत्रे 'ति सिंहः । पिप्पलश्चलदलः । सुनिषण्ण इति । चतुःपत्रः—सुनिषण्णश्चतुर्दलः । चाङ्गेरीसदृशपर्णः । सितिवारकः—कृष्णसूक्ष्मबीजः ।

१७३. सूर्यपर्णीति । मुद्गपर्णी—मृगगन्धा । माषपर्णी—हयपुच्छिका । हस्तिकर्ण इति । ब्रह्मवृक्षः—पलाशः । चन्दनं—मलयोत्थं ।

---

८६७. खज्जूं०. ८६८. मर्द्दः. ८६९. कुलिन्तकः. ८७०. ०पर्णीकेति०. ८७१. कय०. ८७२. छदा०. ८७३. वर्वरः. ८७४. पिन्याकः. ८७५. गडूची. ८७६. नीलिना. ८७७. छदः. ८७८. सरदि. ८७९. छंदं. ८८०. छद. ८८१. पुछी.

१७४. करहूं—बदरीछदं। 'सामुद्रं हस्तिकर्णं च हनुकं बदरीछद 'मिति **धन्वन्तरिः**। रक्तैरण्डः—'अन्यो रक्तो हस्तिकर्णो व्याघ्रो व्याघ्रतरोरुबु 'रिति। हस्तिकर्णोरुबूके स्यात् पलाशगणभेदयो 'रिति **विश्वः**। [ *46 b* ]. हस्तिपर्ण इति। वर्धमाने[८८२]—एरण्डः। गुह्यबीजकः—भूस्तृणः।

१७५. धामार्गवो—राजकोशातकी। क्षीरमोरटो—मूर्वाभेदः। 'घनमूलोऽपरः क्षीरमोरटोऽङ्कोटपुष्पकः। हस्तिपर्णी पीलुपत्रः पुरुषो बद्धमूलक ' इति [८८३]**केयदेवः**। कर्कटीभित्—गाङ्गी। णपं। मण्डूकपर्ण[८८४] इति। श्योनाकः—शुकनाशः। अरलुष्टिण्टुकः। कपीतनः—पार्श्वपिप्पलः।

१७६. मञ्जिष्ठा—समङ्गा। ब्राह्मी—स्मारिणी। गोजिह्वा—स्वरछदा[८८५]। लोमशपर्णीति। गरागरी—देवदाली। माषपर्णी—पाण्डुरा। णान्ताः।

१७७. तद्दिः। कान्तेति। प्रियङ्गुर्महिलाह्वा। लोहस्तीक्ष्णः। 'यत्पात्रे न प्रसरति जले तैलबिन्दुः प्रतप्ते। हिङ्गुर्गन्धं त्यजति च निजं तिक्ततां निम्बकल्कः। तप्तं दुग्धं भवति शिखराकारकं नैति भूमिं। कृष्णाङ्गः स्यात्सजलचणकः कान्तलोहं तदुक्त 'मिति। 'लोहोऽस्त्री शस्त्रकलहे जोङ्गके सर्वतैजसे ' इति **मेदिनी**। कुन्त इति। गवेधुकस्तृणधान्यं। गन्धवीरा—शल्लकी। रेणुका—कौन्ती। पलङ्कषो—गुग्गुलुः।

१७८. कृत्तिरिति। भूर्जो[८८६]—लेख्यपत्रः। त्वचा—त्वक्। घृतमिति। आज्यं—सर्पिः। जलं—पानीयं। जातिरिति। 'जातीफलं जातिसस्यं जातिर्जातीफलेऽपि चे 'ति **रभसः**। धात्री—आमलकी। मालती—सुमना। रक्तचूर्णका—कम्पिल्लः। 'जातिर्जातीफले धात्र्यां चूल्लीकम्पिल्लयोरपी 'ति **विश्वः**। [ *47 a* ].

१७९. तिक्तमिति। रजः—पर्प्पटः। कठिल्लः—कारवेल्लः। भूनिम्बः—किराततिक्तः। 'भूनिम्बस्तु किरातः किराततिक्तश्च तिक्तश्चे 'ति **हृदयदीपकः**। 'चिरातिक्तः किरातश्च भूनिम्बहिमकावपी 'ति **रभसः**। काण्डरुहा—कट्वी। 'तिक्ता काण्डरुहा कट्वी चक्राङ्गी जननी कटु 'रिति **धर्मिष्ठः**। कटुतुम्बी—कट्वलाबुः। कट्वीका—करञ्जः। काकणन्ती—गुञ्जा।

१८०. तेजोवती—ज्योतिष्मती। करञ्जीवल्ली—करञ्जः। रक्तो—रोही। भल्लक—इङ्गुदी। दृढस्कन्धो—धवः। धातुरिति। शिलादि—'सुवर्णरूप्यताम्राणि

---

८८२. वर्द्ध०. ८८३. कय०. ८८४. मंडक०. ८८५. ०छदा. ८८६. भूर्ज्जो.

हरितालं मनःशिला। गैरिकाञ्जनकासीससीसलोहाः सहिङ्गुलाः। गन्धकोऽभ्रकमित्याद्या धातवो गिरिसम्भवा ' इति वृद्धाः। श्लेष्मादिः—' श्लेष्माद्या दूषणाद्दोषैर्धारणा धातवो मता ' इति। रसादिः—रसा ' असृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातव ' इति वाग्भटः। गैरिकं—गिरिमृत्। ' गैरिकं धातुरुक्मयो 'रिति धातुशब्देनैव प्रसिद्धत्वात् पृथगुपादानं अस्थिनलकादि तस्यापि मुख्यत्वेन देहधारणात्पृथगुपादानं। [ *47 b* ].

१८१. धूर्तमिति। खण्डलवणं—बिडं। ' कृत्रिमकं[887] धूर्तं क्षारं द्राविडमासुरं। सुपाक्यं खण्डलवणं कृत्रिमं चे 'ति धन्वन्तरिः। धुस्तूरः—कनकाह्वयः। चण्डोद्रुः—पुत्रकः। ' चोरकः शङ्कितश्चण्डो धूर्तोद्रुः पुत्रको रिपु 'रिति माला। नत इति। कुटन्नटः—श्योनाकः। कालीनुसार्यं—तगरं।

१८२. पीतेति। तेजोवती—ज्योतिष्मती। दार्वी—पञ्चपत्रा। रजनी—हरिद्रा। रोचना—गोरोचना। रक्त इति। रोही—रोहितकः। ' रोहीतको दीर्घपत्रो द्रुमो गिरौ। पीतारुणैर्दाडिमाभैः[890] पुष्पैर्द्रुः फलशङ्किकै 'रिति। कम्पिल्लो—रक्तचूर्णः। [891]हिङ्गुलं—हंसपादिकम्। ताम्रं—शुल्बं।

१८३. ' प्राचीनामलकं—' प्राचीनागरी चापि रक्तक 'मिति। धीरं—कुङ्कुमं। वसन्तोत्सवमण्डनं—सिन्दूरं। रक्ताङ्गी—मञ्जिष्ठा। रीतिरिति। लोहाकिट्टमयोमलं। आरकूटं—पीतलोहं।

१८४. लतेति। ज्योतिष्मती—कङ्गुणिका। स्पृक्का—मोहना। ' लता कस्तूरिका ज्ञेया कटुर्दक्षिणदेशजे 'ति [893]कैयदेवः। दूर्वा—हरिता लता। प्रियङ्गुः—महिला[894]। माधवी—अतिमुक्तः। नखः—स्मराङ्कुशः। ' लता प्रियङ्गुनखयो 'रिति कोषान्तरम्। [ *48 a* ].

१८५. शितासिता चेति। उपला—श्वेता। श्वेतचन्दनं—सितचन्दनं। शीतमिति। मलयजं—चन्दनं। रूप्यं—रजतं। जलकुम्भी—हठः।

१८६. वानीरो—वेतसः। बहुवारः—सेलुः। ' शीतं तुषारवानीरबहुवारद्रुमेषु[895] चे 'त्यजयः। ' वेतसे बहुवारे ना गुणे शीतं हिमे त्रिष्वि 'ति रभसः। ' शीतो[896]

---

८८७. दोषा०. ८८८. धूर्त०. ८८९. ०सार्य्यं. ८९०. द्राडि०. ८९१. हिंगुल. ८९२. स्पृका. ८९३. कय०. ८९४. महीला. ८९५. बाहु०. ८९६. स and श are indiscriminately used in this quotation.

नभःसरिति लाङ्गलपद्धतौ च । शीतौ[८९७] दशाननरिपोः सहधर्मिणी च । [८९९]शीतं स्मृतं हिमगुणे च तदन्विते च । 'शीतोऽलसे च बहुवारतरौ च दृष्ट' इति तालव्यादौ धरणिः[९००] । शुक्तिरिति । शङ्खः—कम्बुः । नखः—स्मराङ्कुशः । श्वेतेति । सिता—शर्करा । 'सिता सितोपला खण्डं मत्स्यण्डी शर्करा शिते'ति हृदयदीपकः । वचा—षड्ग्रन्था । शङ्खा—चोरपुष्पी । विदारी—स्वादुकन्दा । 'विदारिका स्वादुकन्दा शिता शुक्ला शृगालिके'त्यभिधान[९०१]चूडामणिः । पाटलाभित्—काष्ठपाटला ।

१८७. गवादनी—गिरिकर्णी । 'अथ गिरिकर्णिका वल्ली जातीदला शम्बीफला योनिसुमा स्थिरा सितासितसुमे[९०२]'ति । रूप्यं—रजतं । हरिचन्दनं—श्वेतचन्दनं । तत्रिः । अमृतमिति । अक्षो—विभीतकः । दुग्धं—पयः । अम्बु—जलं । सुधा[९०३]—पीयूषं । काकोलो—विषं । सर्पिर्घृतं ।

१८८. द्राक्षा—गुडा । कृष्णा—पिप्पली । अभया—हरीतकी । धात्री—आमलकी । छिन्ना—गुडूची । कुल्या—जीवन्ती । [48 b]. अनन्त इति । पिपलश्चलदलः । दूर्वा—हरिता । पथ्या—हरीतकी । कणा—पिप्पली ।

१८९. दन्ती—निकुम्भः । दुरालभा—दुरालम्भा । धात्री—आमलकी । छिन्ना—गुडूची । कर्पासिका—वयनी । 'विशल्याग्निशिखानन्ता वह्निचक्रा च गर्भनुत्' । गोपी—सारिवा । श्योनाक—अरलुः । तगरं—नतं ।

१९०. आस्फोत[९०४] इति । अर्को—अर्कपर्णः । 'आस्फोतस्तु पुमानर्कपर्णे स्यात्कोविदारक' इति मेदिनी । 'आस्फोता विष्णुक्रान्तायां वनमल्ल्यर्कपर्णयो[९०५]'रिति रभसः । श्यामा—सारिवा । मल्लिकाभित्—वनमल्ली । 'आस्फोतया समास्फोटे'ति सिंहः । श्वेताश्वखुरा । कोविदारः—काञ्चनारः । उन्मत्त इति । कनको—धत्तूरः । असनो—बीजकः ।

१९१. मुचकुन्दः[९०६]—प्रतिविष्णुकः । कापोतमिति । रुचकं[९०७]—सौवर्चलं । नेत्रभूषणं[९०८]—सौराञ्जनं । जीवन्तीति । शमी[९०९]—पवित्रपत्रा । जीवा—जीवनी । छिन्ना—गुडूची । वन्दा[९१०]—वृक्षादनी । अभयाभित्—सुवर्णवर्णा । 'जीवन्ती'ति वाग्भटः ।

---

८९७. Rather सीता. ८९८. दशनन॰. ८९९. शीत. ९००. धरणिः. ९०१. त्यधान॰. ९०२. सुमेतेत्विति. ९०३. सुखा in the text. ९०४. आस्फोट—in धन्वन्तरि p. 136. ९०५ वम॰. ९०६. मुचकन्द in the text. ९०७. रुचक. ९०८. नेत्रमूषण. ९०९. समी. ९१०. बंदा in the text.

१९२. रक्तमार्षो—रक्तनालो वास्तुकः। 'जीवन्तो रक्तनालः स्यात्तालपत्रः प्रणालकः। शाकवीरः सुमधुरो वास्तुको मार्षकः स्मृत' इति [111]**केयदेवः**। [ *49 a* ]. जीमूत इति। मुस्तमम्बुधरः। घोषो—देवदाली। 'जीमूतो देवदालिका-वेणी 'ति **हृदयदीपकः**। त्रिवृत इति। स्नेहभेदः—' द्वाभ्यां त्रिभिश्चतुर्भिस्तैर्यमकस्त्रि-वृतो महानि 'ति **वाग्भटः**। अरुणाभित्—श्याममूला त्रिवृत्।

१९३. द्रवन्तीति। दन्तिकाभेदः—" शं व री "ति लोके ख्यात इति **डह्लणः**। रुदन्ती—स्रवत्तोया। 'चणपत्रसमं पत्रं क्षुपञ्चैव तथा[112]कृतिः। शिशिरे जलबिन्दूना[113] स्रवन्तीति रुदन्त्यके' त्यभिधानचूडामणिः। रोदनी—कच्छुरा। पार्वतीति। जीव-नीया—हरीतकी। शल्लकी—गजभक्ष्या।

१९४. बृहतीति। महती—बृहत्कण्टकारी। क्षुद्रा—लघुकण्टकारी। कलशी—पृष्टिपर्णी। राष्ट्रिका—भण्टाकी। मालतीति। अग्निशिखा—विशल्या। पाठा—पापचेली। वायसी—काकमाची। सुमना—मा[114]लती। 'सुमनायाश्च पत्रेण पटोलारिष्टयोस्तथे'ति **सुश्रुतदर्शनात्** टावन्ताः सान्ता च। 'सुमनाः प्राज्ञदेवयोः। जात्यां पुष्पे' इति **हैमः**। सा[115]न्तवर्गे। [ *49 b* ].

१९५. रोहितमिति। कुङ्कुमं—बाल्हीकं। रोही—वनतिक्तः। 'प्लीह-शत्रुर्वनतिक्तश्च रोहित 'मिति **माधवः**। लोहितमिति। कुङ्कुमं—बाल्हीकं। रक्तचन्दनं—लोहितचन्दनं। कुचन्दनं—पत्राङ्गं।

१९६. वासन्तीति। प्रहसन्ती—भ्रमरबान्धवी। 'वासन्ती प्रहसन्ती च सुवसन्ता वसन्तजा। शोभना शीतसंवासा मेघ्या भ्रमरबान्धवी 'ति **धन्वन्तरिः**। " से व ती "ति लोके ख्याता। माधवी—त्वतिमुक्तकः। बालपुष्पा—यूथी। कुम्भी—वसन्तदूती। श्रीमान्—तिलकः। अशोको—वीतशोकः। अक्षो—विभीतकः। मुद्गः—कृष्णमुद्गः। 'वासन्तः कृष्णमुद्गः स्यात् पीतमुद्गस्तु शारदः'। चूत—आ[116]म्रः।

१९७. श्रीमदिति। रक्तं—सिन्दूरं। मुण्डी—श्रावणी। मल्ली—वार्षिकी। अश्वत्थः—पिप्पलः। रेची—मुखमण्डनस्तिलकापर्या[117]यः। सुव्रतेति। महिलाह्वा—प्रियङ्गुः। मल्लिका—मदनीया। [118]मल्लिकाभित्—वनमल्ली आस्फोताभिधाना।

---

१११. कय०. ११२. ०कृति. ११३. बिंदूना. ११४. मालती०.
११५. हैमस्सांतवर्गे. ११६. आम्रः. ११७. मर्यायः. ११८. मालिका०.

१९८. तच। अतिमुक्त इति। माधवी—सुवसन्ता। कालस्कन्धस्तिन्दुकः। 'तिन्दुको नीलसारश्च कालस्कन्धोऽतिमुक्तक' इति नाममाला। रथद्रुमः—स्यन्दनः। 'तिनिशः स्यन्दनो नेमी रथद्रुरतिमुक्तक' इति। [50 a]. अंशुमानिति। भास्करोऽर्कः। शालिपर्णी—स्थिरा।

१९९. ऋष्यप्रोक्तेति। शतावरी—शतमूली। 'शतावरी शतपदी पीवरी [119]धीवरी वरी। ऋष्यप्रोक्ता द्वीपिशत्रु 'रिति धन्वन्तरिः। शूकशिम्बी—कपिकच्छूः। 'ऋष्यप्रोक्ता शूकशिम्बी कपिरोमफलर्षभी 'ति [120]कैयदेवः। बलाभित्—अतिबला। 'ऋष्यप्रोक्ता ऋष्यगन्धा सैव भूरिफला मते 'ति धन्वन्तरिः। ऐरावत इति। नागरङ्गो—नारङ्गः। 'ऐरावतो नागरङ्गो नारङ्गो मुखवासन 'इत्यमरः। लकुचो—डहुः। 'लकुचो लिकुचो डहु 'रित्यमरः।

२००. कलधौतमिति। सुवर्ण—काञ्चनं। रजतं—रूप्यं। 'कलधौतं रूप्यहेम्नो। रित्यमरः। कृष्णवृन्तेति। माषपर्णी—महासहा। कौ[121]ंभरी—गम्भारी। पाटला—वसन्तदूती'

२०१. गारुत्मतमिति। मरकतं—हरिन्मणिः। 'गारुत्मतं मरकतमश्मगर्भ हरिन्मणि 'रित्यमरः। 'हरित्स्वच्छं भास्[122]वन्मरकत 'मिति' गरुडोद्गारः—विषहरमणिः। "जहरमुहरा" शब्दवाच्यः। 'गारुत्मतं विषघ्ने च मणौ मरकते तथे 'ति मेदिनी। [50 b]. चन्द्रकान्त इति। मणिभेदः—'शशिकान्तसूर्यकान्तौ मेदौ स्फटिकस्य निर्दिष्टौ। रविकान्[123]तो वह्निमणिस्तोयमणिश्चन्द्रकान्ताख्य' इति धर्मिष्ठः। कैरवं—'सिते कुमुदकैरवे' इत्यमरः।

२०२. ज्योतिष्मतीति। काकजङ्घा—नदीकान्ता। कङ्गुणिका—पीततैला। तेजोवतीति। वचा—षड्ग्रन्था। [124]तेजःपत्री—तेजोह्वा। ज्योतिष्मती—कङ्गुणिका।

२०३. नदीकान्त इति। सिन्दु[125]वारो—निर्गुण्डी। हिज्जलः—इज्जलः। काकमाची—काकतिक्ता। "मस्सी" ति लोके। जम्बूभित्—'काकजम्बूः क्षुद्रफला नादेयी गन्धपल्लवे 'ति कैयदेवः। वायसी—ध्वांक्षनासा। 'पारावतपदी दासी नदीकान्ता प्रचीवले 'ति कैयदेवः। "म को ई" इति लोके।

२०४. नन्द्यावर्त इति। नतं—तगरं। 'नन्द्यावर्तो गृहान्तरे तगरे चे 'ति हैमः। बर्हिशिखा—नीलकण्ठशिखा। वेतसो—वञ्जुलः। 'वेतसो नम्रकः प्रोक्तो [126]वानीरो

---

११९. इन्दीवरी is the reading of धन्वन्तरि-p. 66. १२०. कय०. १२१. काश्मरी. १२२. भास्क०. १२३. रविकांतो. १२४. तजः. १२५. सिंदुवासे।. १२६. वानारो.

वञ्जुलस्तथे 'ति । नागदन्तीति । मूषकाह्वा—द्रवन्ती । दन्ती—निकुम्भः । इन्द्राह्वा—इन्द्राणी । 'हस्तिदन्ती नागदन्ती वारुणी गैजचिर्भिटी 'ति निघण्टुः । कुरूढकः—शितिवारकः । 'नागदन्ती निकुम्भायां विशालावृषयोरपी 'ति लोचनः । [ 51 a ].

२०५. अथ प्रव्रजितेति । भूतजटा—मांसी । भूतकेदम्बो—मुण्डी । पारिजात इति । मन्दारः—'पारिभद्रो निम्बतरुर्मन्दारः पारिजातक ' इति भावमिश्रः । रक्तपुष्पः कण्टकी बृहन्मञ्जरीको वृक्षः "नु ह स दा "भिधानो लोकप्रसिद्धः । पारिभद्रो—निम्बः । 'पारिभद्रौ तु मन्दारनिम्बा ' विति हैमः । सुरद्रुमः—'पञ्चैते देवतरवो मन्दारः पारिजातकः । सन्तानं कल्पवृक्षश्च पुंसि वा हरिचन्दन ' मित्यमरः ।

२०६. पारावतीति । श्यामलं—लवलीफलं । जम्भीलो—जम्भः । कपितिन्दुको—मर्कटतिन्दुकः । अथ पीतरक्त इति । बाल्हीकं—कुङ्कुमं । पद्मकः—पद्मकाष्ठम् । कुसुम्भो—लट्वा ।

२०७. मदयन्तीति । मदनीया—धातकी । प्रमोदिनी—मल्लिका । बालपुष्पा—यूथी । वरतिक्तेति । पापचेली—पाठा । अगस्त्यो—मुनिः । पर्पटो—रजः । 'वरतिक्ता पापचेल्यां पर्पटे च मुनिद्रुमे ' इत्यनेकार्थध्वनिमञ्जरी ।

२०८. वनस्पतिरिति । द्रुमात्रं—वृक्षमात्रं । 'विनापुष्पं फलद्रुमे ' इति स्पष्टम् । 'द्रुमजातौ वनस्पति 'रित्यजयः । 'वनस्पतिर्वृक्षमात्रे विनापुष्पफलद्रुमे ' इति विश्वः । [ 51 b ]. व्याधिघात इति । आरग्वधः—शम्पाकः । अम्लवेतसः—इज्जलः । 'व्याधिघातः प्रग्रहे जलवेतस 'इत्यभिधानचूडामणिः ।

२०९. विष्णुक्रान्तेति । नीलपुष्पी—शङ्खिनीभेदः । कटभी—अपराजिता । आमलकीभित्—प्राचीनामलकं । विकङ्कतेति । अतिबला—'बलिकातिबला ज्ञेया वाट्यपुष्पी विकङ्कते 'ति धन्वन्तरिः । "क क ही "ति लोके ख्याता । स्रुवोद्रुमः—'व्याघ्रपादःस्रुवतरुः स्वादुकण्टो विकङ्कत ' इति कैयदेवः । 'वृक्षकण्टकारी 'ति डल्लणः ।

२१०. शतक्रतुरिति । श्वेतकरवीरः—सितपुष्पोऽश्वमारः । वत्सकः—कुटजः । समुद्रान्तेति । कर्पास्याच्छादनफला । स्पृक्का—माल्यवर्ती । यवासको—दुःस्पर्शः ।

---

१२७. ०र्चिर्भि०. १२८. जरा०. १२९. कंबो–द dropped. १३०. मंदार. १३१. तिंडुकः. १३२. वाल्हीक. १३३. प्रमोदनी. १३४. ०चेती. १३५. पर्प्पटो. १३६. फलि०. १३७. इत्यधान०. १३८. आमकी. १३९. स्पृका.

२११. सूर्यभक्तेति[१४०] । बन्धुजीवः—शरत्पुष्पः । 'बन्धुजीवः शरत्पुष्पो बन्धुबन्धूकरक्तका' इति **केयदेवः** । 'सूर्यभक्तो बन्धुजीवे तथा भास्करपूजक' इति **विश्वः** । रविवल्ली—सुवर्चला[१४१] । हैमवतीति । अतसी—उमा । पथ्या—हरीतकी । हेमक्षीरी—हिमावती । 'पटपर्णी हैमवती हेमक्षीरी हिमावती 'त्यमरः । 'हेमवर्णं पयस्तस्या हिमवद्भूमिसम्भवा । सा नागजिह्विकाकारा तन्मूलं चोक उच्यते' इति । वचा—षड्ग्रन्था । 'हैमवत्यभयास्वर्णक्षीर्योः श्वेतवचोमयो (= अतसी[१४२] =)' रिति **विश्वः** । [52 a].

२१२. तपं । अपराजितेति । कटभी—विष्णुक्रान्ता । शणपर्णी—शणः । सूक्ष्मपत्रा—जयन्ती । वसन्तदूत इति । चूत—आम्रः । माधवी—अतिमुक्तकः । कुम्भी—पाटला ।

२१३. द्विजकुत्सित इति । पलाण्डुर्म्लेच्छकन्दः । 'पलाण्डुर्यवनेष्टश्च सुकन्दो मुखदूषण' इति **धन्वन्तरिः** । 'रसोनकन्दो म्लेच्छानां कन्दश्चापि प्रसिद्धकौ । मुद्गीरिकदलौ वृत्तौ दुर्गन्धौ नीचवल्लभा 'विति । 'श्लेष्मातके म्लेच्छकन्दे रसोने द्विजकुत्सित' इति **विश्वलोचनः** । बहुवारकः—श्लेष्मातकः । तान्ताः । यद्विः । ग्रन्थीति । पिप्पलीमूलं—चटकाशिरः । 'मूलं पिप्पलिमूलं तु ग्रन्थिकं चटकाशिरः । कोलमूलं कटुर्ग्रन्थि 'रिति **धन्वन्तरिः** । ग्रन्थिपर्णं—शुकपर्णं कर्चूरभेदः । 'ग्रन्थिस्तु[१४३] ग्रन्थिपर्णे स्या 'दिति **हैमः** । 'ग्रन्थिनी पर्वणि ग्रन्थिपर्णे रुग्भिदि च स्त्रियां । कौटिल्ये बन्धभेदे चे 'ति **विश्वलोचनः** ।

२१४. तुत्थमिति । अमृतासङ्गं—मयूरग्रीवं । 'तुत्थं स्यादमृतासङ्गं [१४४]कर्परी तुत्थमित्यपी 'ति **रभसः** । 'ताम्रकिट्टं तु कितकं तुत्थ 'मिति । नीली—नीलिनी । बालैला—त्रुटिः । 'तुत्था नीलीसूक्ष्मैलयोरपी 'ति **विश्वः** । [52 b]. पार्थेति । मार्तण्डभक्ता—रविवल्ली । अर्जुनपादपः—फाल्गुनः । 'अर्जुनः फाल्गुनः पार्थश्चित्रयोधी धनञ्जयः' इति **माला** । 'अर्जुनस्त्वग्रपत्रस्तु श्वेतवाही महीरुहः । क्षीरी कषायः पीताभमक्षीकर्षफलः पृथुः । कपीतनोपमे नृपे दक्षिणाकौङ्कणेषु चे 'ति ।

---

१४०. भक्तेति. १४१. सुवर्चला. १४२. अलसी—given below in the open space as the other word for उमा. १४३. तु. १४४. कर्प्परी.

२१५. पृथुरिति । त्वक्पत्री—हिङ्गुपत्री । कारवी—बाष्पिका । जीरकभेदः । "कलौजी"ति विख्यातः । 'शतपुष्पाभेद इत्येके' इति नारायणभट्टाः । कृष्णजीरकः—प्रसिद्धः । सिक्थ इति । भक्तपुलाकः—भक्तसिक्थकः । मधूच्छिष्टः[१४५]—मयणं ।

२१६. यत्रिः । अथाव्यथेति । हरीतकी—शिवा । चारटी—पद्मा । 'अव्यथातिचरा पद्मा चारटी पद्मचारिणी'त्यमरः । 'स्थलकमलिनी'ति रामः । भिक्षुको—मुण्डी । अश्वत्थमिति । पिप्पलश्चलदलः । प्लक्षः—पर्कटी । वटः—बहुपात्[१४६] । प्रजाहितं—जलं । 'आपः प्रजाहितं शीतमश्वत्थं पवनं विष'मिति केसरमालाः ।

२१७. कायस्थेति । आमलकी—धात्री । छिन्ना—गुडूची । प्रमथ्या—हरीतकी । तुलसी—देवदुन्दुभिः । 'सुगन्धा तुलसी सिद्धे'ति । गोग्रन्थिरिति । करीषः—करण्डकः । 'गोमये तु करण्डकः । करीष' इति सिंहः । गोजिह्विका—गोभी । 'गोभी गोली च गोजिह्वा दार्विका भूमिकालिके'ति धर्मिष्ठः । 'गोग्रन्थिस्तु करीषे स्याद्गोष्ठे गोजिह्विकौषधा'विति विश्वः । [ 53 a ].

२१८. वयःस्थेति । आमलकी—धात्री । सोमवल्लरी—ब्राह्मी । 'ब्राह्मी तु मत्स्याक्षी वयःस्था सोमवल्लरी'त्यमरः । कुण्डली—गुडूची । 'कुण्डली सोमा वयःस्था सोमवल्लरी'ति धर्मिष्ठः । सूक्ष्मैला—त्रुटिः । काकोली—वीरा । हरीतकी—पथ्या । शाल्मली—मानद्रुमः ।

२१९. षड्ग्रन्थेति । वचा—हैमवती । शटी—कर्चूरः । करजान्तरः—करञ्जभेदः । 'करञ्जभेदाः षड्ग्रन्थो मर्कट्यङ्गारवल्लरी[१४७]'त्यमरः । थच । वानप्रस्थ इति । मधुष्ठीलो—मधूकः । मधूके तु 'गुडपुष्पमधुद्रुमौ । वानप्रस्थमधुष्ठीला'वित्यमरः । यज्ञपादपः—किंशुकः । 'वानप्रस्थौ मधूकद्रौ किंशुकाश्रमभेदयो'रिति हैमः । थान्ताः ।

२२०. दद्विः । कन्द इति । मुस्तकमन्दः । शूरणो—महाकन्दः । 'तृणकश्चित्रदण्डो मृदुकस्त्रिभाक् । विच्छिन्नैः[१४८]कदलीवर्षैः सकन्दः शूरणाभिधः । तुञ्ज शततुलोऽप्येष [१४९]वर्धमानो महानपि । गुणाधिकश्च परितो मुख्यं कन्दस्य ये गुडा' इति । असस्यमूलं—असस्यानां फलरहितानां मूलं बुध्नः[१५०] । असस्यानि सुखालु पिण्डालु रक्तालु मधालु शृङ्गवेरादीनि । कुन्दमिति । 'माध्यं कुन्द'मित्यमरः । 'माध्यः कुन्दः कुरण्टक' इति पुंस्काण्डे रत्नकोषः । 'कुन्दं माध्ये च कुन्दस्तु यन्त्रभेदे च

---

१४५. ०छिष्टः. १४६. बहु०. १४७. मर्क०. १४८. विछिन्न. १४९. वर्द्ध०. १५०. बुध्नः.

कुन्दरा 'वित्यजयः। कुन्दरुः[५५१]—मुकुन्दकः। 'कुन्दरुः स्यात्कुन्दुरुकः कुन्दसाह्वो मुकुन्दक' इति। [53 b]. छद—इति।

२२१. ग्रन्थिपर्णः—कर्चूरभेदः। तमालं—'पलाशं रोमशं रोम तमालच्छदनं छद' इति **धर्मदासः**। 'छदः पलाशेऽगरुणि[५५२] ग्रन्थिपर्णतमालयो'रिति **विश्वः**। मद इति। मार्गः—मृगमदः। 'मदो रेतसि कस्तूर्या[५५३]'मिति **मेदिनी**। शीधुरासवः। 'मैरेयमासवः शीधु 'रित्यमरः। शीधुः—पक्वेक्षुरसकृतं मद्यं। 'शीधुरिक्षुरसैः पक्वैरपक्वैरासवो भवे'दिति **निघण्टुः**। 'मैरयं धातुकीपुष्पगुडधान्याम्बुसाधित'मिति **माधवः**। 'श्येनः शनैः श्लीपदशिग्रुशीधुशुद्धान्तशान्ताः शितिशूर्पशौण्डा' इति **द्विरूपकोशात्तालव्यादिः**। शीधुपुष्पा—धातकी। जम्बालः[५५४]—कर्दमः[५५५]। शष्पं—बालतृणं[५५६]।

२२२. दत्रिः। इङ्गुदीति। तापसतरुः—दीर्घकण्टकः[५५७]। श्लीपदापहः—पुत्रञ्जीवः। 'पुत्रञ्जीवस्तु श्लीपदापह' इति **त्रिकाण्डशेषः**। औद्भिदमिति। क्षारतोयोत्थलवणं—स्पष्टम्। 'औद्भिदं पांशुलवणं रोमकं वसुकं[५५८] वस्वि'ति **धन्वन्तरिः**। नगभित्—पाषाणभेदः। 'औद्भिदं रेणुलवणे तथा प्रस्तरभेदके' इति। **वोपालितः**। [54 a].

२२३. क्षणदेति। हरिद्रा—वरवर्णिनी। सर्वतोमुखं—पानीयं। 'क्षणदा स्त्री हरिद्रायां कीलालेति नपुंसक'मिति **रभसः**। कुमुदमिति। कैरवं—'सिते कुमुदकैरवे' इत्यमरः। पद्मं—रक्तपद्मं। 'कुमुदं कैरवं रक्तं पङ्कजो' इति **विश्वः**। कुम्भी—पर्णी। 'कुमुदा भद्रपर्णी च सदा भद्रा च कट्फले'ति **धन्वन्तरिः**। गम्भारीति प्रसिद्धा। कट्फलः—सोमवल्कलः। 'श्रीपर्णी कुमुदा कुम्भी भद्रा भद्रवती त्रुटि'रिति [५५९]**केयदेवः**। 'कुमुदा कुम्भिगम्भार्यो'रिति **विश्वः**।

२२४. दरद इति। पारदः—सूतः। चूर्णपारदः—हिङ्गुलं। विषभिद्। "दारद" नाम्नैव ख्यातः। 'दारदो विषभेदे स्याद्धिङ्गुले पारदेऽपि चे'ति **विश्वः**। नलदमिति। पुष्परसो—मकरन्दः। उशीरं—वीरणीमूलं। मांसी—जटामांसी।

२२५. पालिन्दीति। त्रिवृता—सुषेणा। भार्गी—ब्राह्मणयष्टिका। 'मृगुजा भङ्गुरा फञ्जी पालिन्दी भार्गपर्विणी'ति [५५९]**केयदेवः**। प्राणदेति। वृद्धिः—सर्व-

[५५१]. कुंदुरुः but the reading of the text is कुन्दरु. [५५२]. गरुति ? [५५३]. कस्तूर्य्यां०. [५५४]. जंबालः. [५५५]. कर्द०. [५५६]. वाल०. [५५७]. ०कंटका. [५५८]. वस्विति. [५५९]. कय०.

जनप्रिया। पथ्या—हरीतकी। वरदेति। आदित्यभक्ता—सुवर्चला। सूकरी—वाराही-कन्दः। 'वाराही वरदेत्यपी'त्यमरः। हयगन्धा—अश्वगन्धा। [54 b].

२२६. माकन्दमिति। रसाल—आम्रः। आमलकीफलं—धात्रीफलं। विशदेति। क्षुद्रभण्टाकी—ह्रस्वभण्टाकी। विदारी—शृगालिका। 'विदारिकामृता शुक्ला स्वादु-कन्दा शृगालिके'ति **धन्वन्तरिः**। 'विदारी गुल्मका स्थिरा। महाकन्दारिकदला तलपर्णी तैलोनुगे'ति (?)। "शि ला री"ति कुरुक्षेत्रे प्रसिद्धा। लवली—श्यामला।

२२७. विशदमिति। पुष्पकासीसं—'कासीसं भूमिजो धातुर्द्विविधं तदुदी-रितं। एकं तु वालुकापूर्वं पुष्पपूर्वमथापरं। पूर्वं मलीमसं किञ्चित् किञ्चित् पीतमथापर'मिति। केतकः—क्रकचच्छदः। तालव्या मूर्धन्याश्चेत्यधिकारे कोशविशदौ चेति शब्दभेदः। अथ शारदीति। शारिवा—गोपी। 'जम्बूपत्रा दुग्धगर्भा लता गोपी[165] च शारिवे'ति **धर्मिष्ठः**। तोयपिप्पली—कञ्चटं। 'शारदी लाङ्गली तोयपिप्पली कञ्चटं[166] तथे'ति [167] **धर्मिष्ठः**। विषमच्छदः—सप्तपर्णः। 'सप्तपर्णो विशालत्वक् शारदो विषमच्छद'इत्यमरः। 'शारदी तोयपिप्पल्यां सप्तपर्णे च शारदी'ति **रुद्रः**।

२२८. मुस्तकं—मुस्ता। मुद्गोऽत्र पीतमुद्गः—'पीतमुद्गस्तु शारद' इति वच-नात्। काशः—सितपुष्पः। ब्राह्मी—स्मारिणी। [55 a]. दच। कटुकन्द इति। गृष्टिकन्दो—वाराहीकन्दः। 'स्यात्कर्कशवाराहवृषणाकारकन्दका। ताम्बूली छदनावल्ली वाराही गृष्टिरुच्यते' इति। "अ गी ठी"ति शूकरक्षेत्रे प्रसिद्धा। घृष्टिरिति च। पलाण्डुर्म्लेच्छकन्दः[168]। महौषधं—शुण्ठी।

२२९. कुरुविन्द इति। अब्दो[169]—मुस्ता। कुल्माषो—अर्धस्विन्नयवादिधान्यं। माणिक्यं—'माणिक्यं शोणरत्नं स कुरुविन्दोऽतिलोहित' इति **सिंहः**। व्रीहिभित्—'कुरुविन्दो नन्दिमुखोदालौ वरकगन्धनावि'ति **सिद्धमन्त्रः**। 'कुरुविन्दः प्रायः कुरुषु लभ्यते' इति **सिद्धमन्त्रप्रकाशः**। काचलवणं—'श्वेतकाचोद्भवं काचलवणं विन्दक' इति **माला**। रक्तपर्णो—अशोकः। हिङ्गुलं—रक्तं।

२३०. अथ कोकनद इति। रक्तकुमुदं—चन्द्रकान्तं। तद्विधा—शुद्धश्वेतं ईष-द्रक्तं च। रक्तपङ्कजं—हल्लकं। 'रक्तोत्पलं कोकनदं हल्लकं रक्तसंधिक'मिति [170] **केय-**

---

१६०. सुवर्च॰. १६१. तलतुगोते. १६२. पूर्व॰. १६३. किंचित्.
१६४. जंबू॰ १६५. गोपा? १६६. तथे-ति dropped. १६७. धार्मिष्ठः.
१६८ म्लेछ॰. १६९. In the text the reading is ब and not ब्द.

देवः । ‘ कोकनदं तु रक्तयोः । अम्भोजन्मकुमुदयो ’रिति **हैमः** । खरच्छद इति । महापत्रो—भूमिसहः । ‘ भूमीसहोदरो दारुर्वरदारुः स्वरच्छदः । स्थिरकक्षो महापत्रः शाकः सुरभिसारक ’ इति [५६९]**केयदेवः** । पटोली—राजफलः । ‘ राजफलः पाण्डुफलः पटोलः कर्कशच्छद ’ इति **धर्मिष्ठः** । रक्तबिन्दुको—अपामार्गः । ‘ अन्यो वृत्तफलो रक्तबिन्दुकश्च खरच्छद ’ इति [५७०]**धर्मिष्ठः** । [ 55 *b* ].

२३१. गोधापदीति । तालपत्री—मुशली । ‘ मुशली तृणकन्दो मृदुः कृष्णा सदाडिमा सूक्ष्मच्छदश्चे ’ति । हंसपदी—मधुस्रवा । ‘ हंसपदाकारपत्रा पीतपुष्पा जलमुक्तदेशजाता “ ह स वा ” इति लोके ’ इति **डल्लणः** । ‘ त्रिपादी कीटमारिकापर्यायें ’ति **चन्द्रनन्दनः** । “ मु ली स ” इति लोके । महाकन्द इति । शृङ्गवेर—मार्द्रकं । रसोनो—लशुनं । शालनक्षमः—शूरणः ।

२३२. माणको—महापत्रः । ‘ महापत्रस्तु माणक ’ इति **केयदेवः** । मूलकं—हिलमोचिका । विदारीकन्दः—शृगालिका । रम्भा—कदली । सप्तच्छदमिति । सप्तपर्णो—विषमच्छदः । विचिकिलो—मल्लीभेदः ।

२३३. [५७१]दर्षे । पारावतपदीति । काका—काकजङ्घा । नली—कपोतचरणा । ज्योतिष्मती—लता । दान्ताः । धद्रिः । गन्ध इति । लेलीतको—गन्धपाषाणः । कुष्टं—पारिभाव्यं । दधीति । श्रीनिवासः—श्रीवेष्टः ।

२३४. क्षीरस्योत्तरावस्थाभावः—जातं क्षीरं । दुग्धमिति । जीवनं—[५७२]पेयः । क्षीराविका—क्षीरवती । भूमिलग्नावली महती ह्रस्वा च “ दु ग्धी ” त्याख्ययैव ख्याता । ‘ दुग्धी क्षीराविका क्षीरवती क्षीरा च सा स्मृते ’ति **सिंहः** । [ 56 *a* ].

२३५. मधुरिति । पुण्ड्रः—पौण्ड्रकः । ‘ पुण्ड्रेक्षौ पुण्ड्रकः सेव्यः पौण्ड्रकोऽतिरसो मधु ’रिति **वाचस्पतिः** । मधूकं—मधूकपुष्पं । पुष्परसो—मकरन्दः । क्षौद्रं—क्षुद्राकृतं मधु । ‘ क्षौद्रं क्षुद्राः स्वल्पपिङ्गास्तत्कृतं पिङ्गलं मध्वि ’ति **निघण्टुः** । ‘ माक्षिकं पैत्तिकं क्षौद्रं भ्रामरं मधुजातयः । माक्षिकं तैलसङ्काशं घृतवर्णं तु पैत्तिकं । क्षौद्रं तु कपिलं विद्याद्भ्रामरं शशिवर्णक ’मिति दिक् । मद्यं—माध्वीकं । ‘ मधुमाध्वीके क्षौद्र ’मिति **हृदयदीपकः** । क्षीराविका—दुग्धी । जीवन्ती—शाकश्रेष्ठा । राधेति । श्रीफलं—आमलकी । विषोदरी—विष्णुक्रान्ता[५७३] ।

---

५७०. धर्म्मिष्ठः. ५७१. दर्षः. ५७२. पय. ५७३. ०क्रांता.

२३६. वधूरिति। शटी–कर्चूरः। माल्यवती–स्पृक्का[174]। गोपकन्या–सारिवा। प्रियङ्गुर्महिलाह्वा। सुधेति। गङ्गेष्टिका–सुधाशर्करा[175]। 'सिता श्यामा चूर्णप्रकृतिभूता[176] मुष्ककनिचये सुधाशर्करा[177] प्रक्षिप्ता[178] तिलकुन्तलैरादीपयेदि'ति सङ्ग्रहः। मूर्वा–मधुरसा। चूर्णस्ताम्बूलरागकारी क्षारः। 'सिताश्मा शङ्खको वापि दग्धचूर्णःसितो भवेदि'ति। निस्त्रिंशपत्रकः–स्नुही। 'सुधाऽमृते स्नुहीमूर्वालेपगङ्गेष्टिकासु चे'ति विश्वः। [ 56 b ].

२३७. धत्रिः। न्यग्रोध इति। वटोऽश्वत्थः। शमी–पवित्रपत्रा। मोहना–स्पृक्का। एरण्डा–द्रवन्ती। मागध इति। जीरकोऽजाजी। गृष्टिः–वाराहीकन्दः। यूथी–बालपुष्पा। कणा–पिप्पली।

२३८. सुगन्धीति। क्षीरं–पयः। हरिवालुकं–एलवालुकं। सुगन्धि मरिचाकारि मुखशीतलताकारि द्रव्यं। "शी त ल चीनी"त्याख्यया ख्यातं[179] इति लोके। 'सुगन्धैलेयपयसोर्न द्वयो'रिति विश्वलोचनः। धच। इक्षुगन्धेति। कोकिलाक्षः–इक्षुरः। क्रोष्ट्री–कृष्णविदारी। 'क्रोष्ट्रीशृगालिकाकृष्णविदारीअङ्गुलीषु चे'ति मेदिनी। काश–इक्षुवालुका। गोक्षुरस्त्रिकटः।

२३९. इष्टगन्ध इति। सुगन्धिः–अगरुसत्त्वादिः। वालुकं–हरिवालुकं। 'इष्टगन्धः सुगन्धि[180]: स्यादि'त्यमरः। 'त्रिविष्टगन्धोऽगुर्वादिसत्त्वे क्लीबे तु वालुके' इति विश्वलोचनमेदिन्यौ। [ 57 a ] उग्रगन्धेति। अजमोदा–क्षेत्रयवानिका। 'उग्रगन्धा वचाक्षेत्रयवान्योश्छिक्किकौषधा'विति हैमः। वचा–षड्ग्रन्था। क्षुद्विबोधनश्छिक्किकौषधा।

२४०. कालस्कन्ध इति। सारः–खदिरः। 'खदिरश्च महासारः कालस्कन्धः स उच्यते' इति धन्वन्तरिः। तिन्दुः–नीलसारः। 'तिन्दुको नीलसारश्च कालस्कन्धः कुपीलुक' इति [181]धर्मिष्ठः। तमालो–नीलतालः। 'तमाल उक्तस्तापिच्छः कालस्कन्धो महीरुह' इति [182]कैयदेवः। जीवकः–पुत्रंजीवः। तीक्ष्णगन्ध इति। अवदंशः–शोभाञ्जनः। वचा–हैमवती। राजिका–आसुरी।

२४१. परिव्याध इति। कर्णिकारो–द्रुमोत्पलः। अथ 'द्रुमोत्पलः कर्णिकारः परिव्याध'इत्यमरः। 'त्रीणि "क ठ च म्पा" इति ख्यातस्ये'ति रामाश्रमः।

---

१७४. स्पृक्का. १७५. शकरा. १७६. ०भूताः. १७७. शर्करा. १७८. प्रक्षिप. १७९. ख्यात्तं. १८०. सुगन्धि. १८१. धर्म्मिष्टः. १८२. कय०.

'वर्णप्रकर्षे सति कर्णिकार'मिति **कालिदासः**[१८३]। निचुलो–जलवेतसः। 'द्वौ परिव्याधविदुलौ नादेयी चाम्बुवेतस'**इत्यमरः**। चतुरङ्गुलः–शम्पाकः। परिव्योधं[१८४] इति च। 'आरेवतश्चोपघातः सुपर्णश्च परिव्यध' इति दर्शनात्। 'परिव्याधो वेतसे स्यात् कर्णिकारे द्रुमोत्पले' इति दर्शनात्। 'परिव्याधो वेतसे स्यात् कर्णिकारे द्रुमोत्पले' इति **विश्वलोचनः**। [*57 b*]. महौषधमिति। शृङ्गवेरमार्द्रकं। लशुनं–रसोनः। 'उशना लशुनं वेश्म कश्मलं विश्वमश्मवदित्यूष्मविवेकान्मध्यतालव्यः'। विश्वभेषजं–शुण्ठी।

२४२. विषा–प्रतिविषा। विषं–काकोलः। मत्स्याक्षी–हिलमोचिका। अथ महौषधी–'मघी विषघ्नी चक्राङ्गी मत्स्याक्षी हिलमोचिका। जलब्राह्मी च से'ति **त्रिकाण्डशेषः**। मत्स्यपित्ता–कटुकी। हयगन्धमिति। रुचकं–सौवलं। बिल्वं–श्रीफलं। आम्रो–रसालः। जीरकं–जरणं। धान्ताः।

२४३. वह्निः। अग्निरिति। भल्लातकोऽरुष्करः। चित्रः–हुतभुक्। घन इति। मुस्तमम्बुधरः। त्वक्–भृङ्गं। ज्योत्स्नीति। पटोलिका–पटोलवल्ली। श्यामलं–लवलीफलं। घोषः–'ज्योत्स्ना जाली स घोषक' इति **केयदेवः**। "क टु तो र ई" इति ख्यातः[१८५]।

२४४. धानेति। वितुन्नकं[१८६]–धानीयकं धना इति च। 'देवदारु धना विश्वा बृहतीद्वयपाचन'मिति **कस्यापि**। भृष्टयवाद्यन्नं–स्पष्टं। सक्तुको–निस्तुषभर्जित[१८७]यवचणककृतं चूर्णं। 'धाना भृष्टयवे प्रोक्ता धान्याकेऽभिनवोद्भिदी'ति **विश्वः**। 'सायं[१८८] स्मितं सायकसक्तुसेतुसिन्धुस्वरस्तवसमित्सहदेवसङ्गा इत्यूष्मविवेका इत्यादिः'। [*58 a*]. मुनिरिति। पियालश्चारः। 'प्रियालश्च पियालक' इति **माधवः**। दमनस्तपोधनः। "दो नां" इति ख्यातः। अगस्त्योऽगस्तिः। कोरक–इङ्गुदी। किंशुकः–पलाशः। 'मुनिर्वाचंयमे बुद्धे[१८९] पियालागस्तिकिंशुके[१९०]। इङ्गुधामपी'ति **लोचनः**।

२४५. कङ्केलि[१९१]रशोकः। 'अथ कङ्केल्लि[१९२]र्नटः कान्ताङ्घ्रिदोहद' इति **पुरुषोत्तमः**। मेल्ली[१९३]–तैलभाविनी। मृत्स्येति। तुवरी–हेमशोधिनी। मृत्स्ना–प्रशास्ता मृत्। 'प्रशस्तौ[१९४] मृत्सा मृत्स्ना च मृत्तिके'त्यमरः। रास्नेति। भुजेङ्गाक्षी[१९५]–पर्वत–

१८३. कालदासः. १८४. परिव्यध. १८५. ख्याता. १८६. वितुनकं. १८७. मर्जित. १८८. साय. १८९. बुद्धे. १९०. किंशुको. १९१. कक्कोली. १९२. नेटा. १९३. मली. १९४. प्रशास्तान्. १९५. भुजंगाक्षी.

सम्भूता लघुरास्ना[९९६]। 'सर्पाक्षी नकुलेष्टा च सुवहा गन्धनाकुली 'ति **धन्वन्तरिः**। "ना वै" इति लोके ख्याता। एलापर्णी—रसा। 'रास्ना युक्ता गन्धमूला सुरसा रसना रसे 'ति **केयदेवः**। 'रास्ना भृङ्गपत्राऽसितामरौ गिरौ च लघुरास्ना स्या'दिति। 'रास्ना स्मृता भुजङ्गाख्यामेलेपर्ण्यौ[९९७] च कथ्यत ' इति **विश्वः**। 'एलापर्णी तु सुवहा रास्ना युक्तरसा च से 'त्यमरः।

२४६. वनमिति। प्रस्रवणं—पयः। नीरं—जलं। वह्निरिति। चित्रो—हुतभुक्। अरुष्करो—भल्लातकः। [ 58 b ]. नत्रिः। अर्शोघ्न इति। शूरणः—कन्दः। तालपर्णी—मुसली[९९८]। 'अर्शोघ्नी तालमूल्यां स्यादर्शोघ्नः सूरणेऽपि चे 'ति **विश्वः**। अर्थोर्जुन[९९९] इति।

२४७. फल्गुनः—ककुभः। 'फल्गुनः फाल्गुनोऽर्जुन ' इति **द्विरूपकोषः**। 'नदी सर्जो वीरतरुरिन्द्रद्रुः ककुभोऽर्जुन 'इत्यमरः। 'द्वे तृणमात्रस्ये 'ति **रामाश्रमः**। अञ्जनमिति। रसाञ्जनं तार्क्ष्यं। 'दार्वी[१०००]काथमजाक्षीरं पादं पक्वं यदा घनं। तदा रसाञ्जनं ख्यातं नेत्रयोस्ताम्प्रयोजये 'दिति **हेमाद्रिः**। सौवीरं—स्रोतोञ्जनं। 'वल्मीकशिखराकारं भङ्गे नीलोत्पलद्युति घृष्टं तु गैरिकच्छायं स्रोतोजं लक्षयेद्बुध 'इति **वाग्भटाचार्यः**[१००१]। 'स्रोतोञ्जनं मतं श्रेष्ठं विशुद्धं सिन्धुसम्भव 'मिति **श्रुतः**। ओदन इति। भक्तं—अन्नं। 'भक्तमन्नं कूरमंधोभिस्सादीदिविरोदन ' इति **धर्मिष्ठः**। वाव्यालको—बला। 'ओदनो भक्तसिक्थे स्याद्बलायां ( च ) भवेदि 'ति **लोचनः**। [ 59 a ].

२४८. कठिनीति। खटी—नाडीतरङ्गः शिलाधातुः। दारु—पीतदारु। 'प्रनिर्दिष्टो[१००२] वै कठिनो स च कालेयकः स्मृतः। कालीयको दारुनिशे 'ति **रुद्रः**। गुडशर्करा—गुडकृता शर्करा[१००३]। काञ्चन इति। काञ्चनारः—कोविदारः। चम्पको—हेमपुष्पकः[१००४]। नागकेसरः—करिकेसरः।

२४९. उदुम्बरो—जन्तुफलः[१००५]। धत्तूरं—कनकाह्वयः। हरिद्रा—वरवर्णिनी। अब्जकेसरः—कमलकेसरः। हेम—सुवर्णं। क्षीतनमिति। क्षौद्रसाह्वयं—मधुयष्टी।

२५०. सिंहपुच्छी—पृष्टिपर्णी। नीलिका—नीलिनी। गृञ्जन इति। पलाण्डुभेदः। 'लशुनाकारि लोहितसूक्ष्मकन्द 'मिति **मिताक्षरा**। **वाप्यचन्द्रस्तु**

---

९९६. लघू. ९९७ मलापर्ण्यो. ९९८. मूसली ९९९. ०र्जुन. १०००. दार्व्वी. १००१. वाग्भटाचार्य्यः. १००२. प्रनिर्दिष्टा. १००३. शार्करा. १००४. हेमपुष्पक. १००५. जंतु०.

'पलाण्डुर्द्विविधः । एकः दीर्घपत्रादिः । अन्यः सूक्ष्मनालादिः ' । ' गन्धाकृतिरसैस्तुल्यो गृञ्जनस्तु पलाण्डुना । सूक्ष्मनालाग्रपत्रत्वाद्भिद्यतेऽसौ पलाण्डुत ' इति । लसुनमरिष्टं । मधुशिग्रौ—शौभाञ्जनः । [1006]पीतनं—गजरं । ' नारङ्गकण्टं गजरं पीतनं गृञ्जनस्तथे 'ति धर्मदासः । ' गृञ्जनं तु वसोनके । पलाण्डुभेदे शिग्रोश्च भेदे गर्जरकेऽपि चे 'ति विश्वलोचनः । [ 59 b ].

२५१. चन्दन इति । मलयजं—हिमं । सारिवा—गोपी । छर्दन इति । मदनो—राठः । निम्बः—पिचुमर्दः । [1008]बिम्बी—रक्तफला । अलम्बुषा—मुण्डी ।

२५२. जननीति । जतुकृष्णा—पर्पटी । पिशाची—गन्धमांसी । मत्स्यपित्ता—कटुकी । ' जतु पिप्पलिकांकट्वीमांसीषु जननी मते 'ति विश्वलोचनः । जन्तुघ्नमिति । हिङ्गु—सूपधूपनं । चौहारो—यवानीभेदः । ' पारासीय यवानी चौहारो जन्तुनाशन ' इति निघण्टुः । विडङ्गं—चित्रतण्डुलं । शुकप्रियो—निम्बः ।

२५३. जीवनमिति । प्रस्रवं—पयः । नीरमुदकं । चिरजीवी—पुत्रंजीवः । मेदा—मणिछिद्रा । ' जीवनी—जीवना चापि जीवन्तीमेदयोः क्रमा 'दिति मेदिनी । सिद्धिः—ऋद्धिः । वीरा—काकोली । जीवा—जीवन्ती ।

२५४. तेजन इति । शरो—बाणः । वेणुर्वंशः । तेजोह्वा—' तेजस्विनी तेजवती तेजोह्वा तेजनी तथे 'ति । " ते ज व ल " इति प्रसिद्धा । मूर्वा—मधुरसा । दहन इति । अरुष्करो—भल्लाटकः । चित्रो—हुतभुक् । [ 60 a ]. धमन इति । नडः—पोटगलः । निम्बः—शुकप्रियः ।

२५५. निट्—हरिद्रा । ' धमन्यञ्जनकेशी च हरिद्रासिरयोरपी 'ति लोचनः । नटी—नली । ' शुषिरा विद्रुमलता कपोताङ्घ्रिर्नटी नली । धमन्यञ्जनकेशी चे 'त्यमरः । ' नलिका उत्तरापथे " प वा री "ति प्रसिद्धा सुगन्धा प्रवालाकृति 'रिति भावमिश्रः । धावनीति । कुली—क्षुद्रा । निट्—हरिद्रा । पृष्टिपर्णी—कलशी । मुकुटस्तु गुह्यायां 'धावनि' रित्याह । [1011]नलिनमिति । नडः—पोटगलः । नाडी—नाडिकाशाकः । ' नाडो वल्ली जलाम्यर्णी कषायकुसुमा मृदुः सिद्धा चे 'ति । सरोरुहं—पङ्कजं ।

---

१००६. The reading in the text is पीनसि which seems to be wrong. १००७. धर्म्मिदासः. १००८. बिम्बा is the reading in the text. १००९. पर्पटिका ? १०१०. मुकुट०. १०११. नलित०.

२५६. पद्मिनी—[1012]बिसिनी[1013]दिनविकसितकुसुमा । 'करस्पर्शादिन्दोर्मुकुलयति नेत्राणि नलिनी 'ति कश्चित् । 'नलिनी मनःशिलायां च नलिनेऽपि नलं मत 'मिति विश्वः । 'नलिनं तु नले नाडीशाके च [1014]सरसीरुहे । न ना स्त्री स्यात्तु पद्मिन्या 'मिति शब्दार्णवः । नन्दीति । प्लक्षो—गर्द[1015]भाण्डेः । वटो—रक्तफलः । 'नन्दी हरप्रतीहारे [1016]गर्दभाण्डे वटद्रुम ' इति विश्वः । [60 b]. पाचनमिति । दशमूली—बिल्वाग्निमन्थटिण्टूकपाटलाश्रीपर्णीक्षुद्राबृहतीगोक्षुरशालिपर्णीपृष्टिपर्णीमूलसमुदायसंज्ञा । आदिना नागरादिग्रहः । हरीतकी—पथ्या ।

२५७. प्राचीनेति । घनो—मुस्ता । कटुवी—मत्स्यपित्ता । वसन्तदूती—पाटला । पाठीन इति । चित्रो—हुतभुक् । पुरो-गुग्गुलुः । पिशुनमिति । धीरं—कुङ्कुमं । '[1017]कांश्मीरं चारु बाल्हीकं सङ्कोचं पिशुनं वर 'मिति हलायुधः । पृक्का—मोहना ।

२५८. पीतनीति । रङ्गमाला—हरिद्रा । पीतदारु—दारुहरिद्रा । कुङ्कुमं—बाल्हीकं । हरितालमालं । कपीतनः—आम्रातः । 'अथ द्वौ पीत[1018]नकपीतनौ आम्रातक '-इत्यमरः ।

२५९. पूतनेति । शिवा—हरीतकी । मांसी—गन्धमांसी । फलिनीति । हलिनी—अग्निशिखा । स्त्री—प्रियङ्गुः । 'विशल्याग्निशिखाऽनन्ता फलिनी पुष्पवत्यपी 'त्यमरः । वाणिनीति । रजनी—हरिद्रा । [1019]दोर्वी—दारुहरिद्रा । मञ्जिष्ठा—समङ्गा । नीलिका—नीलिनी ।

२६०. भावनमिति । मन्थकः—कपित्थः । भव्यं—कर्मरङ्गफलं । [61 a]. भूतघ्नमिति । चित्रतन्दुलं—विडङ्गं । सूपधूपनं—हिङ्गु । देव[1020]दुन्दुभिस्तुलसी ।

२६१. वचा—हैमवती । सर्षपः—कटुः । 'भूतघ्नं तु विडङ्गे स्याद्रामठे च स्त्रियामथ । तुलसी श्वेतवचयोः पुंसि स्याद्भूतनाशने ' इति विश्वलोचनः । मदन इति । राठः—मदनफलं । [1021]धूर्तः—कनकाह्वयः । सिक्थकमयणं । मार्गो—मृगमदः । रजनीति । नीलिनी—नीली । निद्—हरिद्रा । जनी—जतुका । 'रजनीनीलिकारात्रिहरिद्राजतुकासु चे 'ति मेदिनी । रञ्जनमिति । रक्तं—रक्तचन्दनं । रक्तचूर्णकः—कम्पिल्लः । [1022]स्नुक्—स्नुही । निशा—हरिद्रा । रोचना—मङ्गल्यद्रव्यं । "रोली" इति विख्यातं । नीली—नीलिनी ।

१०१२. विसिनी. १०१३. दित०. १०१४. सरसा०. १०१५. गर्द०. १०१६. वर्द०. १०१७. काश्मीरं. १०१८. पीतनं. १०१९. दार्व्वी, १०२०. दुंदुभे०. १०२१. धूर्त्तः. १०२२. स्नुक.

२६२. जनी–जतुकृत्। रक्ता–मञ्जिष्ठा। 'रञ्जनीनीलिकावञ्जिहरिद्रा-रोचनासु च। जनीमञ्जिष्ठयोश्चापी'ति हलायुधः।

२६३. रसोनेति। विजया–हरीतकी। '[1023]हरीतकी हैमवती रसोना विजया जये'ति सिंहः। महौषधं–[1024]लशुनं। 'रसोनो यवनेष्टश्च लशुनश्च महौषधमि'ति हैमः। [61 b]. रक्षोघ्नीति। जटिला–वचा। चोरपुष्पी–शङ्खिनी। सर्षपः–कटुः।

२६४. सूपधूपनं–हिङ्गु। रेचनमिति। रक्तचूर्णः–कम्पिल्लः। 'कम्पिल्लको रेचनको रञ्जको रक्तचूर्णक' इति निघण्टुः। स्नुक्–स्नुही। त्रिवृत्–सुषेणा। दोला–'नीलिनी [1025]नीलिका नीली काली दोला विशोधिनी'ति [1026]केयदेवः। अभया–हरीतकी। न्हासं–कङ्कुष्टं। 'तत्कङ्कुष्टं काककुष्टं रेचनं रङ्गनायक'मिति। मुकूलकः–जयपालः। "ज मा ल गो टा" इति लोके।

२६५. रोचनेति। रोचनश्च। रक्तकल्हारं–कमलकल्हारं। '[1027]कल्हारं सन्ध्या-विकासि पद्मिनीपुष्प'मिति हेमाद्रिः। रोही–रोहीतकः। जम्भः–जम्भलः। कण्ट-केसरेषु पठितः। शाल्मलिश्चिरायुः। गोपित्तं–गोरोचना।

२६६. कम्पिल्लः–रेची। 'कम्पिल्लको रोचनके'ति हारावली। मङ्गल्यं–हरिद्राचूर्णनिम्बूद्रवटङ्कणसंयोगसम्भूतातिलौहित्यं एलाभिधानं द्रव्यं। रोहीति। रक्तो-रोहितकः। वटो–रक्तफलः। अश्वत्थश्चलदलः। कट्वी–मत्स्यपित्ता। कट्फलः–सोम-वल्कलः कटुफल इति च। 'कटुफलकुलत्थकाण्डनसुखत्रीशुण्ठीभिरार्तिहा[1029] लेप' इति विद्वद्वैद्यवल्लभा[1028] मदनकटुफलत्रिकाण्डदार्वित्यादिप्रयोगदर्शनात्। [62 a].

२६७. अथ रोदनीति। [1030]त्रिभण्डी–त्रिवृताभित्। गुञ्जा–रक्तिका। अनन्ता–कच्छुरा। 'रोदनी कच्छुरानन्ते'त्यमरः। निकुम्भा–दन्ती। ललनेति। लता–प्रियङ्गुः। आत्मगुप्ता–[1031]कपिकच्छूः। [1032]सर्जश्चीडा। पियालश्चारः।

२६८. वितुन्नमिति। वन्यं–मुस्ताभेदः। 'कुटन्नटं प्लवं वन्यं वितुन्नं परि-पेलव'मिति हृदयदीपकः। भूधात्री–भूम्यामलकी। धाना–धान्यं। स्वस्तिकः–सुनि[1033]षण्णः। 'सूचिपत्रश्चतुःपत्रो सुनिषण्णो[1034] वितुन्नकः। श्रीवासः श्रीनिवासः स्वस्तिकः कुक्कुटः सिति'रिति केयदेवः। 'चाङ्गेरीसदृशैः पत्रैः सुनि[1033]षण्णश्चतुर्दशः।

१०२३. हरतकी. १०२४. लमुनं. १०२५. लिका–नी omitted. १०२६. कय०. १०२७. कस्हार. १०२८. मुखधी (?) १०२९. रर्तिहा. १०३०. In the text त्रिदण्डी ? १०३१. कपिकछू. १०३२. सउर्ज०. १०३३. सुनिषण. १०३४. सुनिषणो.

शाको जलान्विते देशे चतुःपत्रीति कथ्यते' इति डल्लणः। शीवलं—शीवालः। विषघ्नीति। नाकुली—रास्नाभेदः। "ना हि" इति लोके। श्वेता—कटभी। गुडूची—सोमा। त्रिवृता—पालिन्दी।

२६९. मोक्षो—मुष्ककः। शिरीषो—मृदुपुष्पः। शतघ्नीति। करञ्जः—करजः। वृश्चिकाली—पुनर्नवा। शङ्खिनीति। श्वेतपुन्नागश्चम्पकभेदः। मेध्या—शङ्खपुष्पी।

२७०. श्लेष्मघ्नीति। मल्लिकाभेदः—[1035]त्रिपुटः। मल्लिकाख्यः। कम्पिल्लकोऽशोकः [1036]कङ्केल्लिरिति च। "कङ्केल्लिवल्लिभिरलम्यत पल्लवालि'रित्यमरचन्द्रः। फणिज्जको—मरुवकः। [62 b]. स्यन्दनमिति। कमुदकं वालकं वा। 'स्यन्दनं [1037]तु स्रुतौ नीरे तिनिशे ना रथेऽस्त्रिया'मिति मेदिनी। नेमिः—'तिनिशः स्यन्दनो नेमी रथद्रुरतिमुक्तकः'इत्यमरः। सन्तान इति। कल्पपादपो—देववृक्षः।

२७१. शृतक्षीरोपरिस्त्यानरूपेति स्पष्टम्। सुमन इति। 'गोधूमको—यवनकः सुमनश्चमठो मत' इति [1038]केयदेवः। 'गोधूमसुमनौ समा'विति रभसः। 'गोधूमे सुमन' इति हैमः। मालती—जाती। 'सुमना मालती जाति'रित्यमरः। 'मालती युवतौ का[1039]कमाच्यां जातीविशल्ययो'रिति मेदिनी।

२७२. नच। कपीतन इति। गर्दभाण्डः—पार्श्वपिप्पलः। आम्रा[1041]तष्टङ्कः। अश्वत्थः—पिप्पलः। शुकप्रियः—शिरीषः। कुचन्दन इति। पत्तङ्गं—कुचन्दनं। रक्तं—रक्तचन्दनं। निर्गन्धचन्दनं—गन्धरहिता श्वेता चन्दनजातिः। "ति र म ली"ति [1042]ख्यातो।

२७३. केसरीति। पूरको—बीजपूरकः। केचित्तालव्योष्ममध्यमाहुः। नागकेसरोऽहिकेसरः। देववल्लभः—पुन्नागः। क्रौञ्चादन इति। चिञ्चुली—प्राणिजातिः। तस्येहाभिधानं रसक्रियासूपयोगात्। चिञ्चोटकं—मुस्ताकृति स्वल्पकन्दं। वृषपर्वा—कसेरुकं। 'चिञ्चोटकं कसेरु स्यात् बृहद्राजकसेरुक'मिति केयदेवः। 'चिञ्चोटकं ना पाक'मिति केचित्। मृणालं—बिसं। 'मृणालं बिसमब्जादी'—त्यमरः। 'क्रौञ्चादनस्तु चिञ्चुल्यां चिञ्चोटकमृणालयो'रिति विश्वः। [63 a].

---

१०३५. त्रिपुठ. १०३६. कंकिलि. १०३७. तुः. १०३८. ०मुक. १०३९. कय०. १०४०. काच०. १०४१. अम्रा०. १०४२. ख्याताः.

२७४. गवादनीति। इन्द्रवारुणी–इन्द्राणी। शतपदी–श्वेतापराजिता। [1043]तैद्विद्–नीलापराजिता। चोलकीति। करीरो–गूढपत्रः। नारङ्गः–नागरङ्गः। किष्कुपर्वा–वंशः।

२७५. तपस्विनीति। जटामांसी–मांसी। रोहिणी–कटुरोहिणी। पलाशिनीति। पद्मिनी–कमलिनी। गन्धमूला–कर्पूरः। द्रुमात्रं–वृक्षमात्रं। 'पलाशीद्रुद्रुमागमा' इत्यमरः। प्रचोदनीति।

२७६. दुर[1044]लभा। कण्टकारी–क्षुद्रा। मातुलानीति। महाशणः–शणभेदः। "प ट्ट श ण" इति ख्यातः। भङ्गा–जया। काकजङ्घा–नदीकान्ता। गोलोमी–दूर्वाभेदः। रसायनमिति।

२७७. घोलमरिष्टं। 'दण्डाहते कालशेयघोलारिष्टानि गोरसः रसायन'मिति **हैमः**। 'ससारासारपा[1045]दार्धसमाम्बुमथितं दधिः। क्रमेण घोलमथितंत[1046]क्रोदश्विन्सितोदक'मिति **बोपदेवः**। धात्री–आमलकी। जराव्याधिहरं–यज्जराव्याधिविध्वंसि[1047] भेषजं तद्रसायनं। विषं–काकोलः। विडङ्गं–[1048]कृमिघ्नं। राजादनमिति। धनुः–पियालः। 'धनुः पियाले ना न स्त्री राशिभेदे शरासने' इति सान्तेषु **मेदिनी**। 'धनुः पुमान् प्रियालद्रौ राशिभेदे शरा[1049]सने' इति नान्तेषु च। क्षीरिणी–क्षीरिका। किंशुकः–पलाशः। 'राजादनं क्षीरिकायां पियाले किंशुकेऽपि चे'ति **मेदिनी**। 'राजादनः पियालद्रौ क्षीरिकायां त्रिपत्रके' इति **हैमा**त्पुल्लिङ्गोऽपि रा[1050]जादन इति च। 'राजादनं प्रसरको राजातन' इति पिया[1051]लपर्याये **वाचस्पतिः**। [*63 b*].

२७८, राजपत्नीति। रेणुका–कौन्ती। पित्तलं–रीतिः। राजसर्षपो–गौरसर्षपः। वृक्षादनमिति। मधुछत्रं–मधुकोषः। गजाशनः–पिप्पलः।

२७९. वृक्षवन्दा–वृक्षारुहा। 'अन्यवृक्षेऽन्यवृक्षस्य शिफा या सा च वन्दिका वृक्षादनी चे'ति **सिंहः**। विदारीकन्दः–अनेनैव नाम्ना ख्यातः। 'विदारी गुल्मका स्थिरा। महाकन्यारिकदला तनुपर्णी तटानुगे'ति। शिखरीति। घण्टापाटलिर्मुष्ककः। मयूरकोऽपामार्गः।

---

१०४३. तद्विनीला०–'द्' dropped. १०४४. The word is repeated without any significance. १०४५. द्वं. १०४६. One more त is omitted. १०४७. नेपथ्यं. १०४८. क्रमिघ्नं. १०४९. सरा० १०५०. राजातन. १०५१. पर्याये.

२८०. शिखण्डिनीति। यूथिका—बालपुष्पा। काकणन्ती—गुञ्जा। श्रीकेतनमिति। कनकं—सुवर्णं। पुष्पमात्रं—कुसुममात्रं। सरोरुहं—कमलं।

२८१. अथ श्लेष्मघनेति। मल्ली—वार्षिकी। केतकी—क्रकचच्छदा। सरोजिनीति। पद्मिनी—कमलिनी। सरोजं—कमलं। वंशरोचनं—वांशी।

२८२. नपं। किष्कुपर्वेति। इक्षुर्गुडवृक्षः। वेणुर्वंशः। पोटगलो—नलः। 'किष्कुपर्वा भवेदिक्षौ वेणौ पोटगलेऽपि च 'ति विश्वः। 'नलस्तु धमनः पोटगल'-इत्यमरः। [ 64 a ]. कुञ्जराशन इति। शल्लकी—गजभक्ष्या। पिप्पलश्चलदलः।

२८३. तिक्तपर्वेति। जलब्रह्मी—हिलमोची। गुडूची—अमृता। मधुयष्टी—क्लीतनं। 'तिक्तपर्वा तु यष्ट्याह्वगुडूचीहिलमोचिष्वि 'ति विश्वः। पीतचन्दनमिति। 'कालीयको—दारुनिशे 'ति रुद्रः। 'हरिद्रुः पीतचन्दन 'मिति निघण्टुः। हरिद्रा—निशा।

२८४. वरचन्दनमिति। कालीयो—दारुनिशा। देवदारु—देवकाष्ठं। 'वर-चन्दनमाख्यातं कालीये देवदारुणी 'ति विश्वः। 'कालीयको दारुनिशे 'ति राज-निघण्टुः। वरवर्णिनीति। लाक्षा—द्रुमामयः। फलिनी—प्रियङ्गुः। रोचना—गोरोचना। निद्—हरिद्रा। 'लाक्षानिशारोचनासु कङ्गौ च वरवर्णिनी 'ति शब्दार्णवः।

२८५. महारजनमिति। शातकुम्भं—काञ्चनं। कुसुम्भं—लट्वा। रक्तकाष्ठं—पत्राङ्गं। लोहितचन्दनं—शोणचन्दनं। [ 64 b ].

२८६. शकुलादनीति। तिक्ता—कटुकी। मांसी—जटिला। चिञ्चुलिः—प्राणिजातिः। कञ्चटं—जलपिप्पली। शिरीषो—मृदुपुष्पः। श्वेतधामेति। घनसारो—हिमवालुका। अब्धिफेनः—समुद्रफेनः।

२८७. हरिचन्दनमिति। त्रिदशानां महीरुहो—देववृक्षः। कुङ्कुमं—बाल्हीकं। गोशीर्षं—चन्दनं। कञ्जधूलिः—कमलरजः। रणप्रियमुशीरं।

२८८. नप। सहस्रवेधीति। विदुलोऽम्लवेतसः। मार्गो—मृगमदः। हिङ्गु—बाल्हीकं। नान्ताः। [1052]पङ्क्तिः। नीप इति। 'बन्धूको—बन्धुजीवक[1053] ' इति हलायुधः[1054]। नीलाशोकोऽशोकभेदः। हलिप्रियः—कदम्बः। 'नीपो धूलीकदम्बे स्यान्नीलाशोकहलि-

१०५२. पङ्क्ति. १०५३. बधजीवक. १०५४. हलायुध.

प्रिय ' इति **विश्वलोचनः** । हरिप्रिय इति च । अथ स्थलकदम्बके । ' नीपः स्यात्पुलकः श्रीमान् प्रावृषेण्यो हरिप्रिय ' इति **शब्दार्णवः** ।

२८९. नृपमिति । तगरं—कुटिलं । शम्पाक—आरग्वधः । ' आरग्वधोऽथ शम्पाकःकृतमालस्तथार्ग्वेध ' इति **रत्नकोशः** । पियालश्चारः । क्षीरिका—दुग्धी । भृङ्गारको—भृङ्गराजः । पार्थोऽर्जुनः । राजादनो—वानरप्रियः । [ *65 a* ].

२९०. [1055]पेत्रिः ।' श्रीपुष्पमिति । लवं—लवङ्गं । पुण्ड्रं—प्रपौण्डरीकं । प्रतिविष्णुकः—कुन्दः । पच । खरपुष्पेति । गोजिह्वा—[1056]दार्विपत्रिका । मोदा—अजमोदा । [1057]बर्बरोऽजगन्धिका । ' बर्बरा कबरी तुङ्गी खरपुष्पाजगन्धिके 'ति **भावमिश्रः** ।

२९१. गन्धपुष्प इति । प्रावृषेण्यः—कदम्बः । केतकः—ककचच्छदः । केसरो—नागकेसरः । लवं—लवङ्गं । अङ्कोटोऽङ्कोलः । 'पीतसारस्ताम्रफलो गन्धपुष्पो निकोचक' इति **गुणरत्नमाला** । इज्जलो—हिज्जलः । रोहीतो—रोही । रम्यश्चम्पकः । नीली—नीलपत्रा । वेतसोऽम्लवेतसः । ' प्रावृषेण्ये केतके च लवङ्गे नागकेसरे । निचुलाङ्कोटयोश्चापि तथा चम्पकरोहिणोः । अम्लके नीलिकायां च तथा रक्तसुमेऽपि च । [1058]गन्धर्वपुष्प ' इति **विश्वलोचनः** ।

२९२. गुच्छपुष्पेति । धातकी—सीधुपुष्पी । पूतीकरञ्जकः—पूतीकः । करञ्जो—नक्तमालश्च । ' नक्ताह्वो गुच्छपुष्पकः[1059] । पूतीकरञ्जः पूतीक ' इति [1060]**केयदेवः** । गूढपुष्प इति । मद्यदोहदो—बकुलः । जन्तुमत्फल—उदुम्बरः । [ *65 b* ].

२९३. चन्द्रपुष्पेति । श्वेतसिंही—' सितसिंही चन्द्रपुष्पा क्षुद्रमाता प्रियङ्करी 'ति [1061]**केयदेवः** । समिद्वरः—पलाशः । जपापुष्पमिति । कुङ्कुमं—धीरं । जपा—जवा । ' जपायां तु जवा स्त्रिया 'मिति **धर्मदासः** ।

२९४. ताम्रपुष्पीति । पाटला—वसन्तदूती । धातकी—मदा । त्रिवृताभित्—अरुणात्रिवृत् । कोविदारः—काञ्चनारः । चण्डातो—हयमारः । पुन्नागकः—काष्टचम्पकः ।

२९५. देवधूप इति । पुरो—गुग्गुलुः । सर्जश्चीडा । नागपुष्प इति । चम्पको—हेमपुष्पकः । पुन्नागः—काष्टचम्पकः । नागकिञ्जल्को—नागकेसरः । नागदन्ती—नागविन्ना ।

---

१०५५. पत्रि. १०५६. दार्दिव०. १०५७. वर्वरो. १०५८. गंधं०.
१०५९. गुछपुछक. १०६०. कय०. १०६१. कय०.

२९६. नीलपुष्पेति । काञ्चनारः—कोविदारः । निर्गुण्डी—नीलनिर्गुण्डी । आर्तगलो—दासी । क्षुमा—अतसी । नीली—नीलिनी । कटभी—गिरिकर्णी । वृद्धदारको—[१०६३]वल्लरी । 'त्रिकोणकाण्डा सुबहुप्रताना फलेषु पीता कुसुमेषु रक्ता ॥ दलैः सदुग्धैर्मृदुरोमवद्भिस्ताम्बूलतुल्यैर्घनमूलकन्दै 'रित्यष्टाङ्गसङ्ग्रहः । 'अश्वोपमो वृद्धदारो मृदुः सिद्धोऽधिकस्तत इति च । स नागरारुष्करवृद्धदारुकं गुडेन यो मोदकमत्युदारकं । अशेषदुर्नामकरोगदारकं करोति वृद्धं सहसैव दारक 'मिति चक्रः । तेन वृद्धदारकमिति पाठो नादरणीयः ॥ [ *66 a* ].

२९७. पिण्डपुष्पमिति । जपा—जवा । '[१०६४]पौण्ड्रपुष्पेऽपि वृक्षेऽपि जवाशब्दः [१०६५]प्रकीर्तित ' इति त्रिकाण्डशेषः । अशोकः—कङ्केल्लिः ।[१०६६] कञ्जं—कमलं । दाडिमं—करकः । ' पिण्डपुष्पमशोके च जपायां च कुशेशय ' इति विश्वाद्याः । पीतपुष्पीति । देवार्हा—तुलसी । त्रपुसी—कर्कटी । वारुणी—इन्द्रवारुणी । शणः—घण्टारवः ।

२९८. कारवल्ली—कठिल्लः । करवीरश्चण्डातः । सुपुष्पा—कोशातकी । झिञ्झिरीटः—कटुफलः । ' झिञ्झिरीटः कटुफलः पीतपुष्पो वरश्रित 'इत्यभिधानचूडामणिः । चम्पको—हेमपुष्पकः । कुरण्टकः—पीतपुष्पसहचरः ।

२९९. बहुपुष्पीति । सीधुपुष्पी—धातकी । ' सुभिक्षा बहुपुष्पीत्र वह्निज्वाला च धातकी 'ति । पारिभद्रकः—पारिजातः । बीजपुष्प इति । मदनो—राठः । ' मदनश्छर्दनो राठः श्वसनो विषपुष्पकः । बीजपुष्पो मरुबको मातुलो गालवोऽपि चे 'ति [१०६७]धर्मिष्ठः । जूर्णाह्नं—प्रसिद्धं । फणिज्जको—[१०६८]मरुबकः । ' बीजपुष्पं मरुबके जूर्णाह्ने दमनेऽपि चे 'ति लोचनः ।

३००. महापुष्प इति । काञ्चनारः—कोविदारः । श्लक्ष्णशाल्योदनोपमः—कुन्दः । ' कोविदारे कुन्दपुष्पे महापुष्प ' इति मेदिनी । [ *66 b* ]. मधुपुष्पमिति । विशल्या—कलिहारी । ' कलिहारी लाङ्गलिनी हलिनी गर्भपातिनी । दीप्तिर्विशल्याग्निमुखी हली नक्तेन्दुपुष्पिका । विद्युज्ज्वालाग्निजिह्वे 'त्यभिधानचूडामणिः । कलिकारीत्यपि । शिरीषो—मृदुपुष्पः । गुडपुष्पो—मधूकः । ' मधुपुष्पो मधूकश्च गुडपुष्पो मधुद्रुम ' इति [१०६९]हारावली ।

---

१०६२. ०दारुको-धन्वंतरिः p. 155. १०६३. वेल्लरी. १०६४. पौण्ड्र.
१०६५. प्रकीर्त्तित. १०६६. कंकेल्लि. १०६७. धर्म्मि०. १०६८. मरूकः.
१०६९. हारावरी.

३०१. मृत्युपुष्प इति। नलः–पोटगलः। काशश्चामरपुष्पः। इक्षुपुष्पापरपर्यायः। भूतावासः–कलिद्रुमः। इक्षुरसिपत्रः। वेणुर्यवफलः। रक्तपुष्प इति। कुरबको–रक्तपुष्पसहचरः। अगस्तिरगस्त्यः। 'अगस्त्यपुष्पे त्वागस्त्यो मांर्जारो[1070] रक्तपुष्पक' इति सिंहः। शाल्मलिश्चिरायुः। रोही–दाडिमपुष्पकः[1071]।

३०२. पलाशः–किंशुकः। तुङ्गोऽहिकेसरः। चण्डातो–रक्तकरवीरः। बन्धुजीवः–'शरत्पुष्पः मध्यपुष्पः वार्तीकपुष्पः[1072] बन्धूक' इति पर्यायाः[1073]। मनोहरः–'वरलब्धः काञ्चनको भ्रमरेष्टो मनोहरः रक्तपुष्प' इति केयदेवः[1074]। काञ्चनारभेदः। चर्मरङ्गा–आवर्तकी। 'सिन्दूरी–रक्तबोजा स्याद्रक्तपुष्पा तु कोमले'ति केयदेवः। तरणीभित्–लाक्षापुष्पा। 'शतपत्री तरण्युक्ता कर्णिका चारुकेसरा। रक्तापरा रक्तपुष्पा लाक्षापुष्पातिमञ्जुले'ति मदनपालः।

३०३. वृद्धदारो–वेल्लरी। जपा–जवा। पाटलिः–पाटला। पर्प्पटो–रजः। [67 a]. वृत्तपुष्पीति। नागदन्ती–नागविन्ना। लोके तु "नागदमने"-त्याख्यया[1075] ख्याता। मल्ली–राजपुष्पी। कदम्बः–कुत्सिताम्बः। 'वृत्तपुष्पः प्रावृषेण्यो हरिद्रुश्च हरिप्रिय' इति हारावली।

३०४. धूलिकदम्बो–वसन्तपुष्पः। मल्लीभित्[1076]–विचिकिलः। वानीरो–वेत्रः। मृदुपुष्पः–शिरीषः। बृहत्पुष्पीति। शणः–'घण्टारवा माल्यपुष्पी शणपुष्पाल्पघण्टिका। घण्टाशब्दा बृहत्पुष्पी शणघण्टोरुपुष्पके'ति धर्मदासः[1077]। कुब्जो–वक्रकण्टकः। चिबुकः–प्रतिविष्णुकः। मुचकुन्दापरपर्यायः। केतकः–क्रकचच्छदः।

३०५. शतपुष्पेति। शताह्वा–मिश्रिः। अवाक्पुष्पी–वज्रपुष्पीति समानार्थाः। पुण्डरीयकं–प्रपौण्डरीकं। 'शतपुष्पं पौण्डरीकं सुपुष्पं पुण्डरीयक'मिति धर्मिष्ठः[1078]। "गुलाब" इति ख्यातः। शङ्खपुष्पीति। यूथीभित्–'हेमपुष्पी पीतपुष्पी बालपुष्पा गुणोज्ज्वला। अपरा शिखण्डिनी काष्ठा पाण्डुरी शङ्खपुष्पिके'ति धर्मिष्ठः। कम्बुमालिका–मङ्गल्यपुष्पी। शङ्खपुष्पी सितारुणे। 'वल्लिके तृणके विष्वक् लोमशेल्पकपत्रके' इति। "शाङ्खाहूली"त्याख्यया ख्याता। 'शङ्खपुष्पी शङ्खनाम्नी किरीटी कम्बुमालिनी'ति मदनविनोदः। [67 b].

---

१०७०. मार्ज्जा०. १०७१. दाडिपुष्पकः. १०७२. वार्त्ताक. १०७३. पर्यायाः. १०७४. कय०. १०७५. ०रित्या. १०७६. मल्लि०. १०७७. धर्म्म०. १०७८. धार्म्मि०.

३०६. शणपुष्पीति । शणः—'घण्टारवा तु शणपुष्पिके 'त्यमरः । तूलः—कर्पासः । शिवपुष्प इति । अर्कोरूपिकोँ[1079] । पद्मं—कमलं । शीधुपुष्पीति । ताम्रपुष्पी—धातकी । 'शीधुपुष्पी ताम्रपुष्पी वह्निपुष्पी च धातकी 'ति धर्मदासः । 'पञ्चपाणि दिवसानि भृङ्गमाधातकी यवनकी भवेदि 'ति कश्चित् । वङ्गसेनोऽगस्तिः सीधुर्हेत्यादिश्च ।

३०७. शुकपुष्प इति । शुकतरुः—शिरीषः । 'शुकपुष्पः शुकतरुः श्यामवर्णः शुकप्रियः । शिरीषः कलिमो विप्रो मृदुपुष्पः कपीतन ' इति केयदेवः । शुकच्छदः—स्थौणेयं । श्वेतपुष्प इति । सतप्राशोऽञ्जबीजमृत् । 'करवीरोऽश्वहा श्वघ्न ' इति केयदेवः । वरुणस्तिक्तशाकः । शीधुवृक्षः । 'श्वेतपुष्पस्तिक्तशाकश्चलापह ' इति केयदेवः । अथ सिन्दुकः । 'सिन्दुवारेन्द्रसुरसौ[1080] निर्गुण्डीन्द्राणिकेत्यपी 'त्यमरः । मुकुटस्तु धमिलति । 'बाहुलकादत्र धोने 'त्यन्ये । 'सिन्दुः श्वेतपुष्पः सिन्दुवारितः । अपरस्तु 'नीलपुष्पः शीतसहा निर्गुण्डी नीलसिन्दुक ' इत्युक्तः । "मे डं डी "ति लोके । कुन्दो—माघ्यः ।

३०८. महाश्वेताऽपराजिता । गैर्णरूपोऽर्कः । कुटन्नटं—मुस्ताभेदः । सदापुष्पीति । [1079]अर्कोरूषिका । अलर्कोऽर्कभेदः[1081] । कुन्दो—माघ्यः । सदापुष्पी वनकर्पासी चेति क्वचित् । [ 68 a ].

३०९. स्वर्णपुष्पीति । नागदन्ती—नागपत्री । 'नागदन्ती नागपत्री रास्ना सर्वग्रहापहे 'ति [1082]धर्मिष्ठः । केतकी—क्रकचच्छदा । सुरभिश्चम्पकः । सुपर्णः—शम्पाकः । चर्मकेशी—सातला । अग्निजिह्वा—इन्द्रपुष्पी । 'कलिकारी लाङ्गलिनी हलिनी गर्भपातिनी । दीप्तिर्विशल्याग्निमुखी हली नक्तेन्दुपुष्पिका । विद्युज्ज्वालाग्निजिह्विके '[1083]-त्यभिधानचूडामणिः ।

३१०. सितपुष्प इति । सितरोही—श्वेतपुष्पो रोहीतः । कुन्दो—माघ्यः । 'सुशुक्ला रात्रिपुष्पिका दन्तोज्ज्वलौ[1084] कुन्दनाह्वे 'ति केयदेवः । वन्यं—कुटन्नटं । 'कुटन्नटं प्लवं वन्यं गोनर्दं[1085] गोपुटं पुटं । सितपुष्पं सदापूरं । वितुन्नं परिपेलव 'मिति केयदेवः । मधुपुष्पा—शतपुष्पा । अवाक्पुष्पा वज्रपुष्पी 'ति समानार्थाः । कटभी—श्वेतापराजिता । 'श्वेतपुष्पा वाजिपुरा श्वेतपाटलिपण्डिका । अपरा व्यक्तगन्धाह्वा नील-

---

१०७९. ०रूषिका ? १०८०. निर्गुंडीद्रा०. १०८१. Double क.
१०८२. धार्मि०. १०८३. विद्युज्वाला. १०८४. ०ज्वाला. १०८५. गोनर्द्द.

पुष्पी गवादनी 'ति केयदेवः। मङ्गल्यपुष्पी—शङ्खपुष्पी। क्षीरपुष्पी कम्बुपुष्पी अन्या रक्ता रक्तपुष्पी अपरा नीला नीलपुष्पीति। चोरपुष्पीति सामान्यं नाम तिसृणां[१०८६] रात्रिविकासित्वात्। [ *68 b* ].

३११. स्थिरपुष्प इति। हेमपुष्पश्चम्पकः। पीतपुष्पः दीपपुष्प इत्येकार्थाः। छिन्नपुष्पस्तिलकः स्त्रीनिरीक्षणदोहदः। सूक्ष्मपुष्पेति। अक्षपीडा—यवतिक्ता। शणाधमः—स्वल्पतन्तुः शणजातिः।

३१२. हेमपुष्प इति। अशोकः—स्त्रीपादाहतिदोहदः। रोघ्रोऽक्षिभैषज्यः। चम्पकश्चाम्पेयः। आरग्वधः—सम्पाकः। भण्डीरी—योजनवल्ली। 'रक्ता भण्डीरिकाचे'–[१०८७]तीन्दुः। 'भाण्डीरी च। हेमपुष्पी च [१०८८]भंण्डीरी 'ति रभसः। 'मञ्जिष्ठायां तु भण्डीरी ह्रस्वमध्यापि दृश्यत' इति द्विरूपकोषः। वारुणी—इन्द्रवारुणी। यूथिकाभित्—पीतयूथी।

३१३. जवापुष्पं—जपा। पाठा—अम्बष्ठा। नागकेसरः—करिकेसरः। पद्मं। काञ्चनपुष्पीति। यूथीभित्—पीतयूथी। माधवी—अतिमुक्तः। पाटला—पाटलिः। 'पाटला पाटलिः कामदूतीका कालवृन्तिके 'ति केयदेवः। 'अतिमुक्ते पाटलायां स्त्रियां काञ्चनपुष्पिका। स्वर्णयूथ्यामथे 'ति शब्दार्णवः।

३१४. चामरपुष्प इति। पूगः—क्रमुकः। माकन्दः—रसालः। केतकः—क्रकचच्छदः। काशः—चामरपुष्पः। दाडिमपुष्प इति। रोही—रोहीतकः। तूलिनी—शाल्मली। [ *69 a* ].

३१५. बन्धूकपुष्प इति। प्रियकोऽसनः। बन्धुजीवः—शरत्पुष्पः। अथ स्यान्मल्लिकापुष्प इति। करुणः—सुगन्धिपुष्पः। अनेनैवनाम्ना ख्यातः। 'नाम्नैव हन्त करुणेऽसि मग्न' इति भृङ्गं प्रति कस्याप्युक्तिः। कुटज—इन्द्रवृक्षः। पान्ताः।

३१६. वह्निः। दार्वीति। दारुहरिद्रा—पचंपचा। हरिद्रा—पीता। देवदारु—देवकाष्ठं। गोजिह्विका—गोजिह्वा। 'गोजिह्वा गोजिका गोभी दार्विका खरपर्णिनी 'ति। निम्ब इति। ह्रीवेरं—जलनामकं। [१०८९]पिचुमर्दः—पिचुमन्दः।

३१७. [१०९०]बिम्बमिति। बिम्बिका—रक्तफला। एरण्डः—पञ्चाङ्गुलः। धीरं—कुङ्कुमं। [१०९१]वेत्रिः। कलम्बीति। नाडिकाशाकः—नीलीयः पुंसि च। 'कलम्बः शाक-

---

१०८६. तिसृणां. १०८७. ०तीदुः. १०८८. भांडीरी०. १०८९. पिचुमर्दः.
१०९०. बिंब. १०९१. कुकुमं. १०९२. वन्त्रि.

भेदेऽपि स्याद्दण्डशरयोः पुमान्'। टवर्गतृतीयमध्योऽपि 'कडम्बश्च कलम्बश्चे'-त्यमरः। 'द्वेशाकतालस्ये'ति रामः। 'कलम्बो नालिकाकारः सुषिरो बहुतोयजः। नालिका तस्मादल्पा सूक्ष्मा चे'ति हेमाद्रिः। "कदम्ब" इति लोके। हरिवल्लभः—प्रावृषेण्यः।

३१८. कदम्ब इति। सर्षपः—सरिषपः। [1093]नीपः—कदम्बः। गजाह्वमिति। करिकेसरो—नागकेसरः। '[1094]स्वर्णभसर्पाख्यो नागकेसरः षट्पदप्रिय' इति रभसः। करिपिप्पली—चव्यपुष्पा[1095]। गोडुम्ब इति। शीर्णवृन्तं—चित्रफलं। "सन्धि" इति लोके।

३१९. गवादनी—इन्द्रवारुणी। [69 b] भूजम्बूरिति। स्वल्पजम्बूः—नादेयी। 'काकजम्बूर्मेघवर्णो नादेयी विदिशोऽल्पे[1096]' इति धन्वन्तरिः। 'नादेयी स्वल्प-जम्बूः स्या'दिति भावगुणरत्नमाला[1097]। विकङ्कतः—स्रुवतरुः। 'भूजम्बूस्तु विकङ्कते। गोधूमाह्वयधान्ये चे'ति हैमः। गोधूमाह्वयधान्यं प्रसिद्धं। नागरङ्गो—नार्यङ्गः। 'नारङ्गी नार्यङ्गस्त्वक्शासनः। ऐरावतश्च सैव स्यान्नादेयी भूमिजम्बुके[1098]'ति सिंहः।

३२०. वच। [1099]तिक्तपर्वेति। यष्ट्याह्वं—यष्टीमधु। [1100]हिलमोची—मूलकं। अमृता—[1101]गुडूची। राजजम्बूरिति। जम्बूभिदत्र महाजम्बूः। '[1102]जम्बूः सुरभिपत्रा च राजजम्बूर्महाफला। सुरभी च महास्कन्धा महाजम्बूर्निगद्यते'। पिण्डखर्जूरः—स्वल्पा[1103] खर्जूरजातिः।

३२१. शतपर्व इति। दीर्घपत्रभेदः—इक्षुभेदः। 'शतपर्वककान्तारनेपाला-द्यास्ततःक्रमादि'ति वाग्भटः। यवफलो—वंशः। नलः—पोटगलः। भार्गवी—नीलदूर्वा। 'नीलदूर्वा रुहानन्ता भार्गवी शतपर्विके'ति। [1104]वचा—उग्रगन्धा। कटुका—मत्स्यपित्ता।

३२२. वपं। धूलीकदम्ब इति। तिनिशः—स्यन्दनः। निम्बः—पिचुमन्दः। वरुणस्तिक्तशाकः। नीपो—राजकदम्बः। 'कदम्बो गन्धपुष्पः स्यात्प्रावृषेण्यो महोन्नतः। अन्यो धूलिकदम्बः स्यान्नीपो राजकदम्बक' इति भावगुणनाममाला। 'नीपो [1105]बृहद्वृक्षसमीपभुवि [1106]प्रभूतैः। लोकप्रसिद्धतरराजकदम्बनामा। प्रांशुर्मधूकतरुपत्र—

---

१०९३. नापः. १०९४. 'स्वर्णभ...केसरः' has been written twice.
१०९५. चव्यपुष्पा. १०९६. विदिशों. १०९७. ०माला. १०९८. ०जम्बूकेति.
१०९९. ०पर्वेति. ११००. हिलमाची. ११०१. गडूची. ११०२. जंबू—no visarga.
११०३. ०खर्जूर स्वेल्पा०. ११०४. वचोग्र०. ११०५. ०द्रह. ११०६. भुविप्रभूता.

समानपत्रः । स्वाद्वम्लपक्वफल एष सुगन्धिपुष्प ' इति । [ 70 a ]. शृगालजम्बूः इति । [1107]गोडुम्बो—गवादनीफलं । घो[1108]ण्टाफलं—पूगीफलं । बान्[1109]तीः ।

३२३. भद्रिः । कुम्भमिति । त्रिवृत्—पालिन्दी । गुग्गुलः—पुरः । 'उलूखलं च कुम्भं च कुम्भोलूखलकं तथे 'ति **सिंहः** । 'गुग्गुलुर्गुग्गुलोऽपि चे 'ति **द्विरूपकोषः**। [1110]भद्रा—कायफलः । कट्फलापरपर्यायः । स्थाली—पाटला । हठः—वारिपर्णी । ' पृश्निकायां च कुम्भी स्यात्पाटलौ कट्फलेऽपि चे 'ति **रन्तिदेवः** । रम्भेति । मृत्युपुष्पा—कदली । षट्पदो[1111]लयो—वंशः ।

३२४. शुभेति । श्वेतदूर्वा—दूर्वाभेदः । [1112]पृक्का—कुटिला । [1113]वांशी—वंशरोचना । वंशपर्वस्थरोचना । ' शुभ्रा सा तु क्वचिद्वंशे खञ्जरीटरतान्विता ' इति । शमी—सक्तुफला । ' शिखण्डिशाण्डिल्यशमीदिशाशा ' इति ताल्व्यादिः । ' सरसा विरलायन्ते [1114]वनायन्ते कलिद्रुमाः । न शमी न च पुन्नागा अस्मिन्संसारकानन ' इति **कस्यापि** । ' शुभास्यां[1115]श्वेतदूर्वायां [1116]पृक्कावंशजयोरपि । तथा पवित्रपत्रायां 'मिति **लोचनः** । [ 70 b ]. [1117]मंत्रिः । ऋषभीति । शूकशिम्बा—कपिकच्छूः । शुकशिवा इति च । ' [1118]मोषबलाशुकशिम्बाकत्तृणराम्लोरुबूकाश्वगन्धाना 'मिति **चक्रः** । ' बीजकोशी शिम्बा शमी शमिः शिम्बि 'रिति **हैमः** । [1119]दुर्धरो—वृषः । ' ऋषभो दुर्धरो धीरो विषाणी गोःपतिर्वृष ' इति **केयदेवः** । ऋषभकेति ख्यातः ।

३२५. कटभीति । गिरिकर्णी—अप[1120]राजिता । ज्योतिष्मती—कङ्गुणिका । ' पारा[1121]वताङ्घ्रिः कटभी पण्या ज्योतिष्मती लते 'त्यमरः । द्रुभिद्—" प्र क र हि " इति ख्यातो वृक्ष इति **प्राच्याः** । ' कटभी स्वादुपुष्पश्च मधुरेणुः कटम्भर ' इति **भावमिश्रः** । अथो कुसुम्भ इति । कनकं—हेम । महारजनं—लट्वा । ' कुसुम्भो हेमनि महारजने नाकमण्डला 'विति **लोचनः** । " क सुं भा " इति लोके ।

३२६. सुरभिरिति । चम्पको—हेमपुष्पकः । स्वर्णं—कनकं नवम[1122]ल्लिकाभेदः । हरिप्रियः—कालसारः । मुरा—गन्धकुटी । ' सुरभिः शल्लकीमातृभिन्मुरागोषु योषिती 'ति **मेदिनी** । सुरा—मद्यं । सुरभि—' ऐलेय[1123]श्चम्पके स्वर्णे मल्लीभेदकदम्बयोः । जातीफल-

---

१९०७. गोडुवो. १९०८. घोटा. The text has घोण्टा. १९०९. बाता मद्रि. १९१०. भद्राः. १९११. ०ल्यों वशा. १९१२. पृक्का in the Comm. १९१३. वांगी in the Comm. १९१४. वनायंत. १९१५. छेत. १९१६. पृक्का. १९१७. मंत्रि. १९१८. बला. १९१९. दुर्द्धरो. १९२०. अत्र०. १९२१. तान्हिः. १९२२. मली०. १९२३. पेले.

मुरामथरास्नासु हरिशालुके। शल्लकीगन्धयोश्चापी 'ति रभसः। [1124]फलं–जातीफलं। ऐलेयं–एलवालुकं। शल्लकी–गजभक्ष्या। गन्धे–[1125]गन्धोषणः। रास्ना–रसा [71 a].

३२७. भपं। शुकवल्लभ इति। शिरीषो–मृदुपुष्पः। दाडिमस्य फलं–करकः। [1126]भान्ताः। मद्गिः। उमेति। रत्नपत्र–अतसी। 'रुद्रपत्नी रत्नपत्रा नीलपुष्पी सुवर्चला। उमातसी च मसृणा वेणुः क्षौमी क्षुमा स्मृते 'ति निघण्टुः। हरिद्रा–निशा। अथ क्षुमेति।

३२८. अतसी–रुद्रपत्नी। नीला–नीलिनी। 'क्षुमाऽतसीनीलिकयो 'रिति विश्वः। क्षेम इति। चण्डा–चोरकभेदः। 'ईषत्कृष्णः अजमोदाकार' इति एलादिगणे डल्लणः। 'चोरको–ग्रन्थिपर्णकभेदस्तदाकार एवे 'ति एलादिगणे डल्लणः। 'चोरको गोपनः क्षेमो दुःपत्रो दुःकुलोऽपरः[1127]। क्रोधना पिशुना चण्डा चोरी शङ्ख[1128]टिका शटी 'ति [1129]निघण्टुः। 'क्षेमः स्याल्लब्धरक्षणे। मङ्गले चोरके वा स्त्री क्षेमा चण्डाहरिद्रयो 'रिति लोचनः। 'क्षेमं स्याल्लब्धरक्षणे। चण्डायां ना शुभे न स्त्री कात्यायन्यां च योषिती 'ति मेदिनी। [71 b]. ध्याम इति। दमनः–सर्वाङ्गसुरभिः। गन्धतृणम्–अत्र रौहिषं। 'ध्यामकं रौहिषं भूतिर्भूतीकं रौहिषं तृणमि 'ति माला। पद्म इति। पलङ्कषो–गुग्गुलः।

३२९. अव्यथा–पद्मचारिणी। 'अव्यथातिचरा पद्मा चारटी पद्मचारिणी '-त्यमरः। [1130]फञ्जिका–भार्गी। सोमवल्लरी–मीनाक्षी। 'ब्राह्मी वयस्था मत्स्याक्षी मीनाक्षी सोमवल्लरी 'त्यभिधानचूडामणिः। शाकभिदत्र–स्नुक्का।

३३०. भीम इति। कुम्भोलूखलकं कुम्भं*। बकपुष्पोऽर्कभेदः। वेतसं–चुक्रं। 'क्षुद्रजम्बीरसम्भूतो रसः संशोषितो रवौ। भेदं[1131]मत्रे वेतसाख्यं क्षुद्रजम्बीरजं तु तत्। स्त्रयं कृतं च मिश्रं तत् मध्यमं क्षुद्रजाधम 'मिति। रामेति। श्यामा–प्रियङ्गुः। हिङ्गुनाडी–हिङ्गुप्रकृतिः। वास्तूकं–वास्तुकं। कुष्ठं–पारिभाव्यं।

३३१. कर्णपूरः–शिरीषः। 'प्रियङ्गौ हिङ्गुपत्र्यां च रामा पुंसि तु वास्तुके। पारिभाव्ये शिरीषे चे 'ति लोचनः [72 a]. रुक्ममिति। काञ्चनं–कनकं। लोहमयः। लक्ष्मीरिति। सक्तुफला–शमी। 'लक्ष्मीः पवित्रपत्रा च शमी सक्तुफला शिवे 'ति माला। पद्मा–पद्मचारिणी। वृध्यर्द्धी–स्वनामख्याते। प्रियङ्गुर्लता।

---

१११२४. फल. १११२५. गंधोषणः. १११२६. भाताः. In the text मन्ताः. १११२७. परा. १११२८. ०तिका. १११२९. निघ्नुः. १११३०. फंजेका. * Rewritten : 'क्षीराक्षी...कुम्भं.' १११३१. मद्यमत्रे.

३३२. शमीति। सक्तुफला—पवित्रपत्रा। शिम्बा—शिम्बिः। गुग्गुलुः। श्यामेति। प्रियङ्गुर्लता। सरला—कृष्णमूला त्रिवृत्। 'गोपी—श्यामा। गोपवल्ली गोपा गोपालिका च से 'ति वाचस्पतिः। गुन्द्रा—एरका। 'गुन्द्रा शीरी गुच्छमूला वानीरः पृथुलः खरः। एरका च शितिः प्रोक्ते 'ति केयदेवः। "गो न्द्र न" इति लोके। हरिद्रा—निशा।

३३३. नीली—नीलिनी। चपला—पिप्पली। सोमः—सोमवल्ली यज्ञाङ्गभूता। अब्दो—मुस्ता। वृद्धदारकः—छगलेः[1132]। खदिरो—बालपत्रः। कालवणं—कृष्णलवणं। [1133]मरीचं—मरिचं। भूस्तृणं—भूतीकं शतपुष्पोग्रगन्धि। कुम्भमुद्धखलम्। 'श्यामा फलिन्यां त्रिवृताभेदे मुस्तान्तरेऽपि च। रजनीसारिवानीलीसोमवल्लीकणासु च॥ श्यामस्तु स्यादम्बुधरे वृद्धदारारिभेदयोः। श्यामं च कृष्णलवणे मरिचे भूस्तृणे पुरे' इति **विश्वलोचनः**। [*72 b*].

३३४. सोमेति। ब्राह्मी—ब्रह्ममण्डूकी। सोमराजी—मलिना। "बा व ची"ति लोके ख्याता। 'पृथुका गुरवो यत्र कुष्टं यत्र गदापहं। सोमराजी च मलिना वैद्यकेनान्वितं[1134] वह्नी'ति **पङ्कजभट्टः**। कुण्डली—गुडूची। जलं—पानीयं। [1135]कर्पूरो—हिमवालुका। सोमलता—यज्ञाङ्गभूता। हिमांशुति। कर्पूरो—हिमवालुका। शीतं—चन्दनं।

३३५. [1136]मंत्रिः। उत्तममिति। सिन्धुजं—वरं। दुग्धिका—भूलग्ना वल्ली प्रसिद्धा। फलत्रिकं—तु त्रिफला। 'त्रिफला च वरोत्तमे 'ति **धर्मिष्ठः**। गोलोमीति। श्वेतदूर्वा—गण्डाली। 'गोलोमी श्वेतदूर्वायां स्याद्वचाभूतकेशयो 'रिति **मेदिनी**। भूतकेशी—जटामांसी। अथ सा सिता। 'गोलोमी शतवीर्या च गण्डाली शकुलाक्षक' इत्यमरः। वचा—हैमवती।

३३६. गोधूम इति। नागरङ्गः—कण्टकेसरपठितः वक्त्र[1137]वासनाभिधानः। 'तद्भेदः कमला श्री स्यात्तद्भेदस्तु सदाफल' इति **सिंहः**। शूकधान्यप्रभेदः—प्रसिद्धः। दाडिम इति। एला—त्रुटिः। करकः—शुकवल्लभः। दाडिम्बोऽपि। 'दाडिम्बसारपिण्डीरस्वाद्वम्लशुकवल्लभा' इति **रभसः**। [*73 a*].

३३७. विद्रुम इति। रत्नवृक्षः—पारिजातः। प्रवालो—प्रावबल्लरी। नवपल्लवः—नूतनपत्रं। कलिद्रुम इति। दुरारोहः—[1138]खर्जूरी। श्रीवास[1139]श्रीडा। [1140]विभीतकोऽक्षः।

---

११३२. छगला. ११३३. मारेचं. ११३४. नन्वितं. ११३५. कपूरो.
११३६. मत्रि. ११३७. तक्र०. ११३८. खज्जू०. ११३९. श्रीडा— Vide Raj. p. 121 for the correction. ११४०. बिभीतका०.

३३८. तृणद्रुम इति। हिन्तालस्तालभेदः। लाङ्गली—नालिकेरी। क्रमुकः—पूगः[1141]। तलस्तालः। 'तृणान्[1142]यक्षलेख्यपत्रमहापद्मतलध्वजाः। ताले 'इति सिंहः। खर्जूरी—ह्रस्वा खर्जूरजातिः। तालिका—ह्रस्वा तालजातिः। ताडी—वराङ्गना। 'तालं च पत्रताली च मृत्युबीजापी 'ति सिंहः। खर्जूरो—दुरारोहः। क्रकचच्छदः—केतकी। 'द्रोणीदलः सूचिपुष्पो जम्बूलः क्रकचच्छद ' इति सिंहः।

३३९. महाश्यामेति। शिंशिपा—कृष्णसारः। वृद्धदारो—वेल्लरी। मान्ताः। यष्टिः। कन्येति। कुमारिका—घृतकुमारी। 'तरणिः पिच्छिला माता मण्डला गृहकन्यका। सहा घृतकुमारी चे 'ति सिंहः। 'कुमारी क्षारभूदेशे पङ्क्ति कण्टदलाऽबला। विस्तातिवाटछदिनी विशाला पिच्छसंभृता॥ ध्वजाभमध्यदण्डा साऽरुणराजिसुमा पृथुः। सिद्धैवे'ति[1143]। 'वन्ध्या—कर्कोटकी देवी कन्या योगेश्वरीति चे'ति निघण्टुः। स्थूलैला—बृहदेला। 'स्थूलैला त्वक् सुगन्धा च पृथ्वीका कन्यका स्फुटे'ति धन्वन्तरिः। सारिवा—गोपी [73 b].

३४०. केश्यमिति। वालकं—ह्रीवेरं। भृङ्गराजो—भृङ्गरजः। चव्यमिति। कोला—चविका। 'कोला चव्या च चविके 'ति हट्टचन्द्रः। 'चव्यं तु चविके क्लीबं चव्या दूर्वोग्रगन्धयो 'रिति लोचनः। च्यवनं—गजपिप्पली। 'च्यवनं कोलवल्ली च चव्यं कुञ्जरपिप्पली 'ति चन्द्रनन्दनः। दूर्वा—शर्वा। उग्रगन्धा—वचा।

३४१. जयेति। अभया—पथ्या। 'कायस्था श्रेयसी पथ्या प्राणदा विजया जये 'ति केयदेवः। मातुलानी—भङ्गा। 'भङ्गा तु विजया जये 'ति निघण्टुः। जयन्ती[1147]—बलामोटा। 'बलामोटा सूक्ष्मफला जयन्ती[1147] विजया जये 'ति केयदेवः। सा च पीतरक्तकृष्णगुच्छपुष्पा शिरीषपत्रा शम्बिनीवृक्षः[1144] कुल्यादिसमीपे जायते। अरणिभिद्—अग्निमन्थभेदः। 'अग्निमन्थोऽरणिः केतुस्तर्कारी[1145] वैजयन्तिका। गणिका पावकाह्वाऽन्या जयन्ती विजया जये 'ति केयदेवः। विना उपसर्गेण सह तेषु[1146] पूर्वोक्तेषु यथा विजया-हरीतकी, विजया-मातुलानी, विजया जयन्ती, विजया-अग्निमन्थभेद इत्यादि। तार्क्ष्यमिति। रत्नभेदोऽत्र हरिन्मणिः। 'गारुत्मतं मरकतमश्मगर्भो हरिन्मणि 'रिति केयदेवः। 'हरित्स्वच्छं भास्वन्मरकतं मत 'मिति। रसाञ्जनं—तार्क्ष्यं। 'रसाञ्जनं तार्क्ष्यजं तार्क्ष्यं 'मिति हृदयदीपकः। [74 a].

---

११४१. पूगः. ११४२. तृणान्यक्षं. ११४३. ०वति. ११४४. वृषः. ११४५. तर्का०. ११४६. तेपु. ११४७. जयंति.

३४२. दिव्यमिति। कोलं—कङ्कोलं। लवं—लवङ्गं। 'लवङ्गं देवकुसुमं भृङ्गारं शिखिरं लव 'मिति **केयदेवः**। [११४८]सूतः—पारदः। शिवमामलकं। ब्राह्मी—भारती। दीप्य इति। यवानी—यवसाह्वा। मोदा—अजमोदा। धन्येति। धात्री—आमलकी। वितुन्नकं—धान्यकं। 'सधन्या[११४९]शुण्ठि[११५०]सैन्धव 'मिति प्रयोगात्।

३४३. पथ्येति। मुण्डी—कुहकलः। विजया—हरीतकी। वन्ध्या—वन्ध्याकर्कोटकी। पद्मा—पद्मचारिणी। सिन्धु—सैन्धवं। तेन पथ्यापथ्यमपथ्ये पथ्यमिति सिद्धं। पाक्य—मिति। काचो—मृद्भित्। विडं—बिडलवणं। यवक्षारः—'यवाः सशूकाः दग्धाश्च क्षारतामापितास्तथे 'ति।

३४४. प्रियेति। प्रियङ्गुर्वनिता। काकोली—वीरा। मल्लिका—वार्षिका। वृध्यर्द्धी—स्वनामख्याते। भव्येति। करिकणा—कुञ्जरपिप्पली। कर्मरङ्गतरुः—भावनतरुः।

३४५. मेध्येति। ब्राह्मी—स्मारिणी। शङ्खपुष्पी—शङ्खाह्वा। गन्धाढ्या—मुरा। रोचना—गोरोचना। वचा—षड्ग्रन्था। पीततैला—ज्योतिष्मती। वेल्लं—विडङ्गं। जीरकोऽजाजी। [ *74 b* ].

३४६. रम्यमिति। पटोलमूलं—प्रसिद्धं। रात्रिर्हरिद्रा। चम्पको—हेमपुष्पकः। वन्यमिति। क्षुद्रमुस्ता—कुटन्नटं। 'परिपेलवं प्लवं वन्यं तत्कुटन्नटसंज्ञकं। जायते म[११५१]ण्डलाकारं शैवालदलसन्नये 'ति। त्वक्—भृङ्गं। वाल्येति। बलाभिदतिबला।

३४७. बला—वाट्यालकः। रुक्—कुष्ठं। भृष्टयवो—धाना। पुष्करं—पु[११५२]ष्करमूलं। वृष्येति। स्वादुकन्दा—विदारी। धात्री—आमलकी। शाद्वलं—हरिततृणं। 'एतौ मध्यतवर्गीयौ वैदूर्यमणिशाद्वला 'विति **द्विरूपकोषः**।

३४८. शल्यमिति। क्ष्वेडो—विषं। मदनो—राठः। 'क्ष्वेडशङ्कुशरे शल्य-नाश्वाविन्मदनद्रुम ' इति तालव्यादौ **[११५३]रभसः**। सेव्य इति। पौण्ड्रकः—'पुण्ड्रेक्षौ पुण्ड्रकः सेव्यः [११५४]पौण्ड्रकोऽतिरसो मधु 'रिति **वाचस्पतिः**। हयगन्धा—मालती। रणप्रियं—नलदं।

३४९. सौम्येति। सोमा—सोमवल्ली। सोमराजी—वाकुची। सुमना—मालती। पर्णिनी—शालिपर्णी। ऋद्धिवृद्धि—स्वनामख्याते। [११५५]सोमगन्धिकः—कल्हारः। [ *75 a* ].

३५०. हय इति। तुङ्गः—केसरी। 'केसरी पूरको तुङ्ग ' इति **हृदय-दीपकः**। युगं—'ऋद्धिवृद्धियुगं तुष्टिराशीः सर्वजनप्रिये 'ति **केयदेवः**। हयो—

---

११४८. सूत. ११४९. शुंठि. ११५०. सैधव. ११५१. मंडुला०. ११५२. पूष्कर०. ११५३. रसस:. ११५४. पौड्रको. ११५५. सोमगाग्धिक:.

वृष्द्दाख्यमेषजे ' इति **विश्वः** । मुरा—गन्धकुटी । ' मुरा गन्धकुटी दैत्या द्दया गन्धकुटी [1156]कुटौ 'इति **निघण्टुः** । जलकुब्जकः—पङ्कारः । गुडत्वचा—भृङ्गं । कृष्णजीरं—कृष्णाजाजी । ' उद्गारशोधनं द्दयं जरणं कृष्णजीरक 'मिति [1157]**धर्मिष्ठः** ।

३५१. यत्रिः । अभयेति । हरीतकी—शिवा । समगन्धिकमुशीरं । कलोड्य-मिति । पद्मबीजं—पद्माक्षं । [1158]इन्दीवरं—नीलकमलं । वेणुफलं—वंशयवः । ' पद्माक्षे नील-कमले तथा वंशयवेऽपि च । कलोड्य 'मिति **हारावली** ।

३५२. कैडर्य इति । कट्फलः-सोमवल्कलः । द्रेष्का—महानिम्बः । करञ्जः—करजः । मदनद्रुमः—राठः । ' कैडर्यः स्यान्महानिम्बे कट्फले च करञ्जके । शल्यके चे 'ति **रन्तिदेवः** । गन्धाढ्येति । सटी—कर्चूरः । गन्धमादनी—सुरा । जलकुब्जकः—पङ्कारः । ' पङ्कारो जलकुब्जकः । महाकुमारी गन्धाढ्या तत्पुष्पं भद्रमुच्यते ' इति **केयदेवः** । [ 75 b ].

३५३. गाङ्गेयीति । मुस्तमम्बुधरः । स्वर्णं—हेम । कसेरु—वृषपर्वा । ' मुस्ताकृति स्वल्पकन्दं वृषपर्वा कसेरुक 'मिति । चक्षुष्यमिति । कतकोऽम्बुप्रसादनः । पुण्डरीकं—स्थलकमलं । रसाञ्जनं—दार्वीक्वाथभूतं ।

३५४. वनकुलत्थः—' चक्षुष्या कुम्भकारी च कुलाली च कुलत्थिके 'ति [1159]**रत्नकोषः** । चाम्पेय इति । नागकेसरः—' [1160]चाम्पेयो नागकेसर ' इति **हारावली** । किञ्जल्कः—पुष्पकेसरः । [1161]चम्पको—हेमपुष्पकः । सुवर्णं—कनकं ।

३५५. नादेयीति । नीरवानीरो—जलवेतसः । ' नदीकूलप्रियो[1162] रम्यो निचुलो जलवेतस ' इति **केयदेवः** । भूजम्बूः—' काकजम्बूर्मेघवर्णा नादेयी विदिशो-त्पक ' इति **धन्वन्तरिः** । ' नादेयी स्वल्पजम्बूः स्या 'दिति **भावगुणनाममाला** । नागरङ्गो—नारङ्गः । ' नारङ्गो नार्यङ्गस्त्वत्ववासनः ऐरावतश्च सैव स्यान्नादेयी भूमिजम्बु-के 'ति । **सिंहः** । जवा—जपा । [1163]अम्बुपिप्पली—जलपिप्पली । ' नादेयी कुटजार्क-शिग्रुबृहतीत्यत्र नादेयी जलपिप्पली 'ति **रूपनारायणः** । जयन्ती—अग्निमन्थभेदः । ' जया जयन्ती [1164]तर्कारी नादेयी वैजयन्तिके 'ति **केयदेवः** । सैन्धवं नरं । 'सैन्धवं साधु सिन्धूत्थं नादेयं सैन्धुजं शिव 'मिति **निघण्टुः** । [ 76 a ].

---

११५६. कुटौरे. ११५७. धर्म्मिष्टः. ११५८. इंदी०. ११५९. ०कोयः. ११६०. चोपेयो. ११६१. चंपको. ११६२. ०प्रियो. ११६३. अबु०. ११६४. तर्कारी.

३५६. पयस्येति। दुग्धिका—क्षीरी[1165]। धीरा—क्षीरकाकोली। काञ्चनक्षीरिणी—स्वर्णक्षीरी। मलयेति। त्रिवृताभित्—'त्रिवृतो द्विविधं मूलं शोणितं श्याममेव च। अरुणं त्रिवृदाख्यं तु श्यामं श्यामाह्वयं मत'मिति। 'मलया त्रिवृतौषधा'विति **लोचनः**। श्वेतचन्दनं—हरिचन्दनं।

३५७. मङ्गल्य इति। ग्रन्थिलो—बिल्वः। अश्वत्थः—पिप्पलः। मसूरः—द्वित्रिवर्णः। शिम्बिधान्यप्रसिद्धः। 'वेश्यायां व्रीहिभेदे च मसूरा मसुरा स्त्रियां। मसूरमसुरौ पुंसि द्वावेतावपि चैतयो'रिति **रभसः**। अरिष्टो—रक्षाबीजः। वार्षिकं—त्रायमाणा। शमी—पवित्रपत्रा। अधःपुष्पी—शङ्खाह्वा। मिसिः—शतपुष्पा। धीरं—कुङ्कुमं। प्रियङ्गुः—फलिनी।

३५८. रोचना—गोरोचना। जीवनी—जीवा। मल्लिगन्धि—कालागुरु। मल्लिकापुष्पसौरभानुसारि गन्धं जोङ्गकं। 'मङ्गल्यस्त्रायमाणे स्याद्बिल्वेऽश्वत्थे मसूरके[1166]। मङ्गल्या रोचनायां च प्रियङ्गुशतपुष्पयोः। अधःपुष्पीशङ्खपुष्पीशमीशुक्लवचासु चे'ति **विश्वः**। 'कालागुर्वगुरु स्यात्तु मङ्गल्या मल्लिगन्धि यदि'त्यमरः। 'मङ्गल्यं घुसृणं धीरं बाल्हीकं[1167] कुङ्कुमं तथे'ति **नाममाला**। विशल्येति। अग्निशिखा—लाङ्गली। दन्ती—निकुम्भः। गुडूची—अमृता। त्रिपुटा[1169]—त्रिवृत्। 'विशल्या लाङ्गली[1168]दन्तीगुडूचीत्रिपुटासु चे'ति **विश्वः**।[ *76 b* ].

३५९. शङ्खाख्येति। वचा—षड्ग्रन्था। कम्बुमालिनी—शङ्खपुष्पी। दधि—क्षीरस्योत्तरावस्था। शालेयमिति। तालपर्णी—मुसली। चाणक्यमूलकं—चणकक्षेत्रसन्भूतं मूलकं[1170]।

३६०. शैलेयमिति। गिरिमृत्—गैरिकं। तालपर्णी—मुसली। शैलजं—शिलापुष्पं। "छ डी ले"ति ख्यातं। सिन्धुजं—सैन्धवं। स्त्रीप्रिय इति। सहकारस्य फलं—पुण्डरीकं। शोभाञ्जनद्रुमः—बहलदलः।

३६१. हिरण्यमिति। वराटकः—पीतकपर्दः[1171]। काञ्चनं—हेम। यच। अलिप्रियेति। जम्बुभित्—अत्र महाजम्बूः। नेपाली—मल्लिकाभेदः। हलिप्रियः[1172]—कदम्बः[1173]।

३६२. कण्टकाढ्येति। कुब्जो—वक्रकण्टकः। मोचा—शाल्मली। मसूरविदला—त्रिवृत। घुणप्रियेति। प्रतिविषा—अतिविषा शुष्ककन्दापरपर्याया। हस्तिदन्ती—[1174]

११६५. क्षीराव्दी. ११६६. मसूरके. ११६७. वाल्हीकं. ११६८. लागली.
११६९. Perhaps the words are interchanged here. त्रिपुटा is the reading of W.
११७०. मूळकं. ११७१. ०कपर्दः. ११७२. Text हिलि०. ११७३. कदेवः. ११७४. ०दंता.

निकुम्भा । 'दन्ती शीघ्रा हस्तिदन्ती निकुम्भा सोपचित्रिका । घुणप्रिया चे'ति केयदेवः ।

३६३. जीवनीयेति । जया—हरीतकी । जीवा—जीवन्ती । काका—काञ्ची । वीरा—मेदुरा । 'मेदुरा[1175] जीवनीया च धीरा वीरा च सा स्मृते'ति धन्वन्तरिः । "का को ली"ति लोके ख्याता । गणो—जीवनीयाख्यः । 'जीवनीयो मधुरकैर्जीवनो मधुरो गण'इति हृदयदीपकः । [ 77 a ]. तण्डुलीय इति । शाकभेदः—स्वल्पा मेघनादजातिः । 'तण्डुलीयो विडङ्गद्रौ स्वल्पमारिषताप्ययो'रिति लोचनः । 'तण्डुलीयस्तौण्डुलेयो[1176] मेघनादघनस्वर' इति[1177] धर्मिष्ठः । विडङ्गं—क्रिमिघ्नं । धातुमाक्षिकं—ताप्यं । 'तण्डुलीयः शाकभेदे विडङ्गतरुताप्ययो'रिति मेदिनी ।

३६४. 'तृणशून्यं तु केतक्याः फले मल्ल्यां च निस्तृणे' इति लोचनः । 'तृणशून्यस्थाने साधु'रिति मुकुटः । 'तृणे शूले गुल्मे साधु'रिति स्वामी । धनञ्जय इति । चित्रकोऽग्निकः । [1178]अर्जुनः—ककुभः । अरुष्करो—भल्लातकः ।

३६५. पार्वतीयेति । मोदकी—गुडमञ्जरी । धातकी—मदा । अभयाभित्—विजया । 'जीवन्तिका पूतनकी अमृता विजयाभया । रोहिणी चेतकी सप्तभेदभिन्ना हरीतकी' । प्रावृषेण्येति । आत्मगुप्ता—कपिकच्छूः[1179] । कुलत्थः—कुम्भकारी । हरिप्रियः—कदम्बः । 'मर्कटीनीपयोः[1180] प्रावृषेण्या स्याच्च कुलत्थके' इति लोचनः ।

३६६. मुनिप्रिय इति । ब्रह्मवृक्षः—पिप्पलः । नृत्यकुण्डो—वनव्रीहिः । धनुःपटश्चारुः । 'अश्वत्थश्च वनव्रीहौ चारे चापि मुनिप्रिय' इति शब्दार्णवः । [ 77 b ]. रविप्रियेति । आदित्यभक्ता—सुवर्चला । निम्बो—रविप्रियः । मार्कवो—भृङ्गराजः ।

३६७. वेधमुख्येति । मृगमदः—कस्तूरिकामदः । केसरो—बकुलः । शतवीर्येति । शतावरी—शतमूली । दूर्वा—हरिता । शुकप्रियेति ।

३६८. राजादनः—क्षीरी । दाडिमी—करकः । निम्बो-नियमनः । कपीतनः—शिरीषः । हरिप्रियमिति । कालसारं—कालानुसार्यं[1181] । 'हरिप्रियं कालसारं तथा कालानुसार्यकं[1181]' । "कलम्बक" इति ख्याता चन्दनजातिः । कदम्बः—प्रावृषेण्यः ।

---

११७५. सेदुरा. ११७६. ०लेरो. ११७७. धम्मिमष्ट. ११७८. अर्ज्जुनः. ११७९. कमिकछुः. ११८०. मर्कटानीपया. ११८१. ०र्य्यं०.

३६९. यपं। कालानुसार्यमिति। कालीयं—कालसारं। शैलेयं—शैलजं। शिलापुष्पापरपर्यायं। तगरं—नतं। सहस्रवीर्येति। भार्गवी—दूर्वा। 'सहस्रवीर्याभार्गव्यौ रुहाऽनन्ते 'त्यमरः। 'शतावरी बहुसुता भीरुरिन्दीवरी वरी 'ति निघण्टुः। यान्ताः।

३७०. रैकम्। श्रीरिति। श्रीनिवेशकः—श्रीवासः। 'श्रीवासस्तु दधिः[1182] श्रीवेत्रः श्रीनिवेशक' इति हृदयदीपकः। बिल्वः—श्रीफलः। राजादनः—क्षीरिका। लवङ्गं—श्रीफलं। 'श्रीनिवासे शलाटौ च तथा क्षीरिलवङ्गयोः श्रीः स्मृते 'ति लोचनः। [78 a]. रद्विः। अस्र इति। वालकं—ह्रीवेरं। कुङ्कुमं—रक्तं। अभ्रमिति। मुस्तक-मम्बुधरः।

३७१. जाम्बूनदं—सुवर्णं। अभ्रपटलं—'अभ्रकं गिरिजामले 'इत्यमरः। इन्द्र इति। शक्रमहीरुहः—इन्द्रवृक्षः। फणिज्जको—मरुबकः। उग्रेति। वचा—षड्ग्रन्था। [1183]क्षुद्विबोधनरिङ्का।

३७२. ऐन्द्रीति। इन्द्रवारुणी—गोडुम्बा। शेफाली—पुष्पवर्षिणी। सारिवा—गोपी। एला—त्रुटिः। क्षार इति। पाक्यं—विड्गन्धिलवणं। 'विड्गन्धिलवणं पाक्यमि 'ति केयदेवः। गुडः—फाणिः। काचं-त्रिकूटं। '[1184]काचं पाक्यं त्रिकूटं स्यादि 'ति केयदेवः। यवजो—यवक्षारः। पटु—लवणं। 'सर्वं तु लवणं पट्वि 'ति केयदेवः। भस्म—[1185]रक्षा।

३७३. क्षुद्रेति। चाङ्गेरिका—अम्ललोणिका। स्पर्शी—क्षुद्रकण्टाली। क्षुर इति। गोक्षुरस्त्रिकण्टः। इक्षुरः—कोकिलाक्षः। 'कोकिलाक्षे [1186]क्षुरक्षुरा 'इति। 'क्षुरः कोकिलाक्षे च गोक्षुरः' इति विश्वः। क्रोष्ट्रीति[1187]। विदारी—कृष्णविदारी। लाङ्गली—कलिकारी। 'क्रोष्ट्री शृगालिकाकृष्णविदारीलाङ्गलीषु चे 'ति मेदिनी। [78 b]. क्षौद्रमिति। क्षुद्रोद्भवं—क्षुद्राख्यमक्षिकाकृतं मधु। 'मक्षिकाः पिङ्गलाः सूक्ष्माः क्षुद्रा यास्तत्कृतं मधु। कपिलं शीतलं लेखि क्षौद्रमित्युच्यते बुधै 'रिति। जलं—पानीयं। 'क्षौद्रं मधुनि पानीये' इति मेदिनी।

३७४. खर इति। पृथुल—शर्करा। देवताडो—देवदाली। 'देवताडे द्वयोस्तीक्ष्णे त्रिषु ना [1188]गर्दभे खर' इति लोचनः। अजमोदा—वस्तमोदा। गरेति गरीति च।

---

११८२. दधिश्वयाह्वः. ११८३. क्षुद्वि. ११८४. कांच०. ११८५. राक्षा. ११८६. क्षरा. ११८७. ०ष्टो. ११८८. गर्द०.

जीमूतो–देवदाली । **स्वामी** तु ' गरागरी 'ति समुदितं प्राह–' जीमूतको [११८९]देवताडो वृत्तकोशो गरागरी 'ति । उपविषं–कृत्रिमविषं[११९०] । ' कृत्रिमं तु विषं [११९१]गरश्चोपविषं च तदि 'ति **हैमः** । ' अर्कक्षीरं स्नुहीक्षीरं तथैव कलिहारिका । करवीरश्च धत्तूरः पञ्च चोपविषाः स्मृता ' इति **भावमिश्रः** । ' गरी खरायां करणे क्लीबं चोपविषे विषे[११९२] ' इति **मेदिनी** । ' गरं विषे चोपविषे गरः करणरोगयो 'रिति **विश्वलोचनः** । [११९३]विषं–काकोलः ।

३७५. गुन्द्र इति । एरका–गुच्छमूला । ' गुन्द्रैरका गुच्छमूला वानीरः पृथुलः खर ' इति [११९४]**धर्मिष्ठः** । " प टे र क " इति ख्यातः । लता–प्रियङ्गुः । ' गुन्द्रा गन्धफली लते 'ति **धर्मिष्ठः** । भद्रमुस्तकं–' कुरुविन्दो मेघनामा मुस्ता गुन्द्रा तु सोत्तमे 'ति **हैमः** । तेजनः–शरः । ' गुन्द्रस्तेजनकः शर 'इत्य**मरः** । ' गुन्द्रस्तेजनके गुन्द्रा प्रियङ्गौ भद्रमुस्तके । कैवर्तीमुस्तके चापी 'ति **विश्वः** । [ *79 a* ]. गौर इति । करञ्जः–करजः । सिद्धार्थः–श्वेतसर्षपः । तालं–हरितालं । अब्जकेसरः–कमलकेसरः ।

३७६. रजनी–हरिद्रा । पिङ्गा–गोरोचना । प्रियङ्गुर्लता । तुलसी–देवदुन्दुभिः । ' सिद्धार्थे चिरबिल्वे च गौरस्तालेऽब्जकेसरे । गौरं गौरी तु तुलसीहरिद्रारोचनासु च । फलिन्यामपी 'ति **विश्वलोचनः** । चन्द्र–इति । कर्पूरो–हिमवालुका । कम्पिल्ल–कर्कशः । ' कम्पिल्लः कर्कशश्चन्द्रो रक्ताङ्गो रोचनोऽपि चे 'ति **भावमिश्रः** । **अमरस्तु** ' रेचनी 'ति पठति । जाम्बूनदं–सुवर्णं । जलं–वारि वालकं वा । ' घनसारे कर्कशे च हिरण्ये जलसंज्ञके । चन्द्रः स्यादि 'ति **सिंहः** । ' चन्द्रः सुधांशुकर्पूरकम्पिल्लस्वर्णवारिष्वि 'ति **विश्वः** । [ *79 b* ].

३७७. चित्र इति । हुतभुक्–पाठीनः । दन्ती–शीघ्रा । ऐन्द्री–इन्द्रवारुणी । [११९५]शम्बरी–द्रवन्ती । चुत्र इति । अ[११९६]म्बष्ठी–' चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिके 'त्य**मरः** । ' चिञ्चाम्लिकाम्लिकी चारुः सुक्ता चण्डा च चुक्रिके 'ति **केयदेवः** । चुकेत्यपि । ' अम्ला स्तम्भिनिका चुका तिन्तिडी तिन्तिडीति चे'ति **केयदेवः** । वेतसाख्यं ' जम्बीरफलसम्भूतरसः संशोषितो रवौ । मृदमत्रे वेतसाख्यं लोके तच्चूकसंज्ञक 'मिति । अम्लवेतसः–सहस्रवेधी । ' स्याद्म्लवेतसश्चुक्रः शतभेदी सहस्रभिदि 'ति **भावमिश्रः** । ' सहस्रवेधी चुक्रोऽम्लवेतसश्चुक्रः शतवेध्यपी 'त्य**मरः** ।

---

११८९. देवतो. ११९०. विषं. ११९१. निषं. ११९२. विषे. ११९३. विषं. ११९४. धर्म्मिष्ठः. ११९५. शंबरा. ११९६. अंबष्टा.

३७८. सुक्तं—'यन्मध्वादि[1197] चौरभाण्डे सगुडक्षौद्रकाञ्जिकं । धान्यराशौ त्रिरात्रस्थं सुक्तं चुक्रं तदुच्यते' । आदिशब्देन मधूकपुष्पजादिग्रहणं । उक्तं च—'मधूकपुष्पेक्षुरसगुडपीलुफलादिभिः । साधितं जीर्णमत्यम्लं[1198] सुक्तं चुक्रं च तन्मत'मिति **सिद्धमन्त्रप्रकाशः** । तिन्तिडीकं—वृक्षाम्लं । 'चुक्री[1199] चाङ्गेरिकायां स्याच्चुक्रं वृक्षाम्लके मतमि' ति **विश्वलोचनः** । चोर इति । निट्चरो—गणहासकः । 'निशाचरो धनहरः कितवो गणहासकः । चोरकश्चे 'ति **भावमिश्रः** । 'ग्रन्थिपर्णकभेद' इति च । शङ्खा—चोरपुष्पी । 'चोरपुष्पी शङ्खिनी च चोरः शङ्खिनिका च से 'ति **शाश्वतः** । 'शङ्खिनी नाकुली विश्वा चोरपुष्पी सुकेशिनी 'ति **केयदेवः** । [*80 a*]. छत्रेति । मिसिः—शतपुष्पा । अतिछत्रः—पालघ्नः । "कू कु र छ त्ता" इति लोके । 'वचातुल्ये जलतृणे छत्रातिछत्रकश्च सा' । 'छत्रातिछत्रकश्चैव पालघ्नोऽपि स एव ही 'ति **सिंहः** । कुस्तुम्बुरु—धनिका । 'कुनटी धनिका छत्रा कुस्तुम्बुरु वितुन्नकमि 'ति **भावमिश्रः** । [1200]शिलीध्रं—कवकं । "छ त्रा क" इति लोके ।

३७९. तन्त्रीति । कन्दरोहिणी—गुडूची । औषधोत्तमं—औषधश्रेष्ठं । तीव्रेति । तीव्रोत्तम—आकारकरभः । तिक्ता—कटुकी । आसुरी—राजिका । दूर्वाभित्—गण्डदूर्वा । 'गण्डाली मत्स्याक्षको मत्स्यगन्धे 'ति समानार्थाः । 'तीव्रा तु कटुरोहिण्यां [1201]राजिकागण्डदूर्वयो 'रिति **मेदिनी** ।

३८०. दार्वीति । पीतद्रुः—किलिमं । देवदारु—देवकाष्ठं । 'पुन्नपुंसकयोर्दारु जीवातुस्याणुसीरवत्र' इति **त्रिकाण्डशेषः** । धारेति । वत्सादनी—गुडूची । क्षीरकाकोली—क्षीरशुक्ला । पृथुजीरकः—स्थूलजीरकः ।

३८१. सूक्ष्मैला—द्राविडी । हरिद्रा—निशा । गन्धकुटी—मुरा । 'मुरागन्धकुटी-दैत्ये 'त्येकार्थाः । धीरेति । वीरा—क्षीरकाकोली । 'धीरा वीरा पयस्विनी 'ति **केयदेवः** । कुब्जभित्—शतपत्री । 'कण्टकारी वृता धीरा नीलालिकुलसंकुले 'ति **केयदेवः** । पौष्करं—पुष्करमूलं । रक्तं—[1202]कुङ्कुमं । धीरं कुङ्कुमरक्तकमि 'ति [1203]**धर्मिष्ठः** । [*80 b*].

३८२. पुण्ड्रमिति । प्रपौण्डरीकं—स्थलकमलं । "गु[1204]लाँ ब" इति लोके ख्यातं । 'साधुपुष्पं स्थलपद्मं दृष्टिकृत्पुण्डरीयकमि 'ति **रभसः** । 'प्रपौण्डरीकं पौण्ड्राह्वं पुण्डर्यं पुण्डरीयकं । पुण्ड्रं सुपुष्पं श्रीपुष्पं चक्षुष्यं सानुमानकमि'ति **केयदेवः** ।

---

११९७. ०दिग्धु चौराभाण्डे सेगुड०. ११९८. मत्यंम्लं. ११९९. चक्री.
१२००. शिला०. १२०१. राजिको. १२०२. कुकुमं. १२०३ धर्म्मिष्टः. १२०४. गुलाव.

'आजग्मतुस्तच्चरणौ पृथिव्यां स्थलारविन्दश्रियमव्यवस्था 'मिति **कालिदासः** । व्रीहिभित्–'पौण्डरीकाभो व्रीहि 'रिति **सिद्धमन्त्रप्रकाशः** । इक्षुभित्–सेव्यः । "पोण्डा" इति लोके प्रसिद्धः । 'पुण्ड्रेक्षौ पुण्ड्रकः सेव्यः [1205]पौण्ड्रकोऽतिरसो मधु 'रिति **वाचस्पतिः** । अतिमुक्तो–माधवो । पुण्डरीकं–श्वेतकमलं । वर इति । तिन्दुर्विरला । पियालश्चारः ।

३८३. अभीरुः–शतावरी स्थिरपत्रत्वात् । 'शतवीर्या [1206]वर्यभीरुर्मदा पुरुषदन्तिके 'ति **हृदयदीपकः** । 'शतमूली [1207]बहुसुता भीरुरिन्दीवरी वरी 'त्यमरः । अभीरुर्विन्यसेत्[1208]र्यार्चभियुक्तप्रयोगाश्च तेन वृथा तरुणभीरुभिरित्यसाधुरेवेति **प्राञ्चः** । धीरं–कुङ्कुमं । कुम्भं–गुग्गुलुः । 'कुम्भो मुखलकं कुम्भः कुम्भोलुः खलकं वर 'मिति **वाचस्पतिः** । सिन्धु–सैन्धवं । [1209]गुडत्वक्–भृङ्गं । वन्ध्या–वन्ध्याककोंटकी । चन्द्रहासा–गुडूची । [1210]पोत्री–वाराहीकन्दः । पाठा–अम्बष्ठा । फलत्रिकं–हरीतक्यामलकविभीतकं । 'वरश्चारे तिन्दुके च शता[1211]वर्यं वरीवरं । घुसृणे गुग्गुले सिन्धुलवणे च वराङ्गके ' इति [1212]**लोचनः** । [ *81 a* ].

३८४. वीरेति । कुलाली–वनकुलत्थिका । गम्भारी–श्रीपर्णी । कम्भारी इति च । क्षीरावी–दुग्धिका । [1213]वारुणी–सुरा । काकोली-क्षीरकाकोल्यौ–प्रसिद्धे । तामलकी–मृद्यः ( ? ) । एलवालु–हरिवालुकं ।

३८५. रम्भा–कदली । विदारिकायुग्मं–विदारी क्षीरविदारी च । काष्ठोडुम्बरिका–मलयूः । ककुभोऽर्जुनः । नतं–तगरं । शृङ्गी–कर्कटशृङ्गी । काञ्चिकं–अवन्तिसोमं । 'काञ्चिकं काञ्जिकं वीरं कुल्माषाभिषुतं तथा । अवन्तिसोमं धान्याम्लमारनालमरं तथा । सक्तु तुषोदक 'मिति **धन्वन्तरिः** ।

३८६. भद्रेति । अनन्ता–यवासकः । रसा–रास्ना । गोपी–सारिवा । कृष्णा–पिप्पली । हिंस्रा–कन्थारी । अम्ललोणिश्चाङ्गेरी । सारिणी–प्रसारिणी । कट्फलः–सोमवल्कलः । विश्वं–शुण्ठी । अम्बुदो–मुस्ता । 'भद्रं स्यान्मङ्गले हेम्नि मुस्तके करणान्तरे ' इति **रुद्रः** । महोत्पलमरविन्दं ।

३८७. मुरेति । [1214]महोसहा–माषपर्णी । [1215]गन्धकुटी–मुरा । [ *81 b* ]. वज्र इति । सिहुण्डः–सीहुण्डः । 'वज्रद्रुमः सिहुण्डोऽपी 'ति **रभसः** । अथ 'सीहुण्डो–

१२०५. पांड्रको. १२०६. वीर्य्या-वर्य्य. १२०७. वहु. १२०८. ०वीण्यनसेत्पाद्य०. १२०९. गुड्ड०. १२१०. पौत्री. १२११. वर्य्यं. १२१२. लोचन. १२१३. वारुणा. १२१४. महोसहा. १२१५. गध०.

'वज्रस्नुक् स्त्री स्नुही गुडे 'त्यमरे स्वामिपाठः। शिवमामलकं। हीरकः–कुलिशं। 'वज्रं त्रिकोणं षट्कोणं भास्वत्तीक्ष्णं यथार्थक 'मिति। वालकं–वारि।

३८८. गुडूची–छिन्नरुहा। व्याघ्र इति। रक्तैरण्डः–प्रसिद्धः। करञ्जः–षड्ग्रन्थः। निदिग्धिका–कण्टकारी। वेरमिति। वङ्गं–[1216]वातिङ्गणं। 'वेरं काश्मीरे वेरं वातिङ्गणेऽपि चे 'ति विश्वः। "वे ङ्ग न" इति लोके। कुङ्कुमं–धीरं।

३८९. शक्र इति। अर्जुनः–[1217]ककुभः। कुटजः–कौटी। 'कौटजः कुटजः कौटी 'ति चन्द्रः। शिग्रुरिति। शोभाञ्जनः–सुभञ्जनः। शाकमात्रं–मूलकादिदशधोक्तं। शीघ्रेति। दन्ती–निकुम्भः। घनच्छदः–शोभाञ्जनः।

३९०. सेव्यमुशीरं। शुभ्र इति। सुमनो–गोधूमः। वंश्या–वैणवी। 'वैणवी वंशजा वंश्या वांशी वंशविवर्धिनी[1218]। वंशक्षीरी शुभा शुभ्रा रोचना वंशरोचने 'ति निघण्टुः। अहिच्छत्रा–सितोपला। 'अन्या श्वेना त्वहिच्छत्रा सिकता च सितोपले 'ति कैयदेवः। वरं–सैन्धवं। अभ्रकं–गिरिजं। 'शुभ्रं तु सैन्धवे[1219] व्योमसंज्ञकेपी 'ति सिंहः। [ *82 a* ]. सार इति। लोहमयः। दाडिम्बो–दाडिमी। याज्ञिकः–खदिरः।

३९१. स्थिरेति। कलशी–शालिपर्णी। अंशुमती–पृष्टिपर्णी। सूर्यपर्णीद्वयं–माषपर्णीमुद्गपर्ण्यौ। धत्रो–मरोद्रहः। हिंस्रेति। काकादनी–कन्थारिका। चिरायुः–शाल्मली।

३९२. बृहती–कण्टकारिका। कृष्णसारा–मण्डलपत्रिका। पिशाची–भूतजटा। आटरूषो–वासा। रत्रिः। अमरेति। नीलदूर्वा–हरिताली। वत्सादनी–गुडूची।

३९३. गुडा–स्नुही। अस्थिसंहारो–अस्थिशृङ्खला। 'वज्रवल्ल्य[1220]स्थिसंहारो वज्रप्रोक्ता तथामर' इति हृदयदीपकः। अम्बर[1221]मिति। 'सुगन्धिकं सिन्धुसुरभीशक्रदि'ति गान्धिकाः। महामत्स्यगिलितोज्झितसिन्धुसरघाकृतमधुछत्रशेष'मिति सांयात्रिकाः। कर्पासो–तपनी। अगुर्वि[1222]ति। शिंशपा–मण्डलपत्रिका। जोङ्गकं–लोहं। 'वंशकागुरुराजार्हलोहकृमिजजोङ्गक 'मित्यमरः। 'अगुरु क्लीबे शिंशपायां जोङ्गके लघुनि त्रिष्वि 'ति रुद्रः।

---

१२१६. वातिंगण. १२१७. अर्जुन. १२१८. विवर्द्धिनी. १२१९. सैधवे. १२२०. वल्य०. १२२१ अंबर. १२२२. अगुर्वेती.

३९४. करीर इति । गूढपत्रो—ग्रन्थिलः । वंशकन्दलो—वंशाङ्कुरः । 'कन्दलः कलहे युद्धे नवो[1223]ङ्कुरकपालयो 'रिति **त्रिशूलोचनः** । कच्छुरेति । शुकशिम्बा—शुकशिम्बिः। शटी—कर्चूरः[1224] । दुस्पर्शो—यवासकः । [82 b].

३९५. [1225]कर्चूर इति । गन्धमूलो—द्राविडः । 'गन्धमूलो वेधमुख्यः [1225]कर्चूरो द्राविडः शटी 'ति **निघण्टुः** । नटमण्डनं—हरितालं । [1226]कवरीति । 'वर्वरी कवरी तुङ्गी खरपुष्पाजगन्धिके 'त्यमरः । 'वर्वरीति पाठभेद' इति **स्वामी** । "व व री" ति लोके ख्याता । पृथ्वी—स्थू[1226]लजीरकः । कालिन्दुरिति । श्रीनिवासः—श्रीवेष्टः ।

३९६. भूतावासः—कलिद्रुमः । काश्मीरमिति । कुङ्कुमं—धीरं । पुण्यसागरः—पौष्करं । कुमारीति । तरणी—शत[1227]पत्री । वन्ध्या—वन्ध्याकर्कोटकी । वनमाल्यं—वनमालिका । नेपालीत्यपरपर्यायो मल्लिकाभेदः । सहा—घृतकुमारी ।

३९७. श्वेतस्पन्दा—श्वेतापराजिता । महाजम्बूः—राजजम्बूः । वरुणो—भ्रमरबन्धुः । वृन्दारण्ये प्रसिद्धः । कुब्जरेति । मदनीया—धातकी । पाटला—ताम्रपुष्पी । केसर इति ।

३९८. किञ्जल्कोऽब्जकेसरः । 'केसरमब्जाहिकेसरयो 'रिति **हृदयदीपकः** । तुङ्गो—नागकेसरः । मुकुरो—बकुलः । 'मुकुरः स्यान्मुकुरवद्दर्पणे च कुलद्रुमे' । कुलालदण्ड [!] ' इति **मेदिनी** । 'बहु[1228]पत्रः कोलफलो महीरुहो मद्यदोहदो बकुलः । सितमणुचक्राकारं मद्यामोदं सितं कुसुम 'मिति । पुष्पकेसरः—पुष्पमात्रकेसरः । सूपधूपनं—हिङ्गु । 'केसरं हिङ्गुनि क्लीबं किञ्जल्के न स्त्रिया 'मिति **मेदिनी** । सवितृकिसलयकेसरसभा इत्यूष्मविवेकान्मध्यदन्त्यः । [83 a]. खपुर इति । पूग उद्वेगः । [1229]मुस्तं—मुस्तकं ।

३९९. [1230]खर्जूर इति । सिन्दी—दुरारोहा । तालपत्री—मुशली । 'हिरण्यपुष्पी खर्जूरी[1230] मुशली तालपत्रिके 'ति [1231]**धर्मिष्ठः** । खदिरेति । शा[1232]कभेदोऽत्र लज्जालुः । 'नमस्कारी गण्डकाली समङ्गा खदिरेत्यपी 'त्यमरः । **लोचनस्तु** 'खदिरी 'त्याह । 'खदिरी शाकभेदः [1233]स्यात्खदिरो दन्तधावने ' इति । दन्तधावनो—बालपत्रः ।

४००. गण्डीरीति । मत्स्यगन्धा—मत्स्याक्षकः । "गा ण्ड र" इति ख्यातं तृणं । शाकभिदत्र समष्ठिला । 'गण्डीरो ना समष्ठिले'त्यमरः । "गा ण्ड र डु वी "ति

---

1223. नवाकुर. 1224. कर्चूं०. 1225 च substituted for ब.
1226. स्थूर०. 1227. सत०. 1228 बहु०. 1229. मुस्त. 1230. खर्जू०.
1231. धर्मिषः. 1232. Text has शाकु०. 1233. भेदस्या०.

ख्यातस्यानूपजशाकस्ये 'ति **रामाश्रमः**। 'गण्डीरिका रक्तदण्डा वेतसाकारपत्रात्यन्ततीक्ष्णा कुल्यादिसमीपे जायते' इति **रूपनारायणः**। वज्रः—स्नुही। 'स्नुही वज्रो महावृक्षो गण्डीरः स्नुक् सुधा गुडः'। जम्बीर इति। प्रस्थपुष्पः—फणिज्जकः। जम्भलो—जम्भशाकभिदत्र जम्बीरः। 'जम्बीरसदृशः किञ्चित्तीक्ष्णः शाक' इति **हेमाद्रिः**। 'जम्बीरो हरितशाकमुत्तरापथे प्रसिद्ध'मिति। 'जम्बीरगन्धि हरितं यदम्लकटुकं रसे। शाकं जम्बीरमित्युक्तं जम्भलं चोत्तरापथ' इति **सिद्धमन्त्रप्रकाशः**। 'जम्बीरं प्रस्थपुष्पाख्यशाके दन्तशठेऽपि चे'ति **विश्वः**। 'प्रस्थपुष्पो फणिज्जकः जम्बीरोऽपी'त्यमरः। [ *83 b* ].

४०१. त्वक्पत्रीति। हिङ्गुपत्री—वाष्पिका। 'गुडत्वगुत्कटं हृद्यं तनुकं स्वर्णभूमिक'मिति। त्वक्सार इति। शणः—घण्टारवः[1234]। वंशो—वेणुः। तुवरीति। अन्नभिदत्र—आढकी। मृदभित्—सौराष्ट्री। तूवरी च। 'वार्षिका मल्लिका तूवर्याढकी कचुराशटी'ति **वोपालितः**। द्रुभेदः। 'पत्रैस्तु केसरोकारैः[1235] कषायसदृशैः[1236] फलैः। वृक्षस्तुवरको नाम पश्चिमार्णवतीरज' इति।

४०२. नागरमिति। विश्वं—शुण्ठी। मुस्तमम्बुदः। देवी—वन्ध्याकर्कोटकी। 'युगन्धरस्तु कर्कोटः सोऽतिक्षुद्रफलो यदि। तदा कर्कोटकी देवी नागरी विषकण्टकी। वन्ध्यापी'ति **सिंहः**। [1238]निर्जरेति। तालपर्णी—मुसली। वत्सादनी—गुडूची। शिवाफलं—हरीतकी।

४०३. पवित्र इति। खदिरो—दन्तधावनः। दर्भः—कुशः। पत्तूर इति। लोहमारकः—'लिम्बे पत्तूरो लोहमारके' इति **सिंहः**। "छि र ह ण्टा" इति लोके। रक्तकाष्ठं—सरक्तकं। 'पत्तूरं पद्मरागं चे'ति **धन्वन्तरिः**। पङ्कार इति। शैवलः—शीवलः। जलकुब्जको—वक्रकण्टकः।

४०४. पापीर इति। भक्तसिक्थः—जलश्रितैतैण्डुलानां[1239] मण्डरहितो भागः। कदम्बकेसरः—प्रसिद्धः। पीतद्रुरिति। गौराभं—चन्दनं। गौरवर्णं सुगन्धि चन्दनं। पीतचन्दनं—दारुहरिद्रा। 'पीतद्रुः पीतचन्दने। तथा दारुहरिद्राया'मिति **लोचनः**। [ *84 a* ].

१२३४. रवा. १२३५. र्या०. १२३६. कैशरा०. १२३७. कताय०.
१२३८. र्जी०. १२३९. भृत.

४०५. पुष्करमिति। पुण्यसागरः–पुष्करमूलं। 'पौष्करं पुष्करजटा काश्मीरं पुण्यसागर' इति **केयदेवः**। 'उक्तं पुष्करमूलं तु पौष्करं पुष्करं च तत्। पद्म-[१२४०]पत्रं च काश्मीरं कुष्ठभेदमिदं जगु'रिति। पङ्कजं–कमलं। पौष्करमिति। पद्मबीजं–पद्माक्षं। 'मन्दाकिनीपुष्करबीजमाला'मिति **कुमारः**। पुष्करस्य मूलं–पुण्यसागरः। 'पौष्करं पद्मकर्कट्यां स्यात्[१२४१]तथा पुण्य[१२४२]सागरे' इत्यजयः।

४०६. मक्षर इति। स्वर्जिकाक्षारः–सुवर्चिका। गण्डाल्यलवणं–शाकम्भरी-देशोद्भवं शाम्भरापरपर्यायं। मसूरेति मसुरा च। त्रिवृत्–सुषेणा। धान्यविशेषः–मङ्गल्यः।

४०७. एतावपि द्वौ मसूर[१२४३]मसुरौ। एतयो स्त्रिवृद्धान्यविशेषयोः 'वेसवारः परिसरो मसूरः कुसुमासन' इति सभेदान्मध्यदन्त्यः। 'मसूरा चापि मसुरा मङ्गल्य-त्रिवृतोर्मते'ति **लोचनः**। [ *84 b* ]. मधुरमिति। विषं–काकोलः। द्राक्षा–मृद्वीका। मिश्रेया–शत[१२४४]पुष्पा। 'शालेयः–स्या[१२४५]च्छीनशिवश्छत्रा मधुरिका मिसिरि'त्यमरः। मागधी –वनशतपुष्पा। 'सेतिका योनिशूलघ्नी मधुरा मागधी पढे'ति **केयदेवः**।

४०८. महाशतावरी–महापुरुषदन्तिका। 'सहस्रवीर्या मधुरा महा[१२४६]पुरुष-दन्तिके'ति **केयदेवः**। मेदा–मणिछिद्रा। 'मणिछिद्रा देवमणिर्मधुरा च सुछिद्रिके'ति **केयदेवः**। मधूली–गोधूमभेदः। यष्टिका–मधुयष्टी। मधुवल्ली–मधुकर्कटी। मधुरा–मातुलुङ्गजातिः। अन्या स्वादुर्मधुकर्कटी। 'घण्टालिका स्वादु-लुङ्गी मधुरा मधुकर्कटी'ति **केयदेवः**। 'जीवन्तो–रक्तनालः स्यात्ताम्रपत्रः प्रणालकः। शाकवीरः सुमधुरो वास्तुको मार्षकः स्मृतः'। चिरजीवी–जीवकः। 'स्याद्ह्रस्वाङ्गो मधुरको मधुरश्चिरजीवक' इति **रभसः**। 'जीवकः कर्चूकाकारऋषभो वृषशृङ्गवदि'ति **भावमिश्रः**। '[१२४७]मधुरो विषभेदे स्यान्मागधीद्राक्षयोः स्त्रियां। मेदामहाशतावर्योर्यष्टी-मिस्योरपि स्मृता। गोधूमभेदेऽथो पुंसि वास्तूकचिरजीवयो'रित्यनेकार्थध्वनि-[१२४८]मञ्जरी। [ *85 a* ].

४०९. मन्दा[१२४९]र इति। 'पारिभद्रो–निम्बतरुर्मन्दारः पारिजातक' इति। "फ र ह द" इति लोके ख्यातः। बहुलवचनान्मन्दारुश्च। 'मन्दारुः पारिभद्रे च मन्दारः पारिजातक' इति **शब्दार्णवः**। अर्कपर्णोऽर्कः। [१२५०] देवमहीरुहः–'पञ्चैते

१२४०. The word पत्र is written above the word पुस्त probably by the same scribe. १२४१. स्यातथा. १२४२. पुण्या०. १२४३. मसूरौ. १२४४. सत०. १२४५ छीन. १२४६. पुरुं. १२४७. मधुरः. १२४८. त्यनका०. १२४९. मंदार. १२५०. महा०.

देवतरवो मन्दारः पारिजातकः । सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दन 'मित्यमरः । रुधिरेति । रोचना—गोरोचना । कुङ्कुमं—धीरं । असृक्—रक्तचन्दनं ।

४१०. बदर इति । कुन्तली—चञ्चुसदृशा दीर्घपत्रा । तिलपर्ण्याह्वशाकः—'तिलपर्णी बदरको बर्बरश्च प्रकीर्तितः' । कोलिर्घोण्टा । कर्पास्याच्छादनफला तयोः कोलिकर्पास्योः ।

४११. तूलं प्रसिद्धं । बदरी—वाराहीकन्दः । 'वाराहीकन्दसंज्ञस्तु पश्चिमे गृष्टिसंज्ञकः । वाराही बदरी गृष्टि[1251]र्बदरेत्यपि सा सिते 'ति । विष्णुक्रान्ता—[1252]अपराजिता । रसा—रास्ना । बर्बर इति । अजगन्धा—वस्तगन्धा । फञ्जी—ब्राह्मणयष्टिका । भार्गीति समानार्थाः । [1253]बोलो—गन्धरसः ।

४१२. वल्लूरेति । संशुष्कमांसं—प्रसिद्धं । शूकरः—पोत्री । 'वल्लूरमाहुःसंशुष्क-मांसशूकरमांसयो 'रिति विश्वः । [ 85 b ]. वशिरमिति । सिन्धुजवणं—अब्धिलवणं । आघाटः—रक्तापामार्गः । गजाह्वा—श्रेयसी ।

४१३. वानीर इति । कपिचूतः—कपीतनः । पिप्पलभेदः । रथो—वञ्जुलः । अथ वेतसो 'रथाभ्रपुष्पविदुरशीतवानीरवञ्जुला' इत्यमरः । 'वानीरो वारिसंविधे कुटजाभदलाः सुमं अरुणमित्युक्तः' । विदारीति । इक्षुगन्धा—विदारीकन्दः । 'काहला-कारलोहितपुष्पः । स द्विविधः । दीर्घकन्दो बहुक्षीरः ह्रस्वपादकोऽल्पक्षीर' इति डल्हणः । सौम्या—शालिपर्णी । विचित्र इति । वरचित्रस्तिलकः । चित्रशोकः—अशोकः ।

४१४. शाम्बरीति । [1254]आखुकर्णी—दन्ती । वालकं—ह्रीवेरं । जलं—पानीयं । शाबरीति । [1255]शूकशिम्बा—शूकशिम्बिः । शबरोद्भवं—श्वेतरोध्रः । 'श्वेतरोध्रः शाबरोऽक्षि-भैषज्यं शबरोद्भव 'मिति हृदयदीपकः । 'दन्त्यादिरपि शाबराख्यापराथेपि रोध्रे पापे च पठ्यते' इति दन्त्यादौ अजयः ।

४१५. शिलीन्ध्रमिति । कवकश्छत्रकः । कदल्याः कुसुमं—रम्भासुमं । 'शिलीध्रं कदलीपुष्पे कवकात्रिपुटाख्[1256]ययो 'रिति विश्वः । शिशिरमिति । चन्दनं—श्वेतं सुगन्धि चन्दनं । चन्द्रो—हिमवालुका [ 86 a ]. सक्षार इति । हलाहलः—विषं । 'हलाहलं हालहलं वदन्त्यपि हलाहल 'मिति ।

१२५१. वृष्टि. १२५२. अपरी०. १२५३. बोले—धन्वन्तरि has बोलम् and गन्धरसम्, p. 108. १२५४. कर्णी०. १२५५. ०सिंबा. १२५६. ख्यायो.

४१६. शमीफलं—"स क्र र" इत्येव ख्यातं लोके। सामुद्रमिति। लवणाब्धिजं—सामुद्रलवणं। 'सामुद्रकं सागरकं कटूवकं लवणाब्धिज'मिति **केयदेवः**। अम्बरं—सुगन्धिकं। अट्टविलासिनी—व्याघ्रनखं। सिन्दूरमिति। नागसम्भवं—'रक्तरेणुर्नागगर्भं श्री[1257]मच्छृङ्गारभूषणं। गन्धर्वभूषणं रक्तं सिन्दूरं नागसम्भव'मिति **केयदेवः**।

४१७. रोचना—मङ्गल्यं द्रव्यं। "रो ची" इति ख्यातं। रक्तबीजिका—'सिन्दूरी रक्तबीजा च रक्तपुष्पा सुकोमले'ति **भावमिश्रः**। धातुकी—सिन्धुपुष्पी। सौवीरमिति। काञ्जिकं—अवन्तिसोमं। स्रोतोञ्जनं—सौवीराञ्जनं। बदरीफलं—बदरं। 'सौवीरं बदरे स्रोतोऽञ्जने देशे च काञ्जिकं'ति **विश्वः**।

४१८. हरिद्रेति। निशा—पीता। [1258]दर्वी—दारुहरिद्रा। धूलीकदम्बो—वसन्तपुष्पितः। हिण्डीरमिति। दाडिमं—करकः। अब्धिकफो—[1259]हिण्डीरः। वङ्गो—[1260]वार्ताकः। 'हिण्डीरोऽब्धिकफे न स्त्री वार्ताके करके द्वयो'रिति **लोचनः**। [ *86 b* ].

४१९. रच। इन्दीवरमिति। कुवलयं—नीलोत्पलं। 'नीलोत्पलं कुवलयं नीलाब्जमसितोत्पलं। इन्दीवरं च कालोडयं कज्जलं काककुड्मलमि'ति **केयदेवः**। **व्याडिस्तु** 'इन्दीवारम'प्याह। वरी—शतावरी। 'शतमूली बहु[1260a]सुता भीरुरिन्दीवरी'त्यमरः। द्रोणी—दीर्घवृन्ता। 'करम्भा कर्कशा द्रोणी दीर्घवृन्तोत्तमारणी। इन्दीवरी युग्मफला लोणी नीलिका च से'ति **केयदेवः**। उदुम्बर इति। हेमदुग्धः—'उदुम्बरो हेमदुग्धो हरिताक्षो वसुद्रुम'इति **केयदेवः**। सर्वधातुस्ताम्रं। '[1261]उदुम्बरं कनीयः सर्वधातुक'मिति **केयदेवः**।

४२०. उपचित्रेति। '[1262]सुतश्रेणी—द्रवन्ती। द्राक्षायणी—दन्ती। कटम्भर इति। अरलुः—'कटम्भरो भूतवृक्षो भल्लकष्टिटुकोरलुरि'रिति **केयदेवः**। सरणी—प्रसारणी। 'प्रसारणी स्यात्कटम्भरा सरणी'ति **हृदयदीपकः**। मत्स्यपित्ता—[1263]कटुकी। 'कटम्भरा प्रसारण्यां रोहिण्यां गजयोषिती'ति **मेदिनी**।

४२१. [1264]कलम्बिका—कलम्बादल्पा। 'कलम्बो नाडिकाकारः सुषिरो बहुतोयज'इति। गोला—कुनटी। वर्षाभूः—पुनर्नवा। मूर्वा—मधुरसा। [ *87 a* ]. कलिकारीति। वि[1265]शल्या—गर्भपातिनी। करञ्जः—करजः।

---

१२५७. श्रीमात्. १२५८. दार्व्वी. १२५९. ङिण्डीरः. १२६०. वंगवार्ताकुः. १२६० अ, सुत. १२६१. उदंबरं. १२६२. श्रोणी. १२६३. Rather कटुका—See धन्वन्तरि p. 44. १२६४. कलंबिक. For कलंबिका see text. १२६५. विस०.

४२२. कर्णिकार इति । परिव्याधः—'काष्ठचम्पक' इति रामः । व्याधिघातो—दीर्घफलः । गणेरुः—कनकपुष्पिका । कर्णपूर—इति । वीतशोकोऽशोकः । नीलोत्पल-मसितोत्पलं । कपीतनः—पार्श्वपिप्पलः ।

४२३. कादम्बरीति । वारुणी—श्वेता । 'पुनर्नवाशालिपिष्टैः कृता श्वेता च वारुणी'ति निघण्टुः । दध्यग्रं—दधिसरः । 'कादम्बरं तु दध्यग्रे मद्यभेदेऽपि न द्वयो'रिति लोचनः । मेदिनी तु दध्यग्रे पुंस्याह । 'कादम्बरस्तु दध्यग्रे [1266]मद्यभेदे नपुंसकमि'ति । 'दध्युत्तरो दधिस्नेहो दध्यग्रः कट्वरस्सर' इति केयदेवः । मद्यमत्र हाला । कृष्णसार इति । बालपत्रः—खदिरः । शिंशिपा—मण्डलपत्रिका ।

४२४. दीर्घनखी—कालस्कन्धा । [1267]भण्डीरः—शिरीषः । वज्रकण्टक—स्नुही । घनसार इति । आपः—जलं । अप्[1268]शब्दो बहुवचनान्तः स्त्रीलिङ्गः । कर्पूरो—हिमवालुका । दक्षिणावर्तपारदः—पारदस्याग्निस्थापित्वे सति दक्षिणावर्तनैव भ्रमिरिति [1269]तद्विदः । [ 87 b ].

४२५. तुण्डिकेरीति । पिचुस्तूलः । बिम्बी—रक्तफला । 'तुण्डिकेरी रक्तफला । बिम्बिका पीलुपर्ण्यपी'त्यमरः । तोयधर इति । सुनिषण्णश्चतुर्दलः । मुस्ता—मेघः । दीर्घपत्र इति । मधूलकः—'मधुकोऽन्यो मधूलस्तु जलजो दीर्घपत्रक' इति स्वामिपाठः ।

४२६. वेल्लन्तरो—वीरतरुः । 'वेल्लन्तरो जगति वीरतरुः [1270]प्रसिद्धः । श्वेता-सिता[1271]रुणविलोहितनीलपुष्पः । स्याज्जातितुल्यकुसुमः शमिसूक्ष्मपत्रः । स्यात्कण्टकी विजलदेशज एष वृक्ष' इति । "व र वे ल" इति लोके इति भावमिश्रः । दीर्घमूलः—दीर्घपत्रः । 'बृहद्वात'इत्यनेकार्थाः । लशुनो—रसोनः । वर्षाभूः—क्षुद्रवर्षाभूः । '[1272]वृश्चीरः क्षुद्रवर्षाभूर्दीर्घपत्रः [1273]कठिल्लकः' इति धन्वन्तरिः । दीर्घवृक्षो—वंशः । कुम्भयोनिरगस्त्यः । अभ्रपुष्पो—वेतसः । 'अभ्रपुष्पश्च विदुलोरथः शीतश्च वेतस' इति भावमिश्रः । पलाण्डु[1274]र्म्लेच्छकन्दः । गुडदारुरिक्षुः । [ 88 a ].

---

१२६६. मध्य. १२६७. भंडीर. १२६८. अप. १२६९. भ्रमरिति ताद्विदः.
१२७०. प्रसिद्ध. १२७१. विलो०. १२७२. वृश्चीव. १२७३. कठुल.
१२७४. म्लेछ०.

४२७. पयोधर इति । नालिकेरस्त्रिनेत्रः । 'कः प्राय्यते मदनविह्वलया युवत्या । क पुण्ड्रकैमेपेति[1275] कथं बैतायुः[1276] । क्वानादरो भवति केन विराजतेऽब्जं । बाह्यास्थि किं फलमुदाहर नालिकेर 'मिति विदग्धमुखमण्डनं । 'ना अलिके अर' इति छेदः । प्रतिलोमे तु 'रक्ते अलिना' इति छेदः । 'स्त्रियां च क्रीडां मिथो विद्यते न च नालिकेर्य्य' इत्यमरचन्द्रः । नारिकेले इति च । 'यत्र नगरे 'नारिकेलीघटितघनमूलबंन्धा[1277] विपिन-राजय इव राजवराजय' इति प्रभावतीहरणचम्प्वां विठ्ठलकृष्णभट्टाः । 'नालिकेर इदन्तोऽपि तथा दीर्घद्वितीयवानि 'ति द्विरूपकोषः । मुस्ताब्दः । कसेरु—मुस्ताकृति-र्लोमशो[1278] मधुरो जलकन्दः । पारिभद्र इति । पारिजातः—'पारिभद्रो निम्बतरुर्मन्दारः पारिजातक ' इति भावमिश्रः । "फ र ह द" इति लोके । तिक्तको—निम्बः । 'अरिष्टः पारिभद्रश्च हिङ्गुनिर्यास इत्यपी 'ति भावमिश्रः । देवदारु—देवकाष्ठम् ।

४२८. प्लीहशत्रुरिति । 'शरपुंङ्खः[1279]—प्लीहशत्रुर्नीलवृक्षाभगुल्मक 'इति भावमिश्रः । वनतिक्तो—रोहितः । 'प्लीहशत्रुर्वनतिक्तश्च रोहित ' इति माधवः । पीतदारुरिति । पीतकाष्टं—दारुहरिद्रा । पीता—हरिद्रा । देवदारु—देवकाष्ठम् । [ [ *88 b* ].

४२९. मणिछिद्रेति । मेदाभेदः— महामेदा । ऋषभो—वृषभः । रक्तसार इति । पत्तङ्गं—पद्दरञ्जनं । खदिरो—दन्तधावनः । रक्तचन्दनं—शोणचन्दनं[1280] ।

४३०. वाजीकरीति । वाजिगन्धा—अश्वगन्धा । विदारी—विदारीकन्दः । आमलकी—धात्री । शतपत्रीति । भषं—' महाकुमारी गन्धाढ्या तत्पुष्पं भषमुच्यते ' इति । वरी—शतावरी । सरोरुहं—कमलं ।

४३१. शृङ्गवेरीति । दार्विपत्री—गोजिह्विका । कटुकन्दमार्द्रकं । स्मृतः । सुरतरुरिति । देवदारु—देवकाष्ठं । विकंङ्कतः[1281]—स्रुवतरुः वृक्षकण्टकारिकापर्य्यायः[1282] ।

४३२. सुकुमारेति । रम्भा—कदली 'कदली सुकुमारा च रम्भा भानुफला मते 'ति धन्वन्तरिः । मनोज्ञा—वन्ध्याकर्कोटकी । 'वन्ध्याकर्कोटकी देवी मनोज्ञा सुकुमारिके 'ति धन्वन्तरिः । शुकप्रियः—शिरीषः । पुण्ड्राभिधानेक्षुः—इक्षुश्रेष्ठः "पौण्ड्रा" इति प्रसिद्धः । सीसकं—नागाभिधानं । सिक्थं—मयणं ।

४३३. सुप्रसरेति । प्रसारिणी—सरणी । हरिता—दूर्वाः । सूचिपत्रेति । केतकी—करपत्रपत्रा । शितिवारकः—क्षेत्रभूपः । [ *89 a* ].

---

१२७५. ०मेपेति. १२७६. बतायुः. १२७७. बंधा. १२७८. लोमसो. १२७९. ०पुंषाः. १२८०. चंदन. १२८१. वृकंक०. १२८२. पर्य्या०.

४३४. रपं । तमालपत्रमिति । पिच्छेपत्रं[1283]–'कालस्कन्धस्तमालःस्यात्तालपिच्छोपी' त्यमरः । श्रीमान्–तिलकः । पत्रकं–त्रिगन्धान्तःपाति तच्च नागकेसरपत्राणी'ति । 'तमालपत्रकं पत्रं तामसं वस्त्रमंशुक'मिति केयदेवः । 'तमालपत्रकं पत्रं तमालच्छदनं दल'मिति [1284]धर्मिष्ठः । तालीसपत्रमिति । भूम्यामलकी–भूधात्री । 'तालीसपत्रं तालीस'मिति हृदयदीपकः ।

४३५. स्याद्राजबदरमिति । रक्तामलकं–'प्राचीनामलकं प्राची नागरी चापि रक्तक'मिति । लवणं–पटु । सर्वतोभद्र–इति । निम्बः–पिचुमन्दः । मुदी–कोश्मेरी[1285] । 'श्रीपर्णी सर्वतोभद्रा काश्मीरी काश्मरी मुदी'ति केयदेवः ।

४३६. रपट् । रसायनवरेति । धात्री–आमलकी । जीवन्ती–स्वर्णनालिका । त्रिफला–[1286]फलश्रेष्ठा । 'फलोत्तमा फलश्रेष्ठा त्रिफला च फलत्रयं । वरा रसायनवरा शिवाधात्रीविभीतकैः । लवङ्गमालतीसस्यकमुकैस्त्रिफला क्वचित् । द्राक्षापरूषकाश्मर्य-फलैः क्वापि फलोत्तमे'ति [1287]केयदेवः । 'त्रिफला तृफलापि चे'ति द्विरूपकोषः[1288] । 'त्रिफलाशब्दसमानार्थस्तृफलाशब्द' इति द्विगोरिति सूत्रे रक्षितः । पुनर्नवा–शटी । काकमाची–काका । पयो जलं । सर्पिर्घृतं । रान्ताः । [ 89 b ].

४३७. लद्विः । अम्लीति । चाङ्गेरिका–अम्लपत्रिका । 'क्षुद्रा तु चाङ्गेरी क्षुद्राम्ला चाम्ललोणिके'ति हारावली । अम्लिकी–वृक्षफला[1289] । अम्लवेतसः–वरवेतसः ।

४३८. काल–इति । कोसंमर्दः–शाकः । सूषाभेदः । "कसौन्दी"ति ख्यातः । मोघा–पाटला । त्रिवृत्–श्यामा । दोला–नीलिनी । मञ्जिष्ठा–विकसा । कृष्णजीरकः–उपकुञ्चिका । गाङ्गेरुकी–नागबला । कदली–रम्भा । कुलीति ।

४३९. उद्दालको–वनकोद्रवः । कण्टकारी–'कुली क्षुद्रा निदिग्धिके'ति [1291]केयदेवः । ढण्ढणो–वृकधूमकः । 'वारिपर्णी तोयवृक्षो हठो पानीयपृष्ठजो[1292] । कुली कुम्भी तोयकुम्भा ढण्ढणे वृकधूमक' इति [1291]केयदेवः । बदरीभित्–कोली । कोलीति । कोलिश्चेति । कर्कन्धुर्बदरी । तत्फले–तयोः फले ।

---

१२८३. छ for च्छ. १२८४. धर्मिष्टः. १२८५. कास्मरि. १२८६. श्रेष्टा. १२८७. कय०. १२८८. द्विरूप०. १२८९. वृक्ष०. १२९०. का।र०. १२९१. कय० १२९२. पातीय.

४४० कङ्कोलकं—उत्पलं। पिप्पली—कणा। चव्यं—चविका। चल इति। तुरुष्कः—शिलारसः। चाम्पेयः—सुरभिः। 'चाम्पेयश्चम्पको रम्यः शीतलः सुरभिश्चल' इति[1293] केयदेवः। 'चलो रम्यतुरुष्कयो'रिति लोचनः। [90 a].[1293] जलमिति। वालकं—ह्रीवेरं। नीरमुदकं। 'जलं नीरह्रीवेरे' इति विश्वः।

४४१. जालीति। घोषकः—कटुकोषातकी। 'ज्योत्स्ना जाली स घोषक'इति केयदेवः। 'जालं—वृन्दगवाक्षयोः। क्षारकाऽऽनायदम्भेषु नीपे ना स्त्री तु घोषके' इति रभसः। नीपः—कदम्बः। 'जालो नीपद्रुमे जाली कोशातक्यामुदाहृते'ति विश्वः। ताल—इति। [1294]तालो—लेख्यपत्रः प्रसिद्धः। 'तृणराजो दीर्घतरुर्लेख्यपत्रो द्रुमेश्वर' इति नाममाला। 'तृणराजाह्वयस्ताल' इत्यमरः। ताली इति च। 'तालीवनेषु निभृतस्थितकर्णताला' इति। तामलकी—'बदरफलके'ति जेज्झटः। चन्द्रनन्दनस्तु 'अज्जटा [1295]बहुपत्रा च भूधात्री तामलक्यपी'ति तन्त्रान्तरवचनेनबलेन भूधात्रीति तस्याः पर्यायं दर्शयति। अन्ये तु तामलकी अनेनैव नाम्ना प्रसिद्धे त्याहुः। नटमण्डनं—हरितालं। 'हरितालमलं तालं वर्णकं नटमण्डन'मिति माधवः। 'तालं तु हरितालक' इति विश्वः। [90 b].

४४२. तूल—इति। पिचुः—कर्पासः। '[1296]ब्रह्मतरौ पिचौ तूल'मिति त्रिकाण्डशेषः। 'पुल्लिङ्गस्तु पिचौ तूलः क्लीबं स्याद्ब्रह्मदारुणी'ति रुद्रः। ब्रह्मदारु—ब्रह्मकाष्ठं। "तू त" इति लोके। तैलमिति। कल्कः—सिल्हकः। तिलस्नेहः—प्रसिद्धः। नल—इति। पोटगलः—नडः।

४४३. नालिनं—कमलं। नटी—कपोतचरणा। कुनटी—मनःशिला। नालमिति। नाला इति। पद्मदण्डः—कमलदण्डः। [1297]शौकिकलम्बकः—'कलम्बो नालिकाकारः सुषिरो बहुतोयजः'। नाडिका तस्मादल्पा सुषिरा च।

४४४. फलमिति। जातीफलं—[1298]जातिकोषः। 'फलं लाभे जातिकोषे बाणाग्रे फलकेऽपि चे'ति रुद्रः। पूगमुद्वेगं। मदनं—[1299]मदनफलं। फलत्रिकं—त्रिफला। कक्कोलं—कङ्कोलीफलं। गन्धफली—प्रियङ्गुः। चम्पककोरकः—चम्पककलिका।

---

१२९३. 'ल इति कयदेवः चलो रम्यतुरुष्कयोरिति लोचनः'—This is repeated. १२९४. ततो. १२९५. व for ब. १२९६. ३याद्ब्रह्म०. १२९७. बलंबकः. १२९८. फलं ला फलं लाभे जातिति कोषे....... १२९९. मदनं.

४४५. [१३००]कृष्णः—[१३०१]करमर्दः । 'करमर्दश्च कृष्णश्च फलः पाकश्च स स्मृत' इति सिंहः । वल—इति । गन्धरसो—वोलः । वात्यालकः—शीतकुम्भिका । वल्ल—इति । शिम्बिधान्यभेदः—'निष्पाचो वल्लको मत' इति केयदेवः । दीप्योऽजमोदा । धीरा—शतपत्रीभेदः कुब्जकाख्यः । 'कुब्जकः कुञ्जली वल्ली कुमारी कर्णिका परे'ति केयदेवः । 'वल्ली तु वल्लीः सरिणे'इति वाचस्पतिः । [ 91 a ].

४४६. वाल—इति । आचमनं—वालकं । 'ह्रीवेरं वालकं वारि वज्रमाचमनं कच'मिति केयदेवः । यूथी—बालपुष्पा । वालैला—त्रुटिः । भल्लीति । भल्लातकोऽरुष्करः । अरलुर्भल्लूकः । शाल—इति । अक्षिपीलुको—द्रेष्का । 'रोमको रम्यको द्रेष्का शाकः शालोऽक्षिपीलुक' इति निघण्टुः ।

४४७. [१३०२]सर्जकोऽश्वकर्णकः । 'साले तु सर्जकार्श्यश्वकर्णकाः [१३०३]सस्यसंवर' इत्यमरः । 'शालपर्णीत्यत्र तालव्यशोऽपीत्येके' इति रामाश्रमाः । 'शालो हालनृपे मत्स्यप्रभेदे सर्जपादपे । शालागृहे तरुस्कन्धशाखागारैकदेशयो'रिति विश्वः । चारो—मुनिप्रियः । शालुरिति । कषायद्रव्यं—कषायरसयुक्तद्रव्यं । चोरो—निशाचरः । शिलेति । मनःशिला—कुनटी । शिलाजतु—शिलाधातुः । गैरिकं—गिरिजं ।

४४८. शैलमिति । तार्क्ष्यं—तार्क्ष्यशैलं । [१३०४]शैलेयं—शिलापुष्पं । 'शैलेयन-द्रेषु शिलातलेऽपि'ति कुमारः । वरुणो—भ्रमरबन्धुः । सर्जश्चीटा । 'सालो वरुणसर्जयो'रिति दन्त्यादौ रभसः । 'सालकाननशोभीनी'ति दण्डी । लत्रिः । अनल इति । [१३०५]अरुष्करः—भल्लातः । [१३०६]चित्रोऽग्निकः । [ 91 b ]. उद्दाल इति । [१३०७]वनकोद्रवः—वनकोरदूषः ।

४४९. 'व्रीहिभेदः—वनकोद्रवाकारतण्डुल' इति सिद्धमन्त्रप्रकाशः । 'वर-कोद्दालको जालचीनशारददर्दुरा' इति वाग्भटश्च । कोविदारः—काञ्चनारः । मधुभेदः—[१३०८]उद्दालकृतं मधु । उत्पलमिति । पुष्करं—पुष्करमूलं । कुष्ठं—पारिभाव्यं । कमलमिति । जलजमब्जं । जलं—पानीयं । 'कमलान्तरसंलीनमीनहंसां सघट्टने'रिति सद्ग्रहः ।

४५०. ताम्रं—सर्वधातुः । कपिल इति । चित्रोऽग्निकः । कौन्ती—रेणुका । शिंशिपा—मण्डलपत्रका । कदलेति । कदली च । पृश्नी—वारिपर्णी कुम्भी हठ इति समानार्थाः ।

---

१३००. कृष्ण०. १३०१. मर्द्दः. १३०२. सर्ज्ज०. १३०३. सस्यंसर. १३०४. शेलेयं. १३०५. अरुष्कर. १३०६. ०म्रिक. १३०७. वनकोद्र्वः. १३०८. उद्दालाकृतं.

४५१. काष्ठीलिका—अरण्यरम्भा । 'कदलश्चकदल्यसावि 'ति व्याडिः । शाल्मलीभूरुहः—चिरायुः । करालेति । कालमाला—कुठेरकः । सर्जरसश्चीटा ।

४५२. रोध्रः—शाबरः । कट्फल इति । सोमवल्कलः—द्रवन्ती । कृष्णवृन्ता—पाटला । कन्दल इति । अभिनवोद्भित्—नवाङ्कुरः । 'कन्दलः[1309] कलहे युद्धे नवाङ्कुरकपालयो'-रिति लोचनः । 'मया दृष्टः पाणिर्ललितलवलीकन्दलनिभ ' इति भवभूतिः ।

४५३. रम्भा—कदली । 'ध्वजांशुकैस्तर्जित[1310]कन्दलीदल ' इति माघः । भूमिकन्दली—'द्रोणपर्णी स्निग्धकन्दा कन्दली भूमिकन्दली 'ति शब्दार्णवः । कदली श्वेतश्लक्ष्णबहुपुटः कन्दविशेषः । " स र्प छ त्र क " इति लोके—डल्लणः । [92 a]. काकोल इति । विषं—क्ष्वेडः । काणा—वीरा । कीलालमिति । कुङ्कुमं—धीरं । वालकं—वारि ।

४५४. कुवलमिति । उत्पलं—कमलं । मुक्ताफलं—मौक्तिकं । कुवली—कर्कन्धूः । 'बदरा कुवली च कर्कन्धू 'रिति हलायुधः । कुण्डलीति । आरग्वधः—सम्पाकः । कन्दरोहिणी—गुडूची ।

४५५. कोविदारः—काञ्चनारः । कुटिलेति । देवी—स्पृक्का । जिह्मं—तगरं । ग्रन्थिल इति । गोक्षुरस्त्रिकण्टः[1311] । [1312]बिल्वः—शाण्डिल्यः । करीरो—गूढपत्रः । विकङ्कतः—वृक्षकण्टकारिका ।

४५६. गौरिल—इति । कटुस्नेहः—सर्षप इति । लोहचूर्णमयोरजः । चक्रलेति । गुञ्जा—काकणन्ती । छत्रमुस्तं—मुस्ताभेदः । 'यच्छत्रमुस्तकं[1313] तत्र चूडाला चक्रलोच्चटा ' इति सिंहः । चपल इति । सूतः—पारदः । 'रसेन्द्रः पारदः सूतः परतश्चपलोऽपि चे 'ति धर्मिष्ठः । सिल्हकः—शिलारसः ।

४५७. [1314]शौण्डी—पिप्पली । चूडालेति । गुञ्जा—रक्तिका । छत्रमुस्तकं[1315]—मुस्ताभेदः । जगल इति । पिष्टमद्यं—पिष्टकृतं मद्यं । मेदको—जगलादधःस्थो मद्यावयवः । 'एवं वक्तसमेदकजगलाः कादम्बरीप्रसन्ने च । शुष्कसमार्द्रा सान्द्रा समद्रवा क्रमोर्ध्वङ्गा' मद्यो समोऽत्र पूर्वोत्तरावस्थासाधारणः । मदनद्रुमो—राठः । [92 b].

---

१३०९. कदंलः. १३१०. स्तर्जित०. १३११. त्रिकटः. १३१२. बिल्व. १३१३. यछत्र०. १३१४. शौडी. १३१५. मुस्तंक.

४५८. जटिलेति । उग्रा—वचा । नलदमुशीरं । जम्भल इति । दन्तहर्षणो—[१३१६]जम्बीरः । [१३१७]अर्को—रूषिका । ज[१३१६]म्बूल इति । श्यामपत्रः—[१३१६]जम्बुविटपः । हलीमकं—क्रकचच्छदः । ‘ [१३१६]जम्बूलो [१३१६]जम्बुविटपे [१३१६]जम्बूलः क्रक[१३१८]चच्छदे ’ इति **लोचनः** ।

४५९. तरल इति । धत्तूरः—कनकाह्वयः । यवागूः—परिसिक्था । सुरा—मद्यं । तमाल इति । तिलकः—श्रीमान् । कालस्क[१३१८]न्धस्तापिच्छः । वरुणद्रुमः—सेतुवृक्षः ।

४६०. तण्डुल इति । धान्यनिकरः—धान्यसमूहः । वेल्लं—विडङ्गं । ‘ तण्डुलश्च-क्रिमिघ्नश्चे ’त्यमरः । ‘ क्रिमिघ्नं तण्डुलं मोघे ’ति **वाचस्पतिः** । ताम्बुलीति । नागवल्ली—प्रसिद्धा । क्रमुकीफलमुद्वेगः ।

४६१. नकुलीति । कुक्कुटी—वल्लीकन्दः स च व्याख्यातः । मांसी—जटामांसी । नाकुलीति । रास्नाभित्—‘ नाकुली सर्पगन्धा च सुवहा भोगिगन्धिका । [१३१९]सर्पाक्षी नकुलेष्टा चे ’ति **नामगुणमाला** । “ ना इ ” इति श्लोके । कुक्कुटीकन्दो—व्याख्यातः । चव्यं—चविका । अक्षपीडकः—शङ्खिनी ।

४६२. निचुल इति । स्थलवेतसः स्पष्टं । ‘ वानीरे कपिभेदे स्यान्निचुलः स्थलवेतसे ’ इति **शब्दार्णवः** । अम्बुवेतसो—हिज्जलः । ‘ निचुलो हिज्जलाम्बुज ’ इ[१३२०]त्यमरः । [ 93 *a* ]. नेपाल इति । इक्षुभेदो—अनेनैव नाम्ना ख्यातः । ‘ शतपर्वक-कान्तारनेपाला[१३२१]द्यास्ततः क्रमादि ’ति **वाग्भटः** । सुवहा—रास्ना ।

४६३. शिला—कुनटी । ‘ नेपाली कुनटी गोला शिला दिव्यौषधिः स्मृते ’ति **निघण्टुः** । मनोज्ञा—शिग्रुगन्धि[१३२२]का नेपाली चे ’ति [१३२३]**कैयदेवः** । पल्लमिति । कर्दमो—जम्बालः । पलमामिषं । तिलपिष्टं—तिलकल्कः । प्रवाल इति । किसलं—किसलयं । ‘ नवे तस्मिन् किसलयं पल्लवं स्मृत ’मिति **हैमः** । ‘ अथ पल्लवः किशलं किसलं चे ’ति **त्रिकाण्डशेषः** । ‘ पल्लवोऽस्त्री किसलय ’मित्यमरः । ‘ किसलयैः सलयैरि ’ति **रघुयमकाद्यन्तमध्यः** । ‘ प्रवालोऽस्त्री विद्रुमे नवपल्लव ’इति **लोचनः** । विद्रुमद्रुमो—प्रावल्लरी ।

४६४. पाटलेति । ‘ पाटलिः पाटला मोघे ’त्यमरः । ‘ [१३२४]अस्याः पाटलायाः पुष्पे वाच्ये त्रिषु त्रिलिङ्गः । ‘ पुष्पे क्लीबेऽपि पाटले ’त्यमरः । ‘ अपि शब्दात्स्त्रीत्वं

---

१३१६. ब for व. १३१७. अक्कीं. १३१८. च्छ for छ. १३१९. सर्पा०
१३२०. रित्य०. १३२१. नेपालाद्यस्ततः. १३२२. शिग्रुगंधिकाः. १३२३. कय०.
१३२४. अस्योः.

चे 'ति **रामाश्रमाः** । 'पाटलः कुसुमे वर्णेऽप्याशुव्रीहिश्च पाटल ' इति **शाश्वतात्पु-**
लिङ्गश्च । पाटलायां पाटलीत्यपि । आशुव्रीहिः—आशुपाकी व्रीहिः । 'आशुव्रीहौ पाटलो ना श्वेतरक्तेऽन्यलिङ्गवानि'ति **रुद्रः** ।

४६५. पिप्पल इति । केशवावासश्चलदलः । सर्वतोमुखं—जलं । 'पुष्करं सर्वतोमुख 'मित्य**मरः** । उपकुल्या—कणा । [93 *a*]. पिचुल इति । इज्जलो—जलवेतसः । 'पिचुलो झाबुके पुंसि निचुले जलवायस ' इति **लोचनः** । तेन तवर्गपञ्चमादिरपीति सिद्धं । 'वानीरः कपिभेदः स्यान्निचुलः स्थलवेतस ' इति **शब्दार्णवः** । 'स्थानादस्मात्सरसनिचुलादुत्पतोदङ्[1325]मुखः ख 'मित्यभियुक्तप्रयोगाच्च ।

४६६. पिच्छिल इति । द्विजकुत्सितः—श्लेष्मान्तकः । तूलिनी—शाल्मली । कृष्णसारा—शिंशपा । पोतिका—[1326]उपोदिका ।

४६७. भव्यं—कर्मरङ्गफलं । पिङ्गलेति । [1327]रुचिः—रोचना । पत्रकं—तमालपत्रं । पित्तलेति । तोयपिप्पली—जलपिप्पली । आरकूटं—[1328]रीतिः । 'पादेन रसके[1329]नाढ्यं [1330]तत्सत्त्वेनाथ वा युतं अन्तर्धूमं द्रुतं शुल्वं पित्तलं स्वर्णसंनिभ'मिति ।

४६८. अरिष्टो—रक्षाबीजः । बदरीफलं—कोलं । मदनः—मदनफलं । बहुलेति । एला—द्राविडी । 'सूक्ष्मैला द्राविडी तुत्था गौराङ्गी बहुला त्रुटि 'रिति **धन्वन्तरिः** । नीलिनी—नीली । महिलेति ।

४६९. गुन्द्रा—प्रियङ्गुः । भस्मगन्धिनी—रेणुका । मातुल इति । कनकाह्वयो—धत्तूरः । राठः--मदनफलं । भङ्गा—विजया । 'मातुलो मदनद्रुमे धत्तूरे व्रीहिभेदेऽपि मातुल ' इति **विश्वः** । [94 *a*].

४७०. [1331]मुसलीति । तालमूली—हिरण्यपुष्पी । आखुपर्णी—द्रवन्ती । सितकङ्गुः—[1332]रामठी । "का गु नी "ति लोके । दन्त्यमध्यः । मुस खण्डने । मूर्धन्यमध्योप्ययमिति [1333]वर्णादेशानां मुस खण्डन इति धातोर्दन्त्यान्तेषु च **बोपदेवात्रेया**दिभिः पठितत्वात्। [1334]**उज्ज्वलदत्तादयस्तु** तालव्यमध्यमप्याहुः । अत एव '[1335]मुसलो मुशलोऽपि चे 'ति द्विरूपेषु**विश्वः** । मृणालमिति । नलदमुशीरं । [1336]बिसं-मृणालं ।

---

१३२५. दुत्पलो. १३२६. उपोदको—धन्वन्तरिः–p. 353. १३२७. रुची—Vide धन्वन्तरिः for correction—p. 98. १३२८. रीति. १३२९. नाद्यं. १३३०. सत्वे०. १३३१. मुलसी. In the text मुशलो. १३३२. शमठी. १३३३. वर्णदेशना. १३३४. उज्वल०, १३३५. मुशलो. १३३६. बिस.

४७१. रसालेति। सुरसा—[1337]शिखरिणी। तल्लक्षणं[1338] तु—'अर्धाढकं[1339] त्वचिर[1340]पर्युषितं च दध्नः खण्डस्य षोडशपलानि शशिप्रभस्य। सर्पिः पलं मधुपलं मरिचं द्विकर्षं। शुण्ठ्या पैठोर्धमपि [1339]चोर्धपलं चतुर्णां श्लक्ष्णे पटे ललनया मृदुपाणिघृष्टा। कर्पूरवाससुरभीकृतभाण्डसंस्था। एषा वृकोदरकृता सुरसा[1341] रसाला। या स्वादिता भगवता पुरुषोत्तमेन'। दूर्वा—हरिताली। विदारी—विदारीकन्दः। गोस्तनी—द्राक्षा। सिल्हकः—शिलारसः। बोलो—गन्धरसः। पौण्ड्र—इक्षुश्रेष्ठः। चूत—आम्रः। 'रसाला [1342]स्वर्जिकायां स्याज्जिह्वादूर्वाविदारिषु। रसालं सिल्हके बोले रसाले चेक्षु[1343]चूतयोरि'ति विश्वः। [94 b].

४७२. लाङ्गलीति। लाङ्गलं च। चोचं—नालिकेरः। पृष्ठिपर्णी—'शृगालविन्नाङ्घ्रिप्रबला[1344] लाङ्गली पर्णिका मता। पृष्ठिपर्णी चे'ति [1345]केयदेवः। कञ्चटं—जलपिप्पली। विशल्या—कलिकारी। वल्कलेति। गुडत्वक्—भृङ्गं।

४७३. तेजोवती—तेजिनी। तेजोवल्कलिकेति समानार्थाः। वञ्जुल इति। तिनिशः—स्यन्दनः[1346]। अशोको—वीतशोकः। 'वेतसो—नम्रकः प्रोक्तो वानीरो वञ्जुलस्तथे'ति। 'वञ्जुलो वेतसाशोकतिनिशेष्वि'ति विश्वः। विमलेति। सातला—सेहुण्डः। पद्मकाष्ठं—पद्मवर्णं।

४७४. विदुल इति। अम्लवेतसः—वेतसाम्लः। वेतसो—नम्रकः। 'विदुलस्तु भवेदम्लवेतसे वेतसेऽपि चे'ति शाश्वतः। श्यामल इति। चलदलः—पिप्पलः। लवलीफलं—राजबदरं। [1347]'बोधिद्रौ राजबदरे श्यामलः कथ्यते बुधै'रिति रभसः।

४७५. शाल्मलीति। रक्तपुष्पा—मोचा। तदास्रावो—मोचरसः। 'मोचा तद्रसयो [95 a]श्चापि शाल्मली शाल्मलः क्रमादि'ति सिंहः। शीतलमिति। पुष्पकासीसं—भूमिजो धातुः। कर्पूरं—हिमं। मलयोद्भवं—चन्दनं।

४७६. शैलजं—पलितं। हेमपुष्पश्चम्पकः। मरिचपत्रकः—शालः। [1348]सर्जः—[1348]सर्जरसः। कान्तो—'मरिचपत्रकः। शक्रद्रु[1349] रसनिर्यासः श्रीकरः शीतलस्तथे[1350]'ति [1351]केयदेवः। 'कासीसमेदे चन्द्राह्वे चन्दने पलिते तथा। शालचम्पकयोश्चापि

१३३७. शिष०. १३३८. तल्लणं. १३३९. अर्द्धा०. १३४०. पर्य्युं०. १३४१. सुरता. १३४२. स्वर्ज्जि०. १३४३. श्चेक्षु. १३४४. घृतिला. १३४५. कय०. १३४६. स्यंदन्. १३४७. बोधिद्रो. १३४८. सर्ज्जे. १३४९. शक्रद्रु. १३५०. स्तथैति. १३५१. कय०.

न द्वयोः पुंसि च क्रमादि 'ति लोचनः। श्रीफलीति। नीलिका—रञ्जनी। 'तुल्या श्रीफलिकामेला सारवाही च रञ्जनी 'ति राजनिघण्टुः। धात्री—आमलकी। [1352]बिल्वं—शैलूषः। चिक्कणः—पूगः। 'श्रीफली नीलिकाधात्र्योर्मालूरे श्रीफलः स्मृत ' इति विश्वः। 'श्रीफली क्रमुकः पूगश्चि[1353]क्कणः खपुरस्तथे 'ति नाममाला।

४७७. शीवलमिति। शीवालः—शैवलः। शैलेयं—शिलापुष्पं। 'शीवलाख्या च शैवाले[1354] शैले येऽपि च शीवल 'मिति विश्वः। [95 b]. शैवलमिति। शैवालः—शीवलं। पद्मकाष्ठं—पद्मवर्णं।

४७८. सरल इति। पूतिकाष्ठं—देवदारु। त्रिवृद्वित्—कृष्णात्रिवृत्। 'श्यामा-मसूरविदला पालिन्दी सरला तथे 'ति हृदयदीपकः। केचित्सरणेत्याहुः। सातलेति। ग्रैष्मिका—वनमालिका। भूरिफेना—सातला। चूडामणिर्गुञ्जा।

४७९. हिङ्गुल इति। वर्णकद्रव्यं—हंसपाकाख्यं। भण्टाकी—कण्टकारी। लच। अमृणालमिति। उशीरं—नलदं। दीर्घमूलं—वीरणं।

४८०. एकाष्ठीलेति। पापचेली—वनतिक्ता। बुको—बकपुष्पः। 'शिवम-[96 a 1]ल्ली—पाशुपत एकाष्ठीलो वको वसु 'रित्यमरः। 'एकाष्ठीलावनतिक्तौषधौ पुंसि बकपुष्पे ' इति। "व ग डु ल" इति ख्यातोऽर्कभेद इति वृद्धाः। कन्दराल-इति। गर्दभा[1355]ण्डेः—सुपार्श्वकः। [1355]'गर्दभाण्डे कन्दरालकपीतनसुपार्श्वका ' इत्यमरः। प्लक्षतरुः—पर्कटी।

४८१. अथ कर्षफल इति। धात्री—आमलकी। विभीतकतरुरक्षवृक्षः। क्षीरवल्लीति। हेमदुग्धा—हेमक्षीरी। विदारी—विदारीकन्दः। क्षीरिणी—दुग्धिका।

४८२. अथ गन्धफलीति। फली—प्रियङ्गुः। 'प्रियङ्गुः फलिनी फली '। चम्पककोरकः—चम्पककलिका। 'कोरकजालककलिकाकुड्मलमुकुलानि तुल्यानी'ति हलायुधः। 'प्रियङ्गौ स्त्री गन्धफली चम्पकस्य च कोरक ' इति रुद्रः। [96 b 1]. गन्धमूलेति। पद्मनाडी—पुष्करपर्णी। सुरभी—रास्ना। द्राविडः—कर्चूरः।

४८३. ताम्रमूलेति। दुरालम्भा—दुरालभा। समङ्गा—मञ्जिष्ठा। अञ्जलिकारिका—लज्जालुः। तोयवल्लीति। अम्बुसुषवी—'पलाशिका वृक्षवल्ली तोयवल्ल्यफलापि च। कारवल्ली वारवेल्ली सुषवी सुकुमारिके 'ति [1356]केयदेवः। लाङ्गलिकी—जलपिप्पली।

१३५२. विल्वं. १३५३. पूगचिक्कण. १३५४. शैवालेये॰. १३५५. गर्द॰. १३५६. कय॰.

४८४. स्थिरा—शालिपर्णी । गोपी—सारिवा । वेल्लन्तरो—वीरतरः । उशीरभिदित्येके । शरो—[1357]बाणः ।

४८५. प्रचीवल—[ 96 a 2 ] इति । अम्बुपिप्पली—जलपिप्पली । काकाह्वा—काकजङ्घा । गण्डदूर्वा—गण्डिनी । अथ पुष्पफलेति । नीली—नीलिनी । तालस्तलः । कपित्थो— दधित्थः । अमरमालायां ' पवर्गतृतीयमध्योऽपी 'ति रामाश्रमाः ।

४८६. कूष्माण्डः—कुसुमफलं । पोटगल इति । काशश्चामरपुष्पः । नलो—नडः । अथो बहुफल इति । नीपो—धूलीकदम्बः । मलयू—[1358]काष्ठोदुम्बरिका । योपधोपि ( ? ) ।

४८७. काकमाची—काकाह्वा । कटुकाफलं—कङ्कोलं । ' भवेद्बहुफला भिक्षा मलैयूनीपवृक्षयो 'रिति विश्वः । [ 96 b2 ]. महाबलमिति । सीसकं—नागं । भारद्वाजीति । महासहा ।

४८८. महाफलेति—कूष्माण्डी—पुष्पफलछता । चोचं—नालिकेरफलं । बिल्वं—श्रीफलः । मुक्ताफलमिति । कर्पूरं—हिमवा[1360]लुका । मौक्तिकं—मुक्ताफलं । लवलीफलं—श्यामलं ।

४८९. यवफल इति । मांसिका—जटामांसी । कुटजं—इन्द्रवृक्षः । त्वचिसारो—वंशः । अथ रक्तफलेति । [1361]बिम्बी—तुण्डिकेरी । वटः—बहुपाद् ।

४९०. वृश्चिकालीति । मेषशृङ्गी—अजशृङ्गी । ' अजशृङ्गी मेषशृङ्गी [1362]सर्पदंष्ट्रा च [1363]वार्तिका । द्वितीया दक्षिणावर्ता वृश्चिकाली विषाणिके 'ति धन्वन्तरिः । वर्षाभूभित्—पुनर्नवाभेदः । समष्ठिल इति । तोयमार्गो—जलमयूरकः । गण्डीरो—गण्डदूर्वा ।

४९१. सदाफल इति । मालूरो—बिल्वः । ' मालूरः श्रीफलो बिल्व ' इति हलायुधः । ज[1364]न्तुमत्फल—उदुम्बरः । ' उदुम्बरे गन्धफले नालिकेरे सदाफल ' इति लोचनः । सोमवल्लीति । अमृता—गुडूची । ब्राह्मी—स्मारिणी । चक्राङ्गी—कटुका । वाकुची—सोमराजी । ' सोमवल्ली गुडूच्यां स्यात्कट्व्यावल्गुजयोरपि । मेध्यायामपी 'त्यजयः । [ 97 a ].

---

१३५७. बाणः । १३५८. The real word seems to be काकोदुम्बरिका according to Dhanvantari—p. 187. १३५९. मलयू . १३६०. वालुका. १३६१. बिंबी. १३६२. सर्प्प. १३६३. वार्त्तिका. For the corrected reading see धन्वन्तरिः p. 23. १३६४. ०जं०.

४९२. अथ [१३६५]सौवर्चलमिति । [१३६६]स्वर्जिक्षारः–सर्जिकाक्षारः । लवणान्तरं–सुगन्धिलवणं । हरितालीति । दूर्वा–हरिता । काशो–दीर्घपत्रः । तालं–नटमण्डनं ।

४९३. लपं । अङ्गारवल्लीति । शार्ङ्गष्ठावल्ली–करञ्जः । भार्गी–[१३६७]वर्धकः । 'अङ्गारवल्ली बालेयशाकबर्बरवर्धका 'इत्यमरः । गर्द[१३६८]भशाकोप्यत्रैव । "ब्र ह्म ने ठी"ति लोकख्याता । ज्वालामुखी–अग्निज्वाला । " अ गि या " इति लोके । जवनेफलेति । मलयू:–[१३६९]कोष्ठोडुम्बरिका । [१३७०]पनसः–कण्टकिफलः । 'श्लेष्मान्तकसदकूपत्रःस्यात्कण्टकिफलस्तथा । पनसश्चाशयफल ' इति केयदेवः ।

४९४. लपट् । कृष्णपाकफल इति । करमर्दकः–[१३७१]कृष्णः । तुम्ब्यलाबूः । खर्जूरी–दुरारोहा । वाकुची–सोमराजी ।

४९५. रसाय[१३७२]नफलेति । धात्री–आमलकी । माचिका–काकमाची । अरुष्करो–भल्लातः । लान्ताः । [१३७३]वेद्विः । क्षव इति । छिका–क्षुत्करी । राजिका–आसुरी । जीव इति । मधुरप्रियो–जीवदः ।

४९६. महानिम्बो–द्रेष्का । जीवन्ती–जीवनीया । वचा–[१३७४]हैमवती । दार्वीति । दारुहरिद्रा–पचम्पचा । गोजिह्वा–धेनुजिह्विका । 'भूलग्ना [१३७५]क्षीरिणी [१३७६]दीर्घक्षुद्रारिदलिनी सुवंचकवत् पीत 'मिति [97 b].

४९७. देवीति । कुमारिका–सहा । स्पृक्का–कुटिला । जयन्ती–बलामोटा । तेजिनी–तेजोह्वा । विद्धकर्णी–कुचेलिका । 'एकैषी त्रिसरा देवी विद्धकर्णी कुचेलिके'ति **धर्मिष्ठः** । पीलुपर्णी–मूर्वा । '[१३७७]मूर्वा देवी मधुरसा मोरटा तेजिनी स्रुवा । मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपी '**त्यमरः** । वन्ध्याकर्कोटकी–मनोज्ञा ।

४९८. धव इति । भरोद्वहः–शकटाक्षः । [१३७८]धूर्तः–कनकाह्वयः । ध्रुव इति । शङ्खः–कम्बुः । वटः–[१३७९]बहुपाद् । मूर्वा–मधुरसा । शालिपर्णी–स्थिरा । प्लव इति । प्लक्षः–[१३८०]गर्दभाण्डः । शिलारसस्तु[१३८१]रुष्कः ।

---

१३६५. सौवर्च्चल. १३६६. स्वर्जिज०. १३६७. वर्द्ध० १३६८. गर्द्दभ. १३६९. काष्ठोंडुंबरिका. १३७०. पनस. १३७१. It ought to be कृष्णपाकफलः See धन्वन्तरीयनिघण्टु p. 190. १३७२. ०फलति. १३७३. वद्रि. १३७४. हैम०. १३७५. क्षीरणी. १३७६. This whole line is not intelligible. १३७७. मूर्व्वा. १३७८. धूर्त्तः. १३७९. बहु०. १३८०. गर्द्द०. १३८१. स्तुरुष्का.

४९९. विकङ्कतः–स्रुवतरुः । वृक्षाम्लं–तिन्तिडीकं । भेलो–भल्लातकः । कुलकं–पटोलं । कैवर्तीमुस्तकं–' प्लवगोपुरगोनर्दकैवर्तीमुस्तकानि च । इयं वितुन्नक-नाम्नो वृक्षत्वक् मुस्ताकृति 'रिति **भावमिश्रः** । गन्धतृणं–रामकर्पूराख्यं ।

५००. मृद्वीति । द्राक्षा–हारहूरा अतिप्रषा शुक्लकन्दा । यव इति । अश्वप्रियो–यवान्नं । इन्द्रज–इन्द्रयवः । लट्वेति । अलक्तं–[1382]वर्बरञ्जनं । करञ्जः–करजः । विश्वेति । नागरं–शुण्ठी ।

५०१. गन्धरसो–बोलः । उपविषा–अतिविषा । शङ्खाह्वा–चोरपुष्पी । ' शङ्खिनी नाकुली विश्वा चोरपुष्पी सुकेशिनी 'ति **केयदेवः** । [ 98 *a* ]. शिव इति। पुरो–गुग्गुलुः । पुण्डरीकं–कमलं । [1383]वंकुलो–मद्यदोहदः । ' शिबिः–सिंहो गूढपुष्पः कृष्णत्वक् मुकुरः शिव ' इति **धर्मिष्ठः** । सैन्धवं–माणिमन्थं ।

५०२. कुम्भी–भद्रवती । ' महाकुम्भी च कुम्भीका भद्रा भद्रवती शिवे 'ति **भावमिश्रः** । अभया–हरीतकी । धात्री–आमलकी । भूधात्री–भूम्यामलकी । शमी–सक्तुफला । शिबिरिति । [1384]भूर्जो–लेख्यपत्रः । बकुलो–मद्यदोहदः । स्वाद्वीति । श्रेणी–[1385]खर्जूरी । रसाला–शिखरिणी ।

५०३. अथ स्रुवेति । शल्लकी–गजभक्ष्या । मूर्वा–मधुरसा । मूर्वेति बध्नाति । मौर्वी-बन्धने । अच् दीर्घत्वं टाप् मूर्वाङ्गीषि मूर्वीति न्यासः । धूलीकदम्बो–नीपः । वत्रिः । अक्षीवमिति । अब्धिलवणं–त्रसिरं । 'अक्षीवं वसिरे शिग्रौ नाऽमत्ते पुनरन्य-वदि 'ति **मेदिनी** । ' अक्षीवो वसिरे पुमानि 'ति **लोचनः** । घनच्छदः–शिग्रुः । [1386]शोभाञ्जने–' शिग्रुतीक्ष्णगन्धकाऽक्षीवमोचका ' **इत्यमरः** । ' दीर्घादिरपी 'ति **मुकुटः** ।

५०४. कारवीति । रामठी–त्वक्पत्री । घोषा–मधुरिका । अजमोदा–मोदी[1387] । कृष्णजीरकः–कालाजाजी । कितव इति । चोरको–गुणहासकः ग्रन्थिपर्णकभेदः । धूर्तः–धत्तूरः 'कितवो धत्तूरगणहासयो'रिति **रुद्रः** । [ 98 *b* ]. कैरवमिति । कुमुदं–[1388]कुमुद् । ' सितोत्पलं[1389] [1390]गर्दभकं चन्द्रेष्टं कैरवं कुमुद् । कैमुदं चे 'ति [1391]**केयदेवः** । रात्रिविकासि अम्बुजं–पङ्कजं । ' पङ्केरुहं श्वेतपद्मं सरोजाम्बुज-

---

१३८२. वर्बं०. १३८३. वकुलो. १३८४. भूर्ज्जो०. १३८५. खर्ज्जू०. १३८६. शोभा०. १३८७. मोदाः. १३८८. कुमुत्. १३८९. त्पल०. १३९०. गर्द०. १३९१. कय०.

पङ्कजं । कैरवं चाब्जमम्भोजं नलिनं भद्रकं कुह 'मिति [1391]केयदेवः । तत्र दिन-विकासि । 'घनतरघनछन्दींच्छादिते व्योम्निलोके । सवितुरथ सुधांशोः संकथैव व्यरंसीत् । दिवसरजनिभेदं मन्दवाताः शशंसुः । कमलकुमुदगन्धानाहरन्तः क्रमेणे'ति स्पष्टम् ।

५०५. पद्वीति । सहदेवा—महाबिला । नागबला—गाङ्गेरुकी । माधवीति । कुम्भी—पाटला । नेपाली—वनमाला । अतिमुक्तो—भ्रमरोत्सवः । वीरा—'वीरा दैत्या गन्धकुटी माधवी गन्धमादनी 'ति **त्रिकाण्डशेषः** । [1394]क्षौद्रशर्करा—मधुशर्करा ।

५०६. जरणोऽजाजी । आम्रक्षुतः । अश्वत्थः—कुञ्जराशनः । सिक्थं—मयणं । किंशुकः—पलाशः । शताह्वेति । मधुसंभूतशर्करा—मधुशर्करा । जाती—मालती । पोत्री—वाराहीकन्दः ।

५०७. शङ्खाह्वेति । वचा—हैमवती । कम्बुमालिनी—शङ्खपुष्पी । दधि-श्रीधनं । सारिवेति । गोपकन्या—गोपालिका । शालिभित्—'प्रमोदो गौरसारिवा 'विति **सिद्धमन्त्रप्रकाशः** ।

५०८. सुषवीति । कारवेल्लः—कठिल्लः । जीरकोऽजाजी । कृष्णजीरकः—कालाऽजाजी । 'सुषवी दन्त्यमूर्धन्यवती 'ति **स्वामी** । 'तालव्यमध्ये 'ति **सुभूतिः** । [ 99 a ]. वच । धामार्गव इति । अपामार्गः—खरमञ्जरी । घोषकः—कोशातकी । 'अधोमार्गव ' इति **स्वामी** । 'अधोमार्गवोऽपामार्गः कोशातकी चे 'ति **व्यर्थे धन्वन्तरिः** ।

५०९. मरूद्व इति । कर्पास—आच्छादनफलः । कर्पासो इति च । खादिरो—दन्तधावनः । यवासो—यासः । मधुस्रवेति । धवश्रेणी—मूर्वा । जीवा—जीवन्ती । हंसपदी—हंसपादी रक्तपादी मधुस्रवेति समानार्थाः ।

५१०. मधुयष्टी—क्लीतकं । वारिभव इति । नखो—व्याघ्रनखः । शङ्खो—वारिचरः । शैवलः—शैवालः । शीतशिवमिति । शैलेयः—शिलापुष्पं । सिन्धु—सैन्धवं । मिसिः—शतपुष्पा ।

---

१३९२. छादितें०. १३९३. व for ब. १३९४. शर्क०. १३९५. कंन्या.
१३९६. स्वामिः । १३९७. मार्ग०. १३९८. धावनः. १३९९. व्योघ्र०.

५११. सहदेवीति । [१४००]सर्पाक्षी—पदवी । यज्जटा शिरोबद्धा प्रभावाऽञ्जवरं हन्ति । सहदेवा इति च । 'पदवी सहदेवायां नागबलायाम्' इति **हृदयदीपकः** । सारिवा—गोपी । बलाऽत्र पीतपुष्पिका कङ्कतिका । **अन्ये** बला नीलपुष्पामाहुः । **लोचनस्तु** पुंस्याह । 'सहदेवो बलां दण्डोत्पलयोः । सारिवौषधावि'ति । वपं । वारिसम्भवमिति । अम्भोजं—कमलं । श्रीखण्डं—चन्दनं । शिखरं—भृङ्गारं । "लौं ग" इति लोके । 'भृङ्गारं शिखरं लवं । श्रीपुष्पं वारिजं श्याह्वमि'ति [१४०१]**केयदेवः** । ''पक्वदाडिमसंकाशं माणिक्यं शिखिरं विदु'रिति वा । वान्ताः । [१४०२]शद्विः ।

५१२. कुशमिति । जलमम्बु । दर्भः—कुशः । निशेति । दार्वी—दारुहरिद्रा । हरिद्रा—वरवर्णिनी । 'निशा दारुहरिद्रायां स्यात्त्रियामाहरिद्रयोरि'ति **विश्वः** । [99 b]. पांशुरिति । रजो–[१४०३]धूली । 'सस्यार्थचिरसञ्चितगोमय'मिति स्पष्टं । 'ताल्व्या अपि दन्त्याश्च शम्बशूकरपांशवः कलशः [१४०४]शम्बलं चैव जिह्वायां रशना तथे'ति द्विरूपेषु[१४०५] **विश्वः** । [१४०६]शत्रिः ।

५१३. कपिशेति । अतिमुक्तो—माधवी । क्रिमिपिण्डितः—सिल्हः । कर्कश इति । इक्षुभित्—काष्ठेक्षुः । [१४०७]कांशमर्दः—काशघ्नः । 'काशघ्नः कर्कशो ज्ञेयः सूषान्या कासमर्दिके'ति **केयदेवः** । "क सौं न्दी"ति लोके । कम्पिल्लो—रक्तचूर्णः । पिप्पलश्चलदलः ।

५१४. दुःस्पर्शेति । स्वयंगुप्ता—कपिकच्छूः । कण्टाली—कण्टालिका । यवासो—यासः । पलाश इति । किंशुको—ब्रह्मवृक्षः । शटी—कर्चूरः । भूकेश इति । शीवलः—शैवलः । वटः—बहुपात् ।

५१५. लोमशेति । जटामांसी—भूतजटा । काकजङ्घा—नदीकान्ता । बलाभिदतिबला । आत्मगुप्ता—कपिकच्छूः । हैमवती—वचा । महामेदा—मणिच्छिद्रा । [१४०९]मलीमसं—कासीसं । [१४१०]शान्ताः ।

५१६. षड्भिः । अक्षमिति । 'अक्षं सौवर्चलं स्यात्तुचकमक्षं पाक्यं च तन्मत'मिति **निघण्टुः** । तुत्थममृतासङ्गं[१४११] । रुद्राक्षः—शिवप्रियः । विभीतकः—कर्षफलः । भल्लक्ष इति । '[१४१२]भल्लूकश्टिण्टुकोऽरलु'रिति[१४१३] **केयदेवः** । दीर्घवृन्तस्तन्छेदः । कृतवेधनः—शम्पाकः ।

---

१४००. सर्प्पा०. १४०१. कय०. १४०२. शद्वि. १४०३. धूलीः. १४०४. शंवबलं. १४०५. द्विरूपेषु. १४०६. शत्रि. १४०७. मर्द. १४०८. इति dropped. १४०९. ०मशं. १४१०. शाताः. १४११. संग. १४१२. मल्ल०. १४१३. ष्टिंबुको—on the top of बु the correction of टु is written in a different hand.

५१७. काक्षीति। तुवरिका—सौराष्ट्री। गृष्टिर्वाराहीकन्दः। [100 a]. घोष इति। कोषातकीभित्। 'धामार्गवो घोषक स्या'दित्यमरः। मिसिः—शतपुष्पा। 'घोषा मधुरिका मिसिः'। [1414]कर्कोटी—'कर्कोटी च कदम्बश्च घोषा लोमशपत्रिके'ति [1415]धन्वन्तरिः। तुष इति। धान्यत्वक्—स्पष्टं। अक्षः—कर्षफलं। 'धान्यत्वचि तुषः पुंसि विभीतकतरावपी'ति [1416]मूर्धन्यान्ते रुद्रः।

५१८. प्लक्ष इति। [1417]पर्कटी—जटी। 'प्लक्षो जटी पर्कटी स्या'दित्यमरः। 'विज्ञेया [1417]पर्कटी प्लक्षः प्लक्षः पिप्पलपादप' इति शाश्वतः। "पा क रि" इति लोके। [1418]गर्दभाण्डः—नन्दीवृक्षः। कुञ्जरोशनः—पिप्पलः। विषमिति। जलं—पानीयं। क्ष्वेडोऽमृतं। [1420]मौन्द्री—अतिविषा। वृक्ष इति। श्रीः—सरलद्रवः। 'पापिष्ठो दधिक्षीरघृताह्वय' इति रभसः। 'श्रीर्लक्ष्मीभारतीशोभाप्रभासु सरलद्रव' इति लोचनः। 'वृषः स्याद्वासके धर्मे सौरभेये च शुक्रले' इति रभसः।

५१९. अश्वा—अश्वगन्धा। सिंही—वासकः। शृङ्गी—कर्कटशृङ्गी। लता—ज्योतिष्मती। [1421]गुप्ता—कपिकच्छूः। जया—द्रवन्ती। [1423]चैत्रिः। कुल्माषमिति। काञ्जिकं—अवन्तिसोमं। [1424]अर्धस्विन्नधान्यं—यवादि। यवो—हरिप्रियः। चणो—हरिमन्थः।

५२०. 'पेयूषं च पेयूषोऽभिनवं पय' इति हेमचन्द्रः। 'आसप्ताहा तु पेयूषं ततो मोरटमोरणे' इति वैजयन्ती। अमृतं—सुधा। 'पीयूषममृतं सुधे' त्यमरः। [100 b]. शिरीष इति। मृदुपुष्पो—भण्डीरः। 'शिरीषो मृदुपुष्पश्च भण्डीरः शङ्खिनीफल'मिति धन्वन्तरिः। कृष्णपाककफलः—करमर्दः। 'मकरन्दः [1425]करमर्दः शिरीषो मूर्धपुष्पकं' इति शुभाङ्कः।

५२१. षच। अलम्बुष इति। [1426]छर्दनः—निम्बः। मुण्डरी—मुण्डी। खरत्वक्—'अलम्बुषा खरत्वक् च तथा मेदोगला मते'ति। 'लज्जालुभेद' इति भावमिश्रः। ऋषभाक्षीति। इन्द्रवारुणी—इन्द्राक्षी। मुस्तकं—मुस्ता।

---

१४१४. ककोंटी. It seems to be a variant form of कर्कटी. १४१५. Not found in N. Vaidya's edition. १४१६. मूर्द्ध०. १४१७. पर्क०. १४१८. गर्द०. १४१९. ०शन. १४२०. धन्वन्तरि records आर्द्री and राजनिघण्टुः as चान्द्री. The present Text of S. K. is quite clear so far as this reading is concerned. १४२१. सोमा. १४२२. गुप्त. १४२३. चत्रि. १४२४. अर्द्ध०. १४२५. ०मर्दः. १४२६. छर्दना.

५२२. कालमेषीति। समङ्गा—मञ्जिष्ठा। वाकुची—‘ कालमेषी कृष्णफला वाकुची पूतिफल्यपी ’त्यमरः। त्रिवृताभित्—काला। देववृक्ष इति। पुरो—गुग्गुलुः। पर्णः—सप्तपर्णः। मन्दारादिः—‘ पञ्चैते—देवतरवो मन्दारः पारिजातकः। सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दन ’मित्यमरः। [1427]स्नुवेद्रुमो—वृक्षकण्टे[1428]कारिकः।

५२३. नन्दीवृक्ष—इति। [1429]काश्मेरी—गम्भारी। कुबेरस्तुणिः। प्ररोही—नन्दीवृक्षोऽश्वत्थभेदः। ‘ प्ररोही गजपादप ’ इति **भावमिश्रः**। ‘ अश्वत्थभेदोऽधोमुखपत्रशाखः ’। “ वे ळि या पी प ळ ” इति लोके। पलङ्कषेति। रसा—रास्ना। मुण्डी—मुण्डीरी। लाक्षा—जतु। पुरो—गुग्गुलः। क्षुरो—गोक्षुरः।

५२४. किंशुकः—पलाशः। वीरवृक्ष इति। भल्लातकोऽरुष्करः। अर्जुनः—ककुभः कहुशब्दवाच्यः। ‘ पलङ्कषा[1430]मुण्डितिकारास्नाजतुषु [1431]कीर्त्यते ’। ‘ पलङ्कषः पर्णपुरत्रिकण्टेषु [1432]प्रवर्तते ’ इति **मेदिनी**। [ *101 a* ]. भूतवृक्ष इति। ‘ शाखोटः पीतफलको भूतावासः स्वरच्छदः ’ इति **भावमिश्रः**। “ स हो डा ” इति लोके ख्यातः। श्योनाकोऽरलुः। विभीतकोऽक्षः।

५२५. राजवृक्ष इति। शम्पाकः—आरग्वधः। पियालो—मुनिप्रियः। क्षत्रियो—राजादनं। प्लवो—गर्द[1433]भाण्डैः। षान्ताः। सद्भिः। वसुरिति। वृद्धियोग्यं। ‘ शोधनी श्रावणी वसु योग्य ’मिति [1434]कैयदेवः। वुकः—शिवमल्ली। मांसीति। [1435]कङ्कोली—बालपत्रा वल्ली यस्याः फलानि कङ्कोलानि। जटा—जटामांसी।

५२६. मिसिरिति। मधुरा—मेथिका। मांसी—जटामांसी। शतपुष्पा—शताह्वा। अजमोदा—यवानीभेदः। वह्निर्मार्जनी। ‘ स्यान्मांस्यां शतपुष्पायां मधुरायां मिसिः स्त्रिया ’मिति दन्त्यान्ते **रभसः**। ‘ मिसिः स्त्री मधुरामांस्योः शतपुष्पाजमोदयो ’रिति **मेदिनी**। **सोमनन्दी** तु ‘ मिशी मिशिरिति[1436] ’ तालव्यान्ते आह। मृत्सेति। काक्षी—तुवरी। श्रेष्ठमृन्मृत्सा। रस इति। सूतः—पारदः। विषं—काकोलः। बलं—बोलः।

५२७. रास्ना—सुरभिः। शल्लकी—गजभक्ष्या। ‘ पाठाम्बष्ठा विद्धकर्णी स्थापनी श्रेयसी रसे ’त्यमरः। द्राक्षा—मृद्वीका। मूर्वा—मधुरसा। ‘ देवी रसा मधुश्रवा तथे ’ति **हृदयदीपकः**। मुदी—गम्भारी। [1437]सैत्रिः। कलसीति। पृष्टिपर्णी—ग्रहा। दाडिमी—करकः। लेख्यपत्रो—भूर्जः[1438]।

---

१४२७. स्नुवो०. १४२८. कारिका. १४२९. काश्म०. १४३०. पलंकषा. १४३१. कीर्त्य०. १४३२. प्रवर्तते. १४३३. गर्द०, १४३४. कय० १४३५. कंको ली, १४३६. रिते, १४३७. सत्रि, १४३८. भूर्गः.

५२८. पय इति। क्षीरं—दुग्धं। नीरमुदकं। रेणुः—पर्प्पटः। परागः—सुमनोरजः। 'रजो नापि रजः समम 'ति द्विरूपेषु **विश्वः**। [ *101 b* ]. वायस इति। वृकधूपः—श्रीवासः। "ची ठ" इति लोके। अगुरुद्रुमः—जोङ्गकः।

५२९. काकोदुम्बरिका—मलयूः। काकमाची—ध्वांक्षमाची। श्रीवास इति। सरलास्रावः—वृकधूपः। 'श्रीवासः सरलास्रावः श्रीवेष्टो वृकधूपक ' इति। पंङ्कजं[1439]—कमलं। अथ श्रेयसीति।

५३०. रास्ना—रसा। 'रास्ना युक्तरसा रस्या श्रेयसी रसना रसे 'ति **निघण्टुः**। करिपिप्पली—गजपिप्पली। अभया—हरीतकी। वचा—हैमवती। सुरस इति। अर्जः—पर्णासः। "वा कु ची "ति लोके प्रसिद्धः। 'सुरसं तु त्रिषु स्वादौ पर्णासे न नपुंसक 'मिति। तुलसी—कृष्णा। रास्ना—सुरभिः।

५३१. सच। अथो घनरस इति। पीलुपर्णी—मूर्वा। 'मूर्वा मधुरसा देवी पीलुपर्णी मधुस्रवे 'ति [1440]**धंर्मिष्ठः**। क्षीरमोरटो—मूर्वाभेदः। 'घनमूलोऽपरःक्षीरमोरटो-क्षोटपुष्पक ' इति **केयदेवः**। हिमोपलः—कर्पूरः। 'शीताभ्रः शीतलरजो घनसारो हिमोपल 'इति [1441]**केयदेवः**। मेघपुष्पं[1442]—आपः। 'आपस्तोयं घनरसपयः पुष्करं मेघपुष्पं। कं पानीयं सलिलमुदकं वारि वाः शम्बरं चे 'ति **हलायुधः**। दक्षिणावर्तपारदेः[1443]—सिद्धरसः। 'भवेद्घनरसः सान्द्रे निर्यासे मोरटेऽपि च। कर्पूरे पीलुपर्ण्यां च सम्यक् सिद्धरसेऽपि चे 'ति **विश्वः**। 'भवेद्घनरसो नीरे दक्षिणावर्त-पारदे। सान्द्रनिर्यासकर्पूरे पीलुपर्णीषु मोरट ' इति **लोचनः**। 'पारदस्याग्निस्थायित्वे सति सिद्धत्वं तत्र दक्षिणावर्तनैव भ्रमि 'रिति **तद्विदः**। [ *102 a* ].

५३२. दीर्घायुरिति। ताम्रपुष्पा—शाल्मली। चिरजीवकः—जीवदः। मधुरसेति। गुडा—द्राक्षा। मूर्वा—देवी। गम्भारी—कट्फला। क्षीरिणी—दुग्धिका।

५३३. महारस इति। दीर्घपत्रः—[1444]इक्षुः। खर्जूरो—[1445]दुरारोहः। [1446]कसेरुः—वृषपर्वा। सूतः—पारदः। मलीमसमिति। पुष्पकासीसं—भूमिजो धातुः। सर्वतैजसं—लोहं। 'लोहस्तु[1447] शस्त्रे लोहं तु जोङ्गके सर्वतैजसे ' इति **लोचनः**।

---

१४३९. पंकजा. १४४०. धर्म्मिष्ठः. १४४१. कम०. १४४२. पुष्प०. १४४३. ०वर्त्त०, १४४४. इक्षुः. १४४५. दुरारोवः. १४४६. कसेव. १४४७. लोहस्तु.

५३४. सुमना इति। करञ्जः—‘ पूतीकरञ्जः सुमनास्तथा कलहनाशन ’ इतीन्दुः। जाती—मालती। ‘ गायत्रीहिमरोध्रपुण्ड्र[१४४८]सुमनोजम्बूसमङ्गावृषश्रेष्ठायष्टिपचंपचान्यतमत ’ इति बोपदेवः। टावन्तापि ‘ सुमनायाश्च पत्रेण पटोलारिष्टयोस्तथे ’ति सुश्रुतवचनात्। ‘ सुमना मालती जाती जाति ’रित्यमरश्च। ‘ विकसितसुमनः सुमेषु सत्सु। प्रबलमरन्दभरेण तुन्दिलेषु॥ मधुकर[१४४९]मर्देकद्रुमाणां। किमिति सुधाकुसुमेषु च भ्रमीष्वि ’ति गोस्वामिगोपेश्वराणां। ‘ सुमं कुसुमं भूम्नि स्त्रियां सुमनस ’ इति रत्नकोषः। ‘ सुमना पुष्पमालत्योः स्त्रियां ना धीरदेवयो ’रिति सान्ते मेदिन्यादिदर्शनादेकत्वमपि। ‘ पुष्पं सुमनाः कुसुम ’मिति नाममालादिदर्शनाच्च। ‘ सुमनाः प्राज्ञदेवयोः जात्यां पुष्पे ’ इति हैमः। सान्त[१४५०]वर्गे सान्ता[१४५१]ः। [ *102 b* ]. [१४५२]हृद्रिः। व्रीहिरिति। सामान्यधान्यं—धान्यमात्रं। आशुव्रीहिः—पाटलः। ‘ पाटल्यपुष्पाभो व्रीहि ’रिति सिद्धमन्त्रप्रकाशः। रुहेति।

५३५. रोहिणी—कटुरोहिणी। दूर्वा—हरिता। लोहमिति। जोङ्गकमगरु। ‘ अगरु प्रवरं लोहं राजार्हं जोङ्गकं लध्वि ’ति भावमिश्रः। ‘ लोहस्तु शस्त्रे लोहं तु जोङ्गके सर्वतैजसे ’ इति लोचनः। सार्वतैजसं—‘ सुवर्णं रजतं ताम्रं रीतिः कांस्यं तथा त्रपुः। सीसं कालायसं चैव अष्टौ लोहानि चेक्षत ’ इति। सहेति। सहदेवा—बलाभेदः। पीतपुष्पा—कङ्कतिका। ‘ मुद्गपर्णी—यथार्थैव शरपुङ्खाभगुल्मक ’ इति। नखो—व्याघ्रनखः।

५३६. कुमारी—घृतकुमारी। [१४५३]वनकर्पासी—चन्दनबीजिका। ‘ [१४५३]वनकर्पासिकायां तु सहा चन्दनबीजिके ’ति भावमिश्रः। शतपत्री—कुब्जकभेदः। बलाभिदतिबलौ[१४५४]। सिंह इति। बकुलो—मद्यदोहदः। ‘ सिंहस्तु बकुलः समा ’विति सिंहः। बृहतीद्वयं—कण्टकारीद्वयं। वृषको—वासकः। काकणी—कपर्द[१४५५]जौतिः। वङ्गं—वार्ताकं। [ *103 a* ].

५३७. [१४५६]हृत्रिः। किणिहीति। अश्वखुरः—कटभी। [१४५७]मौर्गे—आघाटः। खरमञ्जरीति समानार्थाः। वराह इति। किटिर्वाराहीकन्दः। मुस्तोऽब्दः। वैदेहीति। रोचना—गोरोचना। शौण्डी—पिप्पली। सुवहेति। शल्लकी—सुरसा। ‘ शल्लकी गजभक्ष्या च सुवहा सु[१४५८]रसी रसे ’ति भावमिश्रः।

---

१४४८. रिम. १४४९. मर्द॰. १४५०. वर्गो. १४५१. सांताः repeated twice. १४५२. हृद्रि. १४५३. कर्पा॰. १४५४. ॰बली. १४५५. ॰र्क. १४५६. हृत्रि. १४५७. मार्गो. १४५८. सुरसां.

५३८. रास्ना—रसा। 'शेफाली—नीलपुष्पी च निर्गुण्डी सुवहा चे'ति भावमिश्रः। [१५५९]" भा छ्" इति ख्याता[१५६०]। गोधापदी—त्रिपदी। 'गोधापदी तु सुवहा त्रिपदी हंसपदपी'ति कोषान्तरं। एलापर्णी—रास्ना। 'एलापर्णी तु सुवहा रास्ना युक्तरसा च से'ति। हच। महासहेति। माषपर्णी—काम्बोजिका। 'माषपर्णी च काम्बोजी कृष्णवृन्ता महासहे'ति धन्वन्तरिः। अम्लानः—कुमारिकाभेदः। 'अम्लानस्तु महासहे'त्यमरः। वक्रकण्टकः—कुब्जकः। हान्ताः। [*103 b*].

५३९. ग्रन्थार्थमुपसंहरति। प्रचुरेत्यादि। वित्ता—ज्ञाताः। प्रायः—बाहुल्येन। अशेषाभिधानेनेन्द्रादीनामपि वक्तुमशक्यत्वात्[१५६१]। उत्पलिनी—कोषविशेषः। तत्प्रभृतिषु—तदादिषु। तेनाभिधानचूडामणेरपि ग्रहः।

५४०. ग्रन्थकृदात्मानं ख्यापयति नवग्रहेति। हायनो—वर्षः। 'हायनोऽस्त्री शरत्समा'इत्यमरः। हालः—शालवाहनपार्थिवः। 'हाला सुराया'मिति हैमः। चातुर्भुजिः। अत इञ्।

पूर्वायुशास्ताय कृतां वचोभिः। शिवप्रकाशो रचितो यतोऽस्मिन्॥
विधीयतां दोषविधौ समाधिर्ग्रन्थे न दोषः क्व नरप्रणीते॥ १॥

सततपरहितैकमानसानां विमलधियां गुणिनाममत्सराणाम्॥
विलसतु हृदये चिकित्सकानामिति शिवदत्तकृतः प्रकाशः॥ २॥

॥ इति श्रीकर्पूरीयचतुर्भुजात्मजशिवदत्तकृतः शिवप्रकाशः पूर्णः॥

[*104 a*][१५६२].

---

१५५९. स. १५६०. ख्याताः. १५६१. वक्तु०. १५६२. On F. No. 104b the scribe mentions the total contents of the work thus: "पंक्तिः २२००, श्लोक १०००".

# INDEX TO AUTHORS AND WORKS CITED IN ŚIVADATTA'S KOṢA AND COMMENTARY*


अजयः—1, 54, 55, 83, 94, 103, 107, 110, 143, 144, 156.

अनेकार्थध्वनिमञ्जरी—107, 143.

अनेकार्थाः—146.

अन्यत्र—93.

अन्ये—67, 88, 125, 149, 160.

अभिधानचूडामणिः—53, 62, 63, 64, 96, 104, 105, 107, $123^{2}$, 125, 129, 165.

अमरः—1, 54, 55, 58, 62, $63^{3}$, 65, 66, $67^{2}$, 70, 73, $75^{2}$, $76^{4}$, 78, 79, 80, 83, 86, $87^{2}$, 88, 89, $91^{5}$, $95^{2}$, 96, 97, 98, 99, 101, $106^{3}$, 107, 108, $109^{5}$, $110^{2}$, $111^{2}$, $113^{2}$, $114^{2}$, $115^{2}$, 116, $117^{2}$, 118, $119^{3}$, 120, 121, $125^{2}$, 127, 128, 129, 130, $131^{3}$, 134, $136^{2}$, 137, 139, $140^{2}$, $141^{3}$, 142, 143, $144^{2}$, 145, 146, 148, 149, 150, $152^{5}$, 153, 155, $157^{2}$, 158, $161^{3}$, $162^{3}$, 164, $165^{2}$.

